Shri Raghunath Temple MSS. Library,
JAMMU

No. २६२२ (महाभारते)

Title भगवद्गीता १८ टीका सहिता

१२ श्रा,ध्याय:

Author श्री शंकराचार्य:

Extent ८८ Age १

Subject वेदान्त शास्त्रं

2722

F. = 88

## द्वादशोध्याय

शांकरभाष्य
आनंदगिरिकृत टीका
श्रीधरी स्वामिकृता
पिशाचभाष्य
रामानुजभाष्य
अभिनवगुप्ती
परमार्थप्रपा
वनमाली
कुसुमवैजयन्ती
मधुसूदनी
सदानंदी
नीलकंठी
आनंदी
रामकंठी
लासिकी
पंचोली ॥

भाषा अनुवाद ॥

अर्जुन उवाच एवं सततयुक्ता ये भक्तास्त्वां प
र्युपासते ये चाप्यक्षरमव्यक्तं तेषां के योग
वित्तमाः १ ॥

## शाङ्करभाष्य

द्वितीयप्रभृतिष्वध्यायेषु विभूत्यन्तेषु परमात्मनो ब्रह्मणोऽक्षरस्य वि
ध्वस्तसर्वविशेषणस्योपासनमुक्तं सर्वयोगैश्वर्यसर्वज्ञानशक्तिमत्स
त्वोपाधेरीश्वरस्य तव चोपासनं तत्र तत्रोक्तं विश्वरूपाध्याये त्वैश्व
रमाद्यं समस्तजगदात्मरूपं विश्वरूपं त्वदीयं दर्शितमुपासनार्थमे
व त्वया तच्च दर्शयित्वोक्तवानसि मत्कर्मकृदित्याद्यतोऽहमनयोरु
भयोः पक्षयोर्विशिष्टतरबुभुत्सया त्वां पृच्छामीति अर्जुन उवाच ए
वमिति एवं सततयुक्ता नैरन्तर्येण भगवत्कर्मादौ यथोक्तेऽर्थे समा
हिताः सन्तः प्रवृत्ता इत्यर्थः ये भक्ताः अनन्यशरणाः सन्तस्त्वां यथा
दर्शितं विश्वरूपं पर्युपासते ध्यायन्ति ये चाप्यक्षरमिति ये चान्येऽपि
त्यक्तसर्वैषणाः संन्यस्तसर्वकर्माणो यथाविशेषितं ब्रह्माक्षरं निर
स्तसर्वोपाधित्वादव्यक्तमकरणगोचरं यद्धि लोके करणगोचरं तद्व्य
क्तमुच्यते अञ्जेर्धातोस्तत्कर्मकत्वादिदं त्वक्षरं तद्विपरीतं शिष्टैश्चोच्य
मानैर्विशेषणैर्विशिष्टं तद्ये चापि पर्युपासते तेषामुभयेषां मध्ये के
योगवित्तमाः के अतिशयेन योगविद इत्यर्थः १ ॥ १ ॥

## आनन्दगिरिकृतटीका

अशोच्यानित्यादिषु विभूत्यध्यायावसानेषु अध्यायेषु निरुपाधिक
स्य ब्रह्मणो ज्ञेयत्वेनानुसन्धानमुक्तमिति वृत्तं कीर्तयति द्वितीयेति
अतिक्रान्तेषु तत्तदध्यायेषु सोपाधिकस्य ब्रह्मणो ध्येयत्वेन प्रतिपा
दनं कृतमित्याह सर्वेति सर्वस्यापि प्रपञ्चस्य योगो घटना जन्मस्थि
तिभङ्गप्रवेशनियमनाख्या तदैश्वर्यं सामर्थ्यं तेन सर्वत्र ज्ञेयं प्र
तिबन्धविधुरया ज्ञानशक्त्या विशिष्टस्य सत्त्वाद्युपहितस्य भगवतो
ध्यानं तत्र तत्र प्रसङ्गमापाद्य मन्दमध्यमयोरनुग्रहार्थमुक्तमित्यर्थः
एकादशे वृत्तमनुद्रवति विश्वरूपेति अध्यायान्ते भगवदुपदेश
मनुवदति तच्चेति अतीतानन्तरश्लोकेनोक्तमर्थम्परामृशति मत

कर्म्मकृदिति यथाधिकारं तारतम्येनानि साधनानि नियतत्वमध्याया
न्तरमवतारयन्नादौ प्रश्नमुत्थापयति अर्जुन इति सोपाधिकध्यानस्य निरु
पाधिकज्ञानस्य चोत्कर्षादित्यर्थः एवं शास्त्रार्थमुक्त्वा तमनूद्य सततयु
क्ता इति भागं विभजते एवमिति ये भक्ता इत्यनूद्य आवेश्य मनस्येति
मनन्यभक्त्याधिकारिणः सगुणशरणानुक्त्वा निर्गुणनिष्ठानुत्तमाधि
कारिणो निर्दिशति यथाविशेषितमनिर्देश्यं सर्वत्रगमचिन्त्यं कूटस्थ
मित्यादि वक्ष्यमाणविशेषणविशिष्टमित्यर्थः नन्वत्र त्वमुपासने वेत्यक्षरं शु
द्धमित्येतद्व्याचष्टे निरस्तेति करणागोचरत्वं व्यतिरेकद्वारा स्फोरय
ति यद्दीति यथाविशेषितमित्युक्तं स्पष्टयति विशेष्येति एवं द्विगत
क्रियापदस्यानुषङ्गं सूचयति तदिति सर्वं नावेदने योगं समाधिं विद
न्तीति योगविदः केपुनरतिशयेनैषां मध्ये योगविदो योगिन इति पृ
च्छति के अतिशयेनेति १॥

## स्वामिकृतटीका ३॥

निर्गुणोपासनस्यैवं सगुणोपासनस्य च श्रेयः कतरदिति तन्निर्णेतुं द्वादशो
ध्यायः सर्वाध्यायेनेमत्कर्मकृन्मत्परम इत्येवं भक्तिनिष्ठस्य श्रैष्ठ्यमुक्तं कौ
न्तेय प्रतिजानीहि इत्यादिना च तत्र तस्यैव श्रेष्ठत्वं वर्णितं तथानेषां ज्ञानी
नित्ययुक्त एकभक्तिर्विशिष्यते इत्यादिना च सर्वं ज्ञानप्लवेनैव वृजिनं संत
रिष्यसीत्यादिना च ज्ञाननिष्ठस्य श्रैष्ठ्यमुक्तं एवमुभयोः श्रैष्ठ्ये विशेष
जिज्ञासया भगवन्तमर्जुन उवाच एवमिति एवं सर्वकर्मार्पणादिना सत
तयुक्ताः तन्निष्ठाः सन्तो ये भक्तास्त्वां विश्वरूपं सर्वज्ञं सर्वशक्तिं पर्युपासते
ध्यायन्ति ये चाप्यक्षरं ब्रह्म अव्यक्तं निर्विशेषं उपासते तेषामुभयेषां म
ध्ये के अतिशयेन योगविदः श्रेष्ठा इत्यर्थः १ ॥

## पैशाचभाष्यम् ४ ॥

एवं सद्दर्शनं भगवद्रूपं प्रसहेनोपलभ्य तस्योपास्यत्वं च भगवद्वचना
देवमुक्त्वा किमेवं साकारं भगवद्रूपमुपास्यमाहोस्विदव्यक्तं ब्रह्मरूपमु
पास्यमिति संशयानस्तन्निर्णयार्थमर्जुन उवाच एवं सततयुक्ताः सा
कारध्याननिष्ठाः योगवित्तमाः परमात्मवित्तमाः १ ॥

## रामानुजभाष्यम् ५

भक्तियोगनिष्ठानां प्राप्यभूतस्य ब्रह्मणो भगवतो नारायणस्य निरंकु

शैश्वर्यमाज्ञातकर्त्तृकामायाज्ञेनाप्यनवधिकातिशयप्रकाशमयश्रीदार्यसौ-
शील्यादिगुणसागरेण सत्यसंकल्पेन भगवता स्वैश्वर्यं यथावदवस्थितं तद्-
र्शितं तदुक्तं च तत्त्वतो भगवज्ज्ञानदर्शनप्राप्तानामैकान्तिकात्यन्तिकभगव-
द्भक्त्यैकलभ्यत्वेनेतरमात्मप्राप्तिसर्पणमुक्तात्मोपासनात् भक्तरूपस्य भ-
गवदुपासनस्य स्वसाध्यनिष्पादने शैघ्र्यात् सुखोपादानत्वाच्च श्रैष्ठ्यं भगव-
दुपासनोपायं च तदसक्तस्यात्मनिष्ठतां तदपेक्षितानि चाध्यायेऽन्ते भगवदुपा-
सनस्य प्राप्यभूतोपायस्य श्रैष्ठ्याद्वेषन्तं योगिनामपि सर्वेषां मद्गतेनान्तरा-
त्मना श्रद्धावान् भजते यो मां स मे युक्ततमो मत इत्युक्तं अर्जुन उवाच एव-
मिति एवं सततयुक्ता इत्यादिना अनेन प्रकारेण सततयुक्ता भगवन्तं त्वामे-
व परमप्राप्यं मन्वाना ये भक्तास्त्वां सकलविभूतियुक्तमनवधिकातिशय-
सौन्दर्यसौशील्यसर्वज्ञसत्यसंकल्पत्वाद्यनन्तगुणसागरं परिपूर्णमुपा-
सते ये चाप्यक्षरं प्रत्यगात्मस्वरूपं तदेवाव्यक्तं चक्षुरादिकरणानभिव्य-
क्तस्वरूपमुपासते तेषामुभयेषां के योगवित्तमाः के स्वसाध्यप्राप्तिशीघ्र-
गामिन इत्यर्थः भवामि न चिरात्पार्थ मय्यावेशितचेतसामित्युत्तरत्र योग-
वित्तमत्वं शीघ्राविषयमिति वोजयिष्यते १॥

श्रीमिनवयमकृतटीका ८

एवमुक्तेन नयेन ये सेश्वरब्रह्मोपासका ये च केवलमात्ममात्रमुपासते
तेषां विशेषाख्यानाय प्रश्नः १॥

परमार्थप्रपा टीका २

[illegible] सर्वाध्यायान्ते मत्कर्मकृन्मत्परम इत्यनेन सर्वोपाये-
पगम्यस्य विश्वरूपस्य कृत्स्नस्य ज्ञानदर्शनप्राप्तौ वा श्रेष्ठाधिकारी प्रोक्तः एवं
ज्ञानी त्वात्मैव मे मतं तथा स योगी परमो मत तथा ब्रह्मविदाप्नोति परमि-
ति श्रुते स्ययोगस्तानादिसंयुपेतः श्रेष्ठ उक्तः तयोर्मध्ये कस्य श्रेष्ठत्वमि-
ति प्रश्नव्याजेन परं ब्रह्म जिज्ञासुरर्जुनः पृच्छति एवमिति एवमुक्तप्रकारेण सर्वकर्मार्पणादि
नासततयुक्तास्त्वन्निष्ठा ये भक्ता त्वां विश्वरूपं सर्वज्ञं सर्वशक्तिं पर्युपासते ध्यायन्ति ये चाप्यक्षरं ब्रह्म
अव्यक्तं निर्विशेषमुपासते ध्यायन्ति तेषामुभयेषां मध्ये योगवित्तमाः के इति प्रश्नः १।

वनमाली टीका ८

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना श्रद्धावान् भजते यो मां स मे युक्ततमो
मत इति षष्ठे मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते इति सप्तमे अनन्यचे-
ताः सततं यो मां स्मरति नित्यशः तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिन
इत्यष्टमे मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु मामेवैष्यसि युक्त्वैवमा-
त्मानं मत्परायण इति नवमान्ते मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः नि-
र्वैरः सर्वभूतेषु यः स मामेति पाण्डवेति एकादशाध्यायान्ते च भक्तियोगस्य निरप-
त्वस्य भक्तिरेतत्त्वमके स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः प्राणा-

श्री॰
गी॰ टी॰
द्वा॰

3

पानौ समौ कृत्वा नासाभ्यंतरचारिणौ यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपराय
णः विगतेच्छाभयक्रोधो यः सदा मुक्त एव स इति पंचमे युंजन्नेवं सदात्मा
नं योगी नियतमानसः शांतिं निर्वाणपरमां मत्संस्थामधिगच्छतीत्यादि
कं षष्ठे यदक्षरं वेदविदो वदंति विशंति यद्यतयो वीतरागाः यदिच्छंतो ब्र
ह्मचर्यं चरंति तत्ते पदं संग्रहेण प्रवक्ष्ये सर्वद्वाराणि संयम्य मनो हृदि नि
रुध्य च मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणां ओमित्येकाक्षरं ब्र
ह्म व्याहरन्मामनुस्मरन् यः प्रयाति त्यजन्देहं स याति परमां गतिमित्यष्ट
मे वाष्टांगयोगस्यापि मोक्षहेतुत्वेन तत्र निर्विचितपाशीघ्रं ससाध्यं कः साध
यतीत्यर्जुनः पृच्छति एवमिति एवमष्टप्रकारेण भक्ताः श्रवणकीर्तना
र्चनवंदनदास्यादि नवधा भक्तिं कुर्वाणास्त्वय्यनिसेहवंतः त्वामेव कर्मा
धिकाराविनाशं प्राप्य च सर्वोत्तमं मत्वा वानस्तरतीत्यक्षरं विनाशशून्यं स
दैकाकारमव्यक्तमिंद्रियागोचरं त्वां पर्युपासते त्वस्रीतिमेव परमप्रयो
जनं मन्वानाः सेवंते ये वाप्यन्ये पूर्वयोगयोगिनस्तेन सः प्रशस्तविषयत्वाम
न्वानास्थितैकाग्रपरमप्रयोजना यमनियमासनप्राणायामप्रत्याहार
धारणाध्यानसमाध्यष्टयोगस्यांगानि तत्पराः अहिंसासत्यास्तेयब्रह्म
चर्यापरिग्रहा यमाः शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः य
मासनं वीरासनं भद्रासनं स्वस्तिकमित्यादिकं यथासुखमासनं प्राणाया
मलक्षणमुक्तं चतुर्थाध्याये इंद्रियाणां बाह्यविषयेभ्यो निवर्तनं स्वके
स्वरूपे स्थापनं प्रत्याहारः स्वविषयासंप्रयोगे चित्तस्य स्वरूपानुकार इवें
द्रियाणां प्रत्याहारः स्वविषयसंप्रयोगाभावे चित्तस्वरूपानुकार इवेति
चित्तनिरोधे चित्तवन्निरुद्धानींद्रियाणि नेंद्रियांतरजयवदुपायांतरमपे
क्षंते यथा मधुकरराजं मक्षिका उत्पतंतमनूत्पतंति निविशमानमनु
निविशंते तथेंद्रियाणि चित्तनिरोधे निरुद्धानीत्येष प्रत्याहार इति यो
गसूत्रभाष्याभ्यामयमर्थः स्पष्टः देशबंधश्चित्तस्य धारणा नाभिच
क्रे पुंडरीके मूर्ध्नि ज्योतिषि नासिकाग्रे जिह्वाग्र इत्येवमादिषु देशेषु बाह्ये
विषये वा चित्तस्य तत्र प्रत्ययैकतानता ध्यानं तस्मिन्देशे ध्येयालंबन
स्य प्रत्ययस्यैकतानता सदृशप्रवाहः प्रत्ययांतरेणापरामृष्टो ध्यानं
तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ध्यानमेव ध्येयाकार
निर्भासं प्रत्ययात्मकेन स्वरूपेण शून्यमिव यदा भवति ध्येयस्वभावावे
शात्तदा समाधिरित्युच्यते भगवति संयोजनाच्चित्तशुद्धे सत्क्षीणमहति
के भवतीति मन्वानास्त्वयि चेतो धारयंत्यष्टांगेन तेषां भक्तानां योगिना
च मध्ये योगवित्तमा उपायविशेषज्ञाः अनायासं शीघ्रं च फलं के प्राप्नु

वेतीत्यर्थः महांतस्तु एवंदृष्टक्षतस्वरूपं त्वामकर्मकरिष्याशुकप्र
कारेणोपासनेये चाप्यक्षरमव्यक्तं लक्षीत त्वमुपासते तेषामुभयेषांम
ध्येकेर्योगवित्तमा अतिशयेनोपायविदः अक्षरमव्यक्तं परं रूपमादौ वि
स्पष्टतिरेवाक्षरपदवाच्या अक्षरात् त्वमस्याहरे रभिधानादिति व्याचक्ष
ते केचित्तु अक्षरमव्यक्तपदार्थो जीवः इदानीमविज्ञातस्वरूपत्वाद्वा विविच्य
ते ज्ञानान्तैकतान देहादिविलक्षणतया स्वस्वरूपं सदा चिंतयंति ये ये
वत्वद्भक्तास्तेषां के योगवित्तमा इत्याहुः १ ॥

जत्वमवैजयन्ती टीका १

स्वप्राप्तिसाधनतो हि सर्वेषां भक्तिरूजमायत्तत्वानिरपेक्षत्वेति द्वादशोह
रिणोक्ते १ एवमर्जुनेन साराधितेन भगवता निरंकुशैश्वर्येण श्रीकृष्णेन
स्वकीयमसाधारणं परमैश्वर्यं तद्दृष्टकामायार्जुनाय दर्शितं तेन स्वचा
नन्यभक्तिलभ्यत्वमप्युक्तं इदानीं प्रयाणकाले मनसाचलेनेत्यादिना योगयु
क्तात्मानयोगेन चाप्यन्य इत्यनेन ज्ञानयुक्ता वयाभक्तिरुक्ता ताभ्यामुभा
भ्यां भक्तिभ्यां योगिनामपि सर्वेषां मद्गतेनांतरात्मना श्रद्धावान्भजते यो
मां स मे युक्ततमो मत इत्यत्रोक्तायाः पराख्यायाः श्रद्धायाः श्रेष्ठत्वं भगव
तोपपादितं तत्र परमात्मप्राप्त्युपायभूतजीवात्मोपासनं श्रेष्ठमुत भ
क्तिरूपं भगवदुपासनमिति संदिह्य विज्ञोर्जुन उवाच एवं सततयुक्ता
इति एवं मय्यासक्तमनाः पार्थेत्यादिनावाद्य उक्तप्रकारेण सततयुक्ताः
नैरंतर्येण भगवत्कर्मादौ प्रवृत्ताः त्वामेव भगवंतमुपायोपेयं परमप्रा
प्यमत्वा नान्यभक्ताः भगवद्भजनमन्तरेण क्षणमपि देहधारणमल
भमानास्त्वन्निखिलहेयप्रत्यनीकस्वाभाविकानवधिकातिशयसौं
दर्यौदार्यसौशील्यवात्सल्याद्यनन्तकल्याणगुणरत्नाकरं समस्तानंत
विभूतियुक्तं भगवंतं श्रीकृष्णं पर्युपासते परितः सर्वदेहेंद्रियादिव्या
पारैरुपासनेन सेवंते च पुनः प्रणिपत्यापि ये भक्ताः अक्षरं जीवात्मस्वरू
पं तद्वाय्वकेन्द्रियादिकरणेनानभिव्यक्तस्वरूपं पर्युपासते ध्यानधा
रणासमाध्यादिभिः साक्षात्कर्तुमीहन्ते तेषामुभयेषां मध्ये योगवित्तमाः
स्वसाध्यप्राप्तिशीघ्रगामिनः के भवंति स्वस्वरूपानुभवः सर्वेकस्य भ
गवद्ध्यानस्य वहमूलत्वात्तेन निर्विघ्नमनभिप्रेत्येके अनिमलस्वरूप
स्य नीरूपनिरवयवत्वा स्वप्रत्यगात्मनोऽदृष्टोन विषयत्वादतो भगवद्भ
क्तिरेव सर्वविघ्नविमर्दिनी कृष्णप्राप्तिरित्येके तेषामुभयेषामुपायेषु

कः श्रेयानुपायः इति कथयेत्याशयः १ ॥

मधुसूदनी टीका ॥ १

पूर्वाध्यायांते मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः निर्वैरः सर्वभूतेषु
यः स मामेति पांडवेत्युक्तं तत्र मच्छब्दार्थे संदेहः किं निराकारमेव सर्वस्व
रूपं वस्तु मच्छब्देनोक्तं भगवता किं वा साकारमिति उभयत्रापि प्रयोगद
र्शनात् बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यते वासुदेवः सर्वमिति स
महात्मा सुदुर्लभ इत्यादौ निराकारं वस्तु व्यपदिष्टं विश्वरूपदर्शनानंत
रं च नाहं वेदैर्न तपसा न दानेन न चेज्यया शक्य एवंविधो द्रष्टुं दृष्टवान
सि मां यथेति साकारं वस्तु उभयोश्च भगवदुपदेशयोरधिकारभेदेन
व्यवस्थया भवितव्यं अन्यथा विरोधात् तत्रैवं सति मया मुमुक्षुणा किं
निराकारमेव वस्तु चिंतनीयं किं वा साकारमिति स्वाधिकारनिश्चयाय
सगुणनिर्गुणविद्ययोर्विशेषबुभुत्सया एवं मत्कर्मकृदित्याद्यनंतरो
क्तप्रकारेण सततयुक्ताः नैरंतर्येण भगवत्कर्मादौ सावधानतया प्रवृ
त्ता भक्ताः साकारवस्त्वेकशरणाः संतः त्वामेवं विधं साकारं ये पर्युपास
ते सततं चिंतयंति ये चापि सर्वतो विरक्ताः त्यक्तसर्वकर्माणोक्षरं न
क्षरतीत्यश्नुते वाक्षरं एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदंत्यस्थूल
मनण्वह्रस्वमदीर्घमित्यादिश्रुतिप्रतिषिद्धसर्वोपाधि निर्गुणं ब्रह्म अत
एवाव्यक्तं सर्वकरणागोचरं निराकारं त्वां पर्युपासते तेषामुभयेषां
मध्ये के योगवित्तमाः अतिशयेन योगविदः योगं समाधिं विदंति वि
दंतीति वा योगविदः उभयेपि तेषां मध्ये के श्रेष्ठा योगिनः केषां ज्ञानं
मयानुसरणीयमित्यर्थः १ ॥

सदानंदी टीका ॥

अनादौ संसारे जनिमृतिमये भ्रांतिनिविडे निमग्नानां पुंसां क्वचिदपि सु
खेनाप्तिं विमलतपोभिर्वा दानैः क्रतुभिरपि वेदाध्ययनैः श्रितेन्यत्प्रे
मणा हरिपदसरोजेक्षु सरवदे १ अतोहं तेनाथ कृतिविशदकीर्तेर्म
धुरिपोः शरण्यपादांभोजभ्रमरइव श्रीमत्पादेनिलयं सदाध्यातेः प्रे
मणा रतिमतिगतीनां निजगृहं धियायाचज्ञातं नव निजवपुर्भ्रा
हयमजं २ मत्कर्मकृन्मत्परमो मद्भक्तो यः स मामेतिमां पूर्वाध्याया
तद्युत्पत्र मच्छब्दार्थोस्ति संशयः ३ किं निराकारमेवोक्तं वस्तु मच्छ
ब्देनाथवा साकारमिति मच्छब्द उभयत्रापि हि दृश्यते ४ ॥

बहूनांजन्मनामंतेज्ञानवान्मांप्रपद्यते शक्यएवंविधोद्रष्टुंदृष्ट
वानसिमांयथा ५ इत्येवमुभयोर्विसोरुपदेशोस्तिवस्तुनोः
तत्राधिकारिभेदेनभवितव्यंव्यवस्थया तत्रकिंचिंतनीयंस्या
न्मयावस्तुसुलक्षणे साकारंवानिराकारमितिसंदेहशांतये
विषयोरुभयोर्मध्येकास्याश्रेष्ठतरामता हरेरेवंश्रुतवतःस
त्तर्जुनःपरिपृच्छति ८ मत्कर्मकृन्मत्परमोइत्यत्रोक्तप्र
कारतः सावधानतयानित्यंयेप्रहृष्टामहोत्सवे ९ अ
नन्यशरणाःसंतस्त्वत्कर्मादौत्वदर्पिते त्वामेवंविश्वरूपं
श्रीभगवंतंशरणालयं १० नैरंतर्येणसाकारंचिंतयंतिवि
चक्षणाः येचसंन्यस्तकर्माणित्यक्त्वासर्वैषणांबुधाः ११
परंब्रह्माक्षरंशुद्धंनिर्गुणंनिष्कलंशिवं सर्वोपाधिविनि
र्मुक्तंनिराकारंनिरामयं १२ त्वांपर्युपासतेनित्यमखंडा
त्मानमद्वयं केचिच्छिष्टतरास्तेषामुभयेषांहियोगि
नाम् १३ मयामुमुक्षुणाश्रेयंकेषामाश्रित्यसन्मतम्
१४ १ ॥

नीलकंठी टीका

समसमारंभेतावताग्रंथेन तत्पदवाच्यार्थोनिरूपितः
इदानींतत्पदार्थशोधनमुपासनाकांडंचसमापयिष्यति

श्री·
गी· टी·
द्वा·

5

ह्यार्थतः प्राधान्येन तत्पदलक्ष्यमर्थं तद्विदां लक्षणा
निच प्रदर्श्यन्ते शाहूतस्तु लौकिकबुद्ध्यनुसारेण तत्प
दवाच्यस्येवोपासनादिकं प्रपंच्यते तत्र सर्वाध्यायान्ते
मत्कर्मकृन्मत्परम इत्यादि १

नात्मभजनमव्यक्तं तद्बुमद्ध्रह्यार्थः किं सगुणमनंतनिर्गुणं ब्रह्म उभ
यत्राप्यस्मच्छद्रस्य सर्वं प्रयोगदर्शनात्संदिहानः पृच्छति एवमिति
एवमित्यव्यवहितेमत्कर्मकृदित्यादिनाउक्तेप्रकारेपरामृशति
अनेनप्रकारेणयेसततयुक्ताःनित्यंसमाहितचित्ताःभक्ताःसगु
णंविदितत्वांपर्युपासतेयेचाप्यक्षरमस्थूलादिलक्षणमव्यक्तं
त्यागयोगावरमुपासतेतेषांमध्येयोगवित्तमाःकेकतरेइत्यर्थः १

[illegible]नंदटीका

ॐ इत्थंपरमेश्वरस्यव्यक्ताव्यक्तस्वलक्षणमवगम्यमत्कर्मकृत्मत्पर
मइतिसमनंतरंध्यायेभगवदुपदेशंश्रुत्वातदुपासनायांसाकार [निराकार]
[एवमिति] विषयतेनसंशयानोर्जुनउवाच सततंयस्मात्कस्मोचिदवस्थायांयु
क्तास्त्वय्येवसमाहितचित्ताःभक्तास्त्वामेवव्यक्तंचतुर्भुजाद्याकारंपर्यु
पासतेभजंतेयेचकेचनाक्षरमव्यक्तंनिराकारंभजतितेषामुभयेषांम
ध्येकेयोगवित्तमाः अतिशयेनतत्प्राप्तिफलसमाधिज्ञाः [illegible]
[illegible] १॥

रामकंठीटीका

ॐ एवंपरमात्मभगवद्वचनलक्षणात्मसत्प्रमाणप्रमाणपदेहेतोःप्र
माणोतमात्मस्यगवगतेध्यायैकादशकेप्रति[illegible]देनप्रत्यध्यायसमु
च्चयानुष्ठानपर्यवसिततात्पर्येज्ञानविज्ञानाद्यैःप्रकारणाभिधेयवस्तु
रूपपत्तनमत्वेनोत्पन्नविषकस्यप्रति[illegible]पत्तिरतएवतथापाश्रीभूत
प्रश्नतदर्शनप्रसन्नाद्भगवतएवपरमज्ञानरूपंदिव्यंचक्षुरुन्मेषका
णंपरममनुग्रहमवाप्नवान्नयत्नंविनैवपारमेश्वरपरमनुग्रहप्रभा
वमात्राद्देवतागमात्रेसाक्षात्कृतस्यपरतत्त्वस्येदानींस्वातंत्र्योणानुस्म
रणेप्रगमःकःपंथाममयास्थेयः अथवासहवनासादितपरानुग्र
हेणाभियोगिनाजननेकेनमार्गेणतत्त्वमुपासादितव्यमितिस
परार्थंतत्पतरोपायंजिज्ञासुरर्जुनउवाच यथाविश्वातीतस्वरू
पएवविश्वात्मकतयासाक्षात्कृतोप्येवमनेनप्रकारेणयेसततयुक्ताः
सततंसर्वदाजाग्रदादिषुसर्वावस्थासुयुक्ताःसमाहिताःसंतोभक्ताः

गी॰ प्रणयिनस्त्वां पर्युपासते तेमेवंते येचकेवलनाक्षरं चिन्मात्रैकस्वरूपा,से
टी॰ चरणशीलमत एवाव्यक्तमव्यक्तात्स्मात्सर्वेन्द्रियगोचरात्मनाभावलक्ष
हा॰ णाद्दूरत्वेनोक्तं सर्वार्थनिषेधसमाधिनिलात धिषणास्त्वां पर्युपास
ते तेषामुभयेषां योगविदां मध्येकेयोगवित्तमाः अतिशयेनत्वत्स्व
रूपोपलब्धिफलसमाधिज्ञाः ॥

टीका

एवं श्रीभगवान्बुद्धियोगाद्दारभ्य वैश्वात्म्योपलब्धियावत्तयत्नं विनै
वोपदेशेनार्जुनमनुगृहीतवान् अथुनोपासनापरपर्यायस्य भज
नयोगस्य स्वेच्छयापरतत्त्वप्रवेशोउपायभूतस्य शास्त्रेषु बहुधोक्तस्य
भगवता पंचमाध्याये यावत्साध्यमेन प्राधान्येन च कर्मयोगतया ष
ष्ठेध्याये निरोधयोगतया चाविधा निर्दिष्टस्यैकतरवैशिष्ट्यबुभुत्सया
एवमिति अर्जुनउवाच एवमुक्तविपर्यायभक्ताः प्रणयेनोपासकाः सततयु
क्ताः सततमतिशयव्यवहारदशास्वपि नत्तु निरोधयोगवत्परिच्छिन्नं
कालेयुक्ताः समाहिताः सन्त एवमुक्तेन तः संतत्तामीश्वरस्वात्मप्रा विश्वं
प्रदीपकल्पैकरस्यैकान्तप्रतिष्ठितं पर्युपासते ध्यायंति येकेचिदक्षरं स्व च
रूपादसंचलेनास्फुरविमर्शवशिष्यानंकूटस्थंप्रदीपप्रभामंडलस
दृशम् अत एवाव्यक्तं सदप्यनाभासमानं पर्युपासते चित्तवृत्तिनिरो
धेकतायाध्यायंति तेषामुभयेषां मध्येकेयोगवित्तमाः अतिशयेनप्रा
यांसं विनैव सद्यो योगलक्षणास्समाधिभाजस्तु ॥

पंचोलीटीका

द्वितीयादिविभूत्यन्तेषु विधस्तस्सर्वोपायेब्रह्मणः अक्षरस्योपासनमु
क्तं तेषांज्ञानी नित्ययुक्तः सर्वज्ञानस्लवेनैवेतितस्यनिर्गुणोपासन
स्यश्रेष्ठत्वमुक्तं [illegible] एकादशेच पेश्वरमा
यस्मस्तं जगदात्मरूपमुक्त्वा मत्कर्मकृदिमनेनतस्य सगुणदर्श

[illegible]

नस्यश्रेष्ठत्वमुक्तवानतः अनयोःपक्षयोरुभयोःश्रेष्ठतरविभुत्सत
याभगवंतमर्जुनःपृच्छति एवमिति येभक्ताअनन्यशरणाःएवंप्र
वौक्तंमत्कर्मकृदितिश्लोकोक्तमार्गेणत्वत्कर्मकरणादिपरतया:
नैरंतर्येणत्वांयथोक्तदर्शिनंविश्वरूपंपर्युपासतेपर्युपासनंकुर्वंते
येचापित्यक्तसर्वैषणाःसंन्यस्तसर्वकर्माणःसर्वोपाधिरहितमव्यक्तं
इंद्रियागोचरंअक्षरंब्रह्मपर्युपासते मनःतद्विषयंकृत्वादीर्घकाल
नैरंतर्यादरैःतैलधारावदविच्छिन्नतयाज्ञानकारणंपर्युपासतेते
षामुभयेषांमध्येकेयोगवित्तमाःअतिशयेनयोगविदः इत्यर्थः १

रणवीरसमिद्धोधिनी

श्रीकार्तवीर्यार्जुनायनमः अनर्घोनुपमागराय लोकोत्तीर्ण
गुणाकरः जीवताद्रणवीरोसौ रामभक्तिपरायणः पूर्वाध्या
यांते मत्कर्मकृन्मत्परम इत्युक्ते तत्र सच्छहार्थे सन्देहः किंनि
राकारं वस्तु भगवतोक्तं किंवा साकारं वस्तु उभयत्रापि प्रयोग
दर्शनादुभयोरेव भगवदुपदेशायोरधिकारभेदेन व्यवस्थया
भाव्यमन्यथा विरोधापत्तिस्तत्रैवं सति किं मया निराकारवस्तु
निष्ठेनेति स्वाधिकारनिश्चयाय सगुण निर्गुणविशेषजिज्ञास
यार्जुन उवाच एवं सततयुक्ता इति एवंपूर्वोक्तप्रकारेण येभ
क्तास्तदवतारेषु भगवत्कृतेषु तद्रूपकर्मणि समाहितास्तथा
सततयुक्ताः सततं नित्ययुक्ताः मन्त्रहष्टन कवच स्वकृतं त्वां स
गुणं पर्युपासते स्तुहृयत्तेन तोषयंति ये च संत्यक्त सर्वकामना
नद्वारते स्तुतेवत्यक्षरं निर्गुणब्रह्म अव्यक्तमकरणगोचरं यदि
लोके करणगोचरं तद्व्यक्त मुच्यते तद्विपरीतमव्यक्तं वा निराका
रं पर्युपासते ध्यानयत्नेन तोषयंति तेषामुभयेषांमध्ये के योग
वित्तमा अतिशयेन योगविदो योगं युक्तिं विदंति योगविदस्तेषां
मध्ये के श्रेष्ठाः केषां वर्त्म मया अनुसर्तव्यमित्यर्थः १॥

7

अव्यक्तोपासनाद्भगवदुपासनस्योत्तमत्वं प्रदर्श्य तदुपायं
प्रदर्शयत्यस्मिन्नध्याये तदुपासनमपि मोक्षसाधनं प्रतीय
ते 1 श्रियं वसानाऽमृतत्वमायन्भवन्ति सत्याः समिधा मितद्रु
विति अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमु
च्यत इति अव्यक्तं च महतः परं महतः परमव्यक्तमित्युक्ते
परमपदोपपत्तेः उपास्यत्वं श्रियमव्यक्तसंज्ञां भक्त्यामत्या
ऽच्यते सर्वं बधीति सामवेदे आग्निवेश्यशाखायां मह
त्समाप्यं तस्याः वेदे ह्युच्यते चतुष्कपर्दा युवतिः सुपेशा घृ
तप्रतीका वयुनानि वस्ते तस्यां सुपर्णा वृषणा निषेदतु
र्यत्र देवा दधिरे भागधेयं चतुष्कपर्दा युवतिः सुपेशा घृ
तप्रतीका वयुनानि वस्त इति च अहं रुद्रेभिर्वसुभिश्चराम्य
हमादित्यैरुत विश्वदेवैरित्यारभ्य अहं राष्ट्री संगमनी वसू
नां चिकितुषी प्रथमा यज्ञियानां तां मा देवा व्यदधुः पुरुत्रा
भूरिस्थात्रां भूर्यावेशयन्तीं मया सोऽन्नमत्ति यो विपश्यति
यः प्राणिति य ईं शृणोत्युक्तं अमन्तवो मां त उपक्षियन्ति श्रुधि
श्रुत श्रद्धिवं ते वदामि यं कामये तं तमुग्रं कृणोमि तं
ब्रह्माणं तमृषिं तं सुमेधां अहं रुद्राय धनुरातनोमि ब्रह्म
द्विषे शरवे हन्तवा उ अहं सुवे पितरमस्य मूर्धन्मम योनिर
प्स्वन्तः समुद्रे परो दिवा पर एना पृथिव्यैतावती महिना
संबभूवेत्यादि च तथा तु स्पष्टमृषिर्भवति देवतैव या ब्रह्माग
तश्रीकत्तनयेति च इति पाकाकस्यचिद्भवति अतोऽज्ञानन्
४ पितृत्वमद्युक्तितापनायपृच्छति पवामिति पवं ब्राह्मेनद्दृ
श्रुतं रूपमकर्मकमित्यादिप्रकारस्य पराम्रष्यते अव्यक्तं
प्रकृतिः महतः परमव्यक्तमिति प्रयोगात् यत्त्रिगुणम्

व्यक्तं नित्यं सदसदात्मकं प्रधानं प्रकृतिं प्राहुरविशेषं विशे
षवदिति भागवते अक्षरं च तत् अक्षरात्परतः परइति श्रु
तेः परं तु ब्रह्म न हि भगवतोन्यत् आनंदमानंदमयो वसा
ने सर्वात्मके ब्रह्मणि वासुदेव इति भागवते तद्रूपं वेदयत्साधि
तं पुरस्तात् उपासनं च तथैव कार्यं सहस्रशीर्षा पुरुषः स
हस्राक्षः सहस्रपादित्यारभ्य तमेवं विद्वानमृत इह भवति
नान्यः पंथा अयनाय विद्यत इति साम्यात्सादित्यवर्णो वा
दिश्च दृष्टोपचारत्वेनांगीकार्यः तथा च सामवेदे सोकामय
त श्रुतिः स्याम इदं वै प्राजापत्यः स प्रजापतिं पितरमेत्याब्रव
मुमुक्षुभिः साधुभिः सुतपोभिः किमिदं वै तारकं तारकं वाच्यं ध्या
नं च तस्यामरूपः कुत्र स्यात् ध्येयश्च कः पुरुषो लोमपादः इ
ति तं होवाच य एवै विसृष्टस्तारको लोमपादैः ध्यानं च तस्या
मरुच्च वदामि सोनंतशीर्षो बहुवर्णस्त्ववर्णो ध्येयः स वै लोहि
तादित्यवर्णः यथा मोक्षं वा हृदये सोष्टबाहुरनंतवीर्योऽनंत
बलः पुराणइति अहं प्रवादे सुगति कृष्णा पुरस्तात् पुरुष
भेदश्च एष्ठादौ प्रतीयते तं वा पर्युपासते य एवाप्यक्षरमित्यादौ
स वै तत्त्व उपासकाय वेदितमाः इतरेषां किं फलमित्यत आ
ह १॥

8

## भाषा अनुवाद टीका

एकादश अध्यायके अन्तिम श्लोकसे औ नवम अध्यायके एकतिस श्लोकादिसे भी सगुण भगवद्भक्तों को श्रेष्ठ कहा और तेषां ज्ञानी नित्ययुक्त एक भक्ति विशिष्यते इत्यादि सप्तम अध्याय के सत्र हैं श्लोकसे औ सर्वं ज्ञान प्लवेनैव वृजिनं सन्तरिष्यसि इत्यादि चतुर्थ अध्याय के छत्तिस श्लोकादि से भी ज्ञानीहीं को श्रेष्ठ कहा सो सगुण निर्गुण उपासनामे कौन उपासना श्रेय है अर्थात् जो भक्त सर्वज्ञ विश्वरूप सर्वशक्ति मान रूप तुम को ध्यान करता है सो कि जो अव्यक्त औ निर्विशेष अविनाशी ब्रह्म की उपासना करता है सो इन दोनो के मध्यमे कौन भक्त अतिशय योगवित् अर्थात् श्रेष्ठ है यह अर्जुन भगवानसे पूछने भये १॥

### दोहा

जोहरिनिरंतरयुक्तहोभक्तउपासेतोहि जोअक्षरअव्यक्तकहं
कोतेहियोगवित होहि १

श्रीभगवानुवाच मय्यावेश्य मनो ये मां नित्ययुक्ता
उपासते श्रद्धयापरयोपेतास्ते मे युक्ततमा मताः
२ ॥

शाङ्करभाष्यं २

श्रीभगवानुवाच ये त्वक्षरोपासकाः सम्यग्दर्शिनो निवृत्तैषणास्ते ताव
त्तिष्ठन्तु तान् प्रति यद्वक्तव्यं तदुपरिष्टाद्वक्ष्यामः ये त्वितरे मयीति म
यि विश्वरूपे परमेश्वरे आवेश्य समाधाय मनः ये भक्ताः सन्तो मां
सर्वयोगेश्वराणामधीश्वरं सर्वज्ञं विमुक्तरागादिक्लेशतिमिरदृष्टिं नि
त्ययुक्ता अतीतानन्तराध्यायान्तोक्तश्लोकार्थन्यायेन सततयुक्ताः सन्त
उपासते श्रद्धया परया प्रकृष्टया उपेताः मे मम मताः अभिप्रेता युक्त
तमा इति नैरन्तर्येण हि ते मच्चित्ततयाहोरात्रमतिवाहयन्ति अतो युक्त
तान् प्रति युक्ततमा इति वक्तुं २ ॥

आनन्दगिरिकृतटीका ३ ॥

किमनयोर्योगयोर्मध्ये सुशको योगो वा एकोति किम्वा सातात्म्योत्तहे
तुरिति विकल्प्य क्रमेणोत्तरं भगवानुक्तवानित्याह श्रीभगवानिति य
दि द्वितीयस्याविश्वयोगस्य बहुभाग्यत्वात् प्रश्न्यतेत्याह ये त्वक्षरेति
यथायथं तत्राह ये त्विति सर्वयोगेश्वराणां सर्वेषां योगमधितिष्ठतां यो
गिनामित्यर्थः विमुक्ता त्यक्ता रागाद्याख्या क्लेशा निमित्तभूता तिमिरदृ
ष्टिर्नानाज्ञानकृता दृष्टिरविद्या मिथ्याधीर्यस्य तमिति विशिनष्टि वि
मुक्तेति नित्ययुक्तत्वं साधयति अतीतेति तत्रोक्तो योऽर्थो मत्कर्मकृ
दित्यादि तस्मिन्निश्रयेणापनयोगमनन्तस्य नियमेनानुष्ठाने तेनेत्यर्थः
उपासते मयि स्मृतिं सदा कुर्वन्तीत्यर्थः उक्तोपासकानां युक्ततमत्वे
व्यनक्ति नैरन्तर्येणेति तदेव स्फुटयति अहोरात्रमिति अह्नि च रात्रौ
चातिमात्रमतिशयेन मामेव विषयान्तरविमुखाश्चिन्तयन्तीत्यर्थः २

स्वामिकृतटीका ४ ॥

तत्र प्रथमाः श्रेष्ठा इत्युत्तरं श्रीभगवानुवाच मयीति मयि परमेश्वरे सर्व
ज्ञत्वादिगुणविशिष्टे मन आवेश्यैकाग्र्यं कृत्वा नित्ययुक्ता मदर्थकर्मानु
ष्ठानादिना मन्निष्ठाः सन्तः श्रेष्ठया श्रद्धया युक्ता ये मामाराधयन्ति ते युक्तत
मा ममाभिमताः २ ॥

श्री॰
गी॰टी॰
द्वा॰
10

पैशाचभाष्यम् ४ ॥

श्री॰ मय्यावेश्येति मयिभगवतिसर्वकारणेविश्वरूपे २ ॥

रामानुजभाष्यम् ५ ॥

श्रीभगवानुवाच मयीति अत्यर्थमत्प्रियत्वेन मनो मय्यावेश्य श्रद्धयाप
रयोपेता नित्ययुक्ता नित्ययोगं कांक्षमाणा ये मामुपासते प्राप्यविषयं मनो
मय्यावेश्य ये मामुपासते ते युक्ततमा मताः मां सुखेनाचिरात्प्रा
प्नुवंतीत्यर्थः २ ॥

अभिनवगुप्तकृतटीका ६

माहेश्वर्यविषयो येषां समावेशो कृत्रिमस्तन्मयीभावस्ते युक्ततमा मम
तावदितिनेन प्रतिज्ञा क्रियते २ ॥

परमार्थप्रपा टीका ७

तत्र भगवानुत्तरयति मयीति द्वाभ्यां मयि परमेश्वरे सर्वज्ञत्वादिगु
णोपेते मन आवेश्य एकाग्रं कृत्वा नियमयुक्ताः मदर्थकर्मानुष्ठा
नादिनाभिनिष्ठाः संतः परया श्रद्धया आस्तिक्यबुद्ध्योपेतास्ते यु
क्ततमाः इति मे मताः २ ॥ ॥ ॥ ॥

वनमाली टीका ८

एवं पृष्टो भगवान्भक्तिमार्गोपासकानां श्रेष्ठत्वमाह मयीति मयि भ
गवति वासुदेवे परमेश्वरे परब्रह्मणि सकललक्षणसारभूतार्थे सगुणे य
मुक्तप्राप्ये मन आवेश्यानन्यशरणतया निरंतरं निःशेषप्रियतया च प्रवेश्य हि
गलरंगाश्रुवत्तन्मयं कृत्वा ये मामनंतकल्याणगुणं सर्वज्ञमीश्व
राणामपि महेश्वरं नित्ययुक्ता अनन्योपासनमननयुक्ताः श्रद्धया
परया प्रकृष्टया वासुदेवप्रसादाद्वासुदेव एव प्राप्य इत्यास्तिक्यशास्त्र
गुरूपदेशाद्दृढविश्वासरूपया उपेताः संतः उपासते श्रवणादिरूप
भक्त्या मन्वीत्यर्थमेवमामेवनेनेमन्वीयतितिरिक्तप्रयोजनहीनामतः
क्तास्ते युक्ततमा मे मम मता अभिमताः २ ॥

कृष्णवैजयन्ती टीका ९

एवमर्जुनेन पृष्टः कृष्णो भगवानुवाच मय्यावेश्येति मयि सर्वेश्वरेश्व
रे सर्वकारणकारणे सर्वोपास्यमूले सर्वप्राप्यरूपे भगवति श्रीकृष्णे म

र्थे प्रियत्वेन मनआवेश्यानन्यशरणतयानिरतिशयप्रियत
याच प्रवेश्य ये नित्ययुक्ताः सततं मद्योगकांक्षमाणाः परयाप्र
कृष्टया सात्विक्या श्रद्धयोपेतायुक्ताः संतो मां सकलकल्याण
गुणनिलयं योगिध्येयपदांबुजं नीलोत्पलदलश्याममेव वसुदेव
पुत्रं उपासते प्राप्यविषयमनस्त्वेन मां सेवंत इत्यर्थः ते युक्तत
माः शीघ्रमस्मत्प्रापकोपायिनो भवंतीति मे मम मताः अभिमता
यतस्ते सदा मदासक्तचित्ततया विषयांतरमुखा मामेव चिंत
यंतोऽहोरात्राणि निर्वाहयन्त्यत एव युक्ततमा अभिप्रेता ना
न्य इत्यर्थः २ ॥

## मधुसूदनी टीका

तत्र सर्वज्ञो भगवानर्जुनस्य सगुणविद्यायामेवाधिकारं पश्य
न्नुत्तमं प्रतिविधास्यति यथाधिकारं तारतम्यापेक्षानि च साध
नानि अतः प्रथमं साकारब्रह्मविद्यां प्ररोचयितुं स्तुवन् प्रथमाः
श्रेष्ठाः इत्युत्तरं मयि भगवति वासुदेवे परमेश्वरे सगुणे ब्रह्मणि
मन आवेश्य अनन्यशरणतया निरतिशयप्रियतया च प्रवेश्य
हिंगुलरंग इव जतु तन्मयं कृत्वा ये मां सर्वयोगेश्वराणामीश्वरं
सर्वज्ञं समस्तकल्याणगुणनिलयं साकारं नित्ययुक्ताः सततो
द्युक्ताः श्रद्धया परया प्रकृष्टया सात्विक्या उपेताः संत उपास
ते सदा चिंतयंति ते युक्ततमा मे मम मता अभिप्रेताः ते हि स
दा मदासक्तचित्ततया मामेव विषयांतरविमुखाः चिंतयंतोऽ
होरात्राण्यतिवाहयंति अतस्त एव युक्ततमा मम मता अभिम
ताः २ ॥

## सदानंदी टीका

अनयोर्योगयोर्मध्ये एकतरे हशकोऽस्तिकः योगावाप्त्तेसा
तान्मोत्तहेत्तरितिक्रमात् १ विकल्प्य भगवानेवं सर्वज्ञो भ
क्तवत्सल उत्तरं प्राह सगुणब्रह्मनिष्ठाप्रशंसया २ वासुदे
वे भगवति मयीशे परमेश्वरे सगुणे ब्रह्मणि स्वक्षमनन्यशार

णेमनः प्रवेश्यमन्मयंकत्वाये मांयोगेश्वरेश्वरं सर्वज्ञंसर्वक
ल्याणनिधिंसाकारमद्भुतं ध सात्विकयाश्रद्धयोपेतासदैवयुक्ता
निरंतरं चिंतयंतिनरांतेमेभिप्रेतायोगवित्तमाः सुशकोया
गप्रतेषांमनइत्याशयोहरिः २ ॥

नीलकंठी टीका ।

निर्गुणस्यदुष्प्रापतांकैवश्रेष्ठत्वंसूचयन्सगुणप्राशस्त्यंचशब्द
तोदर्शयन्श्रीभगवानुवाच मयीति मयिसगुणेब्रह्मणिमन
आवेश्यप्रवेश्ययेनित्ययुक्ताः सदायुक्तामांपरमेश्वरमुपासते
चिंतयंतिश्रद्धयाशास्तिकबुद्ध्यापरयासात्विकयाश्रवणपरमा
त्मायमाराधितोऽसंसारात्यिष्यतीत्येवंनिश्चयरूपयाश्रद्धया
उपेतास्तेमेममज्ञानीत्वात्मैवमेमतमितिज्ञानिनमात्मत्वेने
वपश्यतोमह्त्वेषपिकाहृण्यापात्यत्तपातवतः सर्वज्ञस्ययुक्तत
मामताः २ ॥

आनंदी टीका

एवंविज्ञानमपक्वपक्षमवलंब्य श्रीभगवानुवाच मयीति नि
त्यसदैवयुक्ताः संयमप्रकारेणसंयमभाजोतएव
मयिमनआवेश्यपरयाश्रद्धयायथोक्तफ।
लावर्णभावनयोपेतामांचतर्भु
जाद्याका ।

रेणाश्रद्धयात्तद्रूपं भजंते ते मे युक्ततमाः सर्वोपायत्वातिशयित्वात्तद्भुक्ति
मार्गज्ञा मताः ततमुक्तिफलेतिशयाः ।
२॥

एवं विज्ञाय एकतरपक्षग्राह्यान्यप्रति

## रामकंठीटीका

पादनार्थं भगवानुवाच ॥

तएवंविधायोगिनो युक्ततमा निरतिशयसमाधिभाजो मम मता अभिप्रेता
स्तानहं परमयोगिनो मन्ये नान्यानित्यर्थः केते ये मयि सकलवस्तुप्रका
शकानन्यप्रकाश्यपविन्यकाशैकस्वभावे मनोन्तःकरणमावेश्य तत्त्व
मापन्नं कृत्वा परया समस्तसंशयादिविच्छेदाद्दृष्टया श्रद्धया यथोक्तफ। नु ।
लसंभावनयोपेताः समन्विताः संतो नित्ययुक्ता नित्यं स्थूलसूक्ष्मसर्व।
१२।१।
भावानुवेधमयीभूताः तत्तत्त्वस्माद्यथोक्तसमाध्यवस्थिताः समुपा
सते स्वरूपप्रत्यवमर्शलक्षणया निरंतरया भक्त्या सेवंते
॥

एवं विज्ञमपकतरपक्षग्रा लासिकी

## [illegible]टीका

ह्यान्यप्रतिपादनार्थम् ॥

ये योगिनः परयात्युत्कृष्टया श्रद्धया नन्नभूतस्यापि समाधिलक्षणफ
लस्य संभावनया समन्विताः तथा नित्यप्रकाशानित्यमपरिच्छिन्नं काले
युक्ताः सततमस्यंतः संतः मयीश्वरे हृंता स्वरूपस्थानं स्याविशद्दिते नवत
रत्नवत्प्रविशद्धि ये मनो मननात्मकमंतःकरणमावेश्य तत्समापन्नं कृ
त्वा मामीश्वरात्मानमुपासते ध्यायंतीति तदुक्तं शिवोपनिषदि ध्याया का
शेनिलीनात्तः पद्मसंपुटमध्यगः अनन्यचेताः सभवेत्परे सोभाग्यमाप्नु
यादिति ते मम युक्ततमाः अनायासेन निरतिशयसमाधिभाजो मता निश्चि
ताः यत्नतेच प्रत्याहारायसंस्पर्शे विशेषोस्ति महानयम् योगिभ्यो भक्ति
भाजां यद्युत्थानेपि समाहिता इति
२॥

## पंचोलीटीका

द्वयोर्मध्ये सगुणोपासनस्य सकरत्वात्प्रत्यक्षं तत्त्व ब्रूते मयीति म
यि परमेश्वरे विश्वरूपे मन आवेश्य समाधाय मां सर्वयोगेश्वराणामी।
श्वरं सर्वज्ञं विमुक्तरागादिक्लेशानिमिरहार्हिये नित्ययुक्ता मत्कर्मकृदि

गी॰ निष्ठोकोक्तमार्गेणनित्यंवर्तमानाः परयाश्रद्धयाआस्तिक्यबुद्ध्याउ-
टी॰ पेतायुक्ताउपासतेतेमेममयुक्ततमाः सर्वदाममचिंतामममताअभि
ब्रां॰ प्रेताः २

12

रसगवीरससमिद्धोधिनी॥

तत्रप्रथमे साकारवस्तुनिष्ठाः श्रेष्ठाइत्युत्तरं श्रीभगवानुवाच मय्यावेश्येति मयिपरमेश्वरे मन आविश्य सर्वेश्वरावतारे भगवताउद्धकर्मैवानुष्ठितं तदेवास्माकंस्वधर्मइति तत्पालनमेव श्रेयइति परमेश्वरएव बुद्धतत्वंवेतेतिनिश्चयेनवत्सलमनः स्वस्वीकृत्यये भक्ताः पूर्वोक्ता नित्ययुक्ताः सन्त इमां पर्युपासते शुद्धकर्मानुष्ठानेनसेवंते शुद्धपरवेदवाक्यश्रद्धया परया समेतास्ते भक्तामे ममयुक्ततमाः श्रेष्ठामता अभिप्रीता मत्कृतकर्मवर्मानुसरणेन मेप्रियाइत्यर्थः २॥

मधुभाष्य

२॥

## भाषा अनुवाद टीका

तिन दोनो के बीच मे सगुण उपासना सुख साध्य है इस हेतु से भगवान सगुण उपासक भक्त को श्रेष्ठ कहते हुये उत्तर देते हैं कि सर्वज्ञत्व आदिगुण विशिष्ट परमेश्वर स्वरूप मेरे मे मन को एकाग्रकरिके श्रद्धापूर्वक मत्प्रीत्यर्थ कर्म अनुष्ठान करने से मेरेमे निष्ठ कहे युक्त होय जो हमारी आराधना करता है सोई हमारे मत से युक्ततम कहे अति श्रेष्ठ है सो तुम मत्प्रीत्यर्थ कर्म करो २ ॥

### दोहा

मामे दे मन मोहिको नित्य उपासत जोय श्रद्धापरमहि युक्त है
सो मो अतिप्रिय होय २

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते सर्वत्रग
मचिन्त्यं च कूटस्थमचलं ध्रुवं ३ ॥

## शाङ्करभाष्यं १

किमितरे प्रकृतमान् भवन्ति न किन्तु तान् प्रति यद्वक्तव्यन्तत् शृ-
णु ये त्वक्षरमनिर्देश्यमव्यक्तत्वाच्छब्दगोचरमिति न निर्देष्टुं श-
क्यते अतोऽनिर्देश्यमव्यक्तं न केनापि प्रमाणेन व्यज्यत इत्यव्यक्तं प-
र्युपासते परिसमन्तादुपासते उपासनं नाम यथाशास्त्रमुपास्यार्थ-
स्य विषयीकरणेन सामीप्यमुपगम्य तैलधारावत् समानप्रत्ययप्र-
वाहेन दीर्घकालं यदासनन्तदुपासनमाचक्षते अक्षरस्य विशेषणमा-
ह सर्वत्रगं व्योमवद् व्याप्यचिन्त्यं चाव्यक्तत्वादचिन्त्यं यद्धि करणगोच-
रं तन्मनसापि चिन्त्यं तद्विपरीतत्वादचिन्त्यमक्षरं कूटस्थं दृश्यमान-
गुणमन्तर्दोषं वस्तु कूटरूपं कूटसाक्ष्यमित्यादौ कूटशब्दः प्रसिद्धो लो-
के तथा चाविद्याद्यनेकसंसारबीजमन्तर्दोषं मायाव्याकृतादिशब्द-
वाच्यतया मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरं मम मायादु-
रत्ययेत्यादौ प्रसिद्धं यत्तत् कूटं तस्मिन् कूटे स्थितं तदध्यक्षतया
अथवा राशिरिव स्थितं कूटस्थमत एवाचलं यस्मादचलं तस्मात्
ध्रुवं नित्यमित्यर्थः ३ ॥

## आनन्दगिरिकृतटीका २

वक्ष्यमाणतदुपरिहारादिसूचकं प्रश्नपूर्वकं प्रकटयति किमित्यादिना
इतरेभ्यः फलतो विशेषाभावस्तुशब्दार्थः अव्यक्तत्वमनिर्देश्यत्वे हेतुरि-
त्याह अव्यक्तत्वादिति यतोऽव्यक्तमतोऽनिर्देश्यमिति योजना निरुपा-
धिकेऽक्षरे कथमुपासनेति पृच्छति उपासनमिति शास्त्रतोऽक्षरं ताव-
त्तदुपेत्यात्मत्वेनोपगम्योपासते तथैव तिष्ठन्ति हृणान्विदेकतानम-
नसात्मानमेव सदा भावयन्तीत्येतदिह विवक्षितमित्याह यथे-
ति अव्यक्तत्वमेवाचिन्त्यत्वे हेतुरित्याह यद्धीति कूटस्थशब्दस्या-
र्थत्वे वृद्धप्रयोगतः साधयति कूटरूपमिति आदिपदमन्तरा-
र्थं प्रकृते किन्तदृष्टं कूटशब्दितमित्याह तथा चेति अकृतीत्या
कूटशब्दस्यान्तर्दोषत्वे यदनेकस्य संसारस्य बीजत्वं निरूप्यमाणं ना-
नाविधदोषोपेतं तदिदं तदव्याकृतं मायान्तु प्रकृतिं मम मायेत्या

श्री॰
गी॰टी॰
द्वा॰

दौ मायाशबलितत्वेन प्रसिद्धमविद्यादि तदिह कूटशब्दितमित्यर्थः त
त्रावस्थानेनैकेन रूपेणेत्याशङ्कायामाह तदध्यक्षतयेति कूटस्थशब्द
स्य निःक्रियत्वमर्थान्तरमाह अचलमिति एवंभूतपरमेश्वरानन्तरविशेष
णद्वयप्रयुक्तिमाह अत एवेति ३ ॥

स्वामिकृतटीका ३

तर्हीतरे किं न श्रेष्ठा इत्यत आह ये त्विति द्वाभ्यां ये त्वक्षरं पर्युपासते ध्या
यंति तेपि मामेव प्राप्नुवंतीति द्वयोरन्वयः अक्षरस्य लक्षणम् अनिर्दे
श्यं शब्देन व्यपदेष्टुमशक्यं अतोऽव्यक्तं रूपादिहीनं सर्वत्रगं सर्वव्या
पि अव्यक्तत्वादेवाचिंत्यं कूटस्थं कूटे मायाप्रपंचे अधिष्ठानत्वेन स्थितं
अचलं वृद्ध्यादिरहितं अत एव ध्रुवं नित्यं स्पष्टमन्यत् ३ ॥

पैशाचभाष्यमटीका ४

ये त्विति अनिर्देश्यमीदृशं तदिति निर्देष्टुमयोग्यमव्यक्तं प्रत्यक्षादि
प्रमाणैरप्रतीयमानं कूटस्थः कूटस्थवत्तिष्ठतीति कूटस्थः ३ ॥

रामानुजभाष्यम्टीका ५

ये त्विति ये त्वक्षरं प्रत्यगात्मस्वरूपमनिर्देश्यं देहादन्यतया देवादिशब्दा
निर्देश्यं तत एव चक्षुरादिकरणाव्यक्तं सर्वत्रगमचिंत्यं देवादिदेहेषु
वर्तमानमपि तद्विसजातीयतया तेन रूपेण चिंतयितुमनर्हं अत एव
कूटस्थं सर्वसाधारणं तत्तद्देवादिसाधारणाकारासंबद्धमित्यर्थः अ
परिणामित्वेन असाधारणाकारात्स्वलक्षणान्न चलति न च्यवते इत्यचलं तत एव ध्रुवं नित्यं ३ ॥
अभिनवगुप्ती स्पष्टं ॥ परमार्थप्रपा टी ॥ तर्हीतरे किं न श्रेष्ठा इत्याह ये त्वि
ति ॥ ये त्वक्षरमनिर्देश्यं निर्देष्टुमशक्यं अत एवाव्यक्तमव्यक्तं च सर्वत्रग
व्यापकं अचिंत्यं चिंतितुमशक्यं कूटे मायाप्रपंचे अधिष्ठानत्वेन स्थितं
अचलं वृद्ध्यादिरहितस्वरूपे ३ ॥

वनमाली टीका ६

भक्तानामतिशयेन प्रकृतत्वं वक्तुमक्षरयोगेनोपासकान् प्रस्तौति ये त्विति
द्वाभ्यां यत्तदक्षरं गार्गीब्राह्मणाभिवदंत्यस्थूलमनण्वह्रस्वम
दीर्घमव्ययमित्यादिकमव्यक्तं प्राकृतस्थौल्यादिस्वभावरहितमक्षरमा
कल्पेन निर्देशानर्हत्वादनिर्देश्यं प्रसादं विना चक्षुराद्यगोचरत्वादव्यक्तं
सर्वत्रगं सर्वव्यापकं अचिंत्यं तर्काविषयानंतानाघटघटनापटीयः साम
र्थ्यं कूटस्थं कूटवन्निर्विकारमचलं परिणामशून्यं अत एव सदैकाकार

रूपं ध्रुवमित्येवमादिस्वामीष्टगुणालयं मामुपासते तेऽयोगिनस्तेप्रा
मुवंति मामेवेत्युत्तरेणान्वयः भक्तिमार्गानुवर्तिनो जडदृष्टयदयादिक
ष्टित्वाद्यो नेन गुणाभक्तिवर्द्धकत्वादुपास्यास्ते याश्च ते प्रागसकृदुक्त
त्वाद्भगवतेहनोक्ताः अष्टांगयोगिनां महत्त्विकं कर्तृ चिन्नं प्रकृतितः
पुरुषं विवेकं च ग्रहतां नां प्रत्यक्तत्वानिर्देश्यत्वादयो गुणा मुख्यतया
ध्येय भक्तिवर्द्धका अपि चिंत्या एव न तु मुख्यतया तोस्तत्वादय एव यो
गिनो भगवतोक्ता यथाभिमतध्यानाद्वा यदेवाभिमतं तदेव ध्यायेत्
तत्र लब्धस्थितिकमन्यत्रापि स्थितियदं लभत इति योगसूत्रभाष्योक्ते
रिति भावः ३ ॥

कुसुमवैजयन्ती टीका ४

ननु यद्येवं तर्हि मं प्रत्यगात्मानमुपासते तेषां कागतिरित्याशंक्याते
पि मामेव प्राप्नुवन्तीनात्र संदेहः किंत्वधिकतरक्लेशादेवेत्याह त्रिभिः
येत्वक्षरमिति येत्वक्षरं प्रत्यगात्मानमेवमेवमुपासते तेषामधि
कतरः क्लेशो भवतीति तृतीयेनान्वयः अक्षरं विनाशरहितं अनिर्देश्यं दे
हेंद्रियादिजडवर्गेभ्यो विलक्षणत्वादेवमामवादिशाहेतिनिर्देष्टुमश
क्यं यतोऽव्यक्तं चक्षुरादिकरणागोचरं सर्वत्रगं अणुरूपत्वेपि स्वाभा
विकेन स्वकीयविभुत्वानगुणेन देहेंद्रियादिजडवर्गव्यापनस्वभा
वे अचिंत्यं सहृद्रहितैस्तर्कै रहितैस्तर्कैश्चिंतयितुमशक्यं नेंद्रियाणि
नानुमानानीति श्रुतेः कूटस्थं कूटे देहादिजडसमूहे सद्धि सजातीय
तया स्वैनैव ज्ञात्राभिन्नज्ञानस्वरूपेण तिष्ठतीति कूटस्थं देवादिदेह
ध्रुवर्तमानमपि तत्र हि लक्षणतया तत्तदाकारासंवद्धमित्यर्थः के
चित्तु कूटं मिथ्याभूतमज्ञानं तत्कार्यं वा तस्याधिष्ठानतया तिष्ठतीति
कूटस्थमज्ञानतत्कार्याधिष्ठानमित्येतस्य व्याख्यां कुर्वंति तत्तुच्छं मिथ्या
भूताज्ञानस्याधिष्ठेयत्वासम्भवात् तथा हि अधिष्ठानभूतेज्ञानस्वरू
पेब्रह्मण्यारोपज्ञानस्य प्रचंडमार्तंडेन्धकारस्येवस्थितिर्न संभवति विरो
धित्वात् न च ब्रह्मविषयं ज्ञानमेव विरोधि न तु स्वरूपविषयमिति वा
च्यं तन्मतेहतेरेवमिथ्यात्वात् विषयज्ञानस्य कल्पनमप्यसंभवादि
त्यलं कुतर्कनिरासेः अचलं परिणामशून्यत्वेन स्वासाधारणज्ञात्राभि
न्नाहमर्थज्ञानाणुस्वरूपान्न चलति न च्यवते इत्यचलं अत एव ध्रुवं प
रमात्मासत्वान्नित्यम् ३ ॥

श्री॰
गी॰ टी॰
द्वा॰

15

निर्गुणब्रह्मविदपेक्षयासगुणब्रह्मविदोकोतिशयोयेनतएवयुक्ततम
त्वाभिमताःइत्यपेक्षायांनमेवातिशयेवक्तेनत्विरूपकान्निर्गुणब्रह्म
विदःप्रशंसतिद्वाभ्यां येत्वक्षरंमामुपासतेतेपिमामेवप्राप्नुवंतीतिद्वि
तीयश्लोकगतेनान्वयः सर्वेभ्योवैलक्षण्ययोतननायतत्शब्दः अक्षरंनि
र्विशेषंब्रह्मवाचकत्वेनब्राह्मणेप्रसिद्धं तस्यसमर्थनायसप्तविशेष
णानिअनिर्देश्यंशब्देनव्यपदेष्टुमशक्यं यतःअव्यक्तंशब्दप्रवृत्तिनि
मित्तैर्जातिगुणक्रियासंबंधैःरहितं जातिगुणक्रियासंबंधोवाहारी
कृत्यशब्दप्रवृत्तेर्निर्विशेषप्रवृत्त्ययोगात् अतोजात्याद्यरहितत्वमत
एवाहसर्वत्रगं सर्वव्यापिसर्वकारणमतोजात्यादिशून्यंपरिच्छिन्नस्य
कार्यस्यैवजात्यादियोगदर्शनात् आकाशादीनामपिकार्यत्वाभ्युपग
मात् अतएवाचिंत्यंशब्दवृत्तेरिवमनोवृत्तेरपिनविषयःतस्यापिप
रिच्छिन्नविषयत्वात् यतोवाचोनिवर्तंतेअप्राप्यमनसासहेतिश्रुतेः
तर्हिकथंतंत्वौपनिषदंपुरुषंपृच्छामीतिदृश्यतेत्वग्र्ययाबुद्ध्येतिच
श्रुतेःशास्त्रयोनित्वादितिसूत्रेचउच्यते अविद्याकल्पितसंबंधेनश
ब्दजन्यायांबुद्धिवृत्तौचरमायांपरमानंदबोधरूपेशुद्धेवस्तुनिप्रति
बिंबितेअविद्यातत्कार्ययोःकल्पितयोर्निवृत्त्युपपत्तेःउपचारेणवि
षयत्वाभिधानात् अतस्तत्रकल्पितमविद्यासंबंधंप्रतिपादयितुमा
हकूटस्थंयन्मिथ्याभूतंसत्यतयाप्रतीयतेतत्कूटमितिलोकेउच्यते
यथाकूटकार्षापणःकूटसाक्षित्वमित्यादौ अज्ञानमपिमायाख्यंसह
कार्यप्रपंचेनमिथ्याभूतमपिलौकिकैःसत्यतयाप्रतीयमानंकूटंत
स्मिन्नाध्यासिकेनसंबंधेनाधिष्ठानतयातिष्ठतीतिकूटस्थमज्ञान
तत्कार्याधिष्ठानमित्यर्थः एतेनसर्वानुपपत्तिपरिहारःकृतः अतए
वसर्वविकाराणामविद्याकल्पितत्वात्तदधिष्ठानेनास्तिवैतथ्यंतेनिर्वि
कारमित्याह अचलंचलनंविकारःतद्रहितमचलंअतएवध्रुवंअप
रिणामिनित्यं एतादृशंशुद्धंब्रह्मयेमांपर्युपासते श्रवणेनप्रमाण
गतामसंभावनामपोह्यमननेनचप्रमेयगतां अनेनतद्विपरीतभा
वनांनिहत्यध्यायंतिविजातीयप्रत्ययतिरस्कारेणतैलधारावद
विच्छिन्नसमानप्रत्ययप्रवाहेणनिदिध्यासनसंज्ञकेनध्यानेनविष
यीकुर्वंतीत्यर्थः [illegible]
[illegible] ६ ॥

द्वितीयश्लोकेनदानस्यवक्ष्यमाणत्वयाधुना नास्तिब्रह्मव्यमानत्वे
त्याहश्रीमद्रमापतिः येत्वक्षरंनिर्विशेषंमांनिर्गुणंपर्युपासते
मामेवप्राप्नुवंतीतिद्वितीयेनान्वयोस्त्यपि वैलक्षण्यंचसर्वेभ्य
स्त्वशब्देनात्रसूच्यते अनिर्देश्यमशक्यंयद्व्यपदेष्टुंगिरान्तरं २
यतोव्यक्तंगिरांहेतुर्हिहेत्वनातिगुणोक्तितो गुणजातिक्रियायो
गेह्यरीकृत्यगिरांयतः ब्रह्मनिर्निर्विशेषत्वनास्तितेषामभा
वतः अतोजात्यादिराहित्यमित्याहरमापतिः सर्वत्रगं।
यतोव्यापिसर्वकारणमद्वयं परिछिन्नस्यकार्यस्यजात्यादि
योगादर्शनात् अपरिछिन्नविद्यानोनास्तितद्योगइत्यतः
अचिंत्यंतन्मनोवृत्तेरप्यगोचरमक्षरं ७ मायातत्कार्यरूप
यत्कूटेपिष्ठानभावतः निष्प्रपंचमसिकेनैवसंवेद्येनावि
कारिच ८ कूटस्थत्वेनसर्वेषांदोषाणांवारणंकृते अतो।

॥ ॥

मायाविकाराणामधिष्ठानतयाचले ५ अतएवध्रुवेनित्ये
परिणामविवर्जिते स्वरूपमेतादृशंब्रह्मवेदान्तश्रवणादिभिः
६ उपास्यार्थंयथाशास्त्रंविषयीकृत्यसंततं तत्प्रत्ययसं
तत्यातैलधारावदासनं ९ यदस्त्युपासनंतेननिदिध्यास
नसंज्ञिना साक्षात्कुर्वंतिमांप्रत्यगभिन्नंविद्वत्सेवलं ॥ ३

॥ ॥

एवमुपासकोत्तमानुक्त्वाव्यक्तविदांतानितोदौलेभ्यः श्लोकद्वयेनाह
येत्विति तुशब्दः सगुणाद्वैलक्षण्यार्थः अक्षरं यत एतद्वै तदक्षरं गार्गि ब्रा
ह्मणा अभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमित्यादिश्रुत्युक्तं सर्वधर्म
शून्यं निरूपितं अत एवानिर्देश्यं निर्दिष्टमशक्यं वाचा अव्यक्तं च वा
ङ्मनोगोचरत्वादुद्देश्यविधेयशून्यमर्थः तथा च श्रुतिर्यतो वाचो निव
र्तंते अप्राप्य मनसा सहेति ब्रह्मणो वाङ्मनसातीतत्वं दर्शयति प
र्युपासते सर्वप्रकारेणोपासते उपासनमिहानात्मनामदर्शनमेव
यथोक्तं अनात्मादर्शनेनैव परमात्मानमुपास्महे इति ननु तर्हि वे
विषयस्य शून्यकल्पस्य सत्त्वे किं मानमित्यत आह सर्वत्रगमिति सत्ता
रूपेण स्फुरणरूपेण च सर्वत्रगतं यत्सत्तया सर्वं सत्तावद्भवति क
र्येन स्यासत्त्वं वाच्यमिति भावः नन्वेवं तार्किकाभिमतं सत्तासामान्य
मेकं स्यात् नहि घटः सन् पटः सन्निति सर्वत्रानुगतेन रूपेण इत्या
शंक्याह अचिंत्यमिति सत्तासामान्यं हि अत्यन्तं तदपि ब्रह्मसत्तानु
वेधेनैवात्मानं लभते न स्वतः सिद्धं सामान्यं सत्त्वाजातिः सती घटत्व
सदिति प्रत्ययात् सामान्यस्य सदिति प्रत्ययगोचरत्वेन नन्वस्य सत्ता प
व्यापदार्थत्वमेव न स्यात् तस्मात्सर्वाधिष्ठानभूतं ब्रह्मरूपादिही
नत्वाच्चिंतयितुमशक्यं हेतेनस्य सर्वगतत्वेन प्रत्यक्षगोचरत्वमि-
त्यर्थः ननु सन्मात्रादिति प्रत्ययस्यान्यथाप्युपपत्तेः सत्तासामान्यवा
दिनेव प्रतीतेनाधिष्ठानभूतं ब्रह्म न साधयितुं शक्यमत आह कूट
स्थमिति वस्तुतोऽसदपि सदिवावभासमानं कूटं यथा कूटकार्षाप
णं कूटतुलेति तद्वत्कूटः अहंकारः प्रतीत्यभेदेन भासमानत्वे सति
कादाचित्कत्वाद्योगाद्यभेदेन कदाचिद्भाति सततं मिथ्याकल्पितो य
था रज्जूरगस्तथा वायमहंकारो मिथ्यात्वात्कूटं तत्र तिष्ठति
तद्भासकत्वेनेति कूटस्थं चैतन्यं अहमनुभवे हि अहंकारो हि अप
तया भाति तद्भासकं च चैतन्यं ततोऽन्यत् यथा घटभासको दीपो घटा
दन्यस्तद्वत् एतेन नित्यापरोक्षत्वं ब्रह्मणः साधितं नन्वहमनुभ
व एवात्मविषयोऽस्तोऽहमर्थ एवात्मा न ततोऽन्य आत्मास्तीत्याशंक्या
ह अचलमिति अहमर्थो हि सावीडः स्त्रीपरिणामाविर्भावतिरो

श्री॰
गी॰ टी॰
टा॰

17

भावशीलत्वात्संचलः आत्मा तु न तथा तस्य तथात्वे ऽनिर्मोक्षापत्तेः
व्रत्वैकल्पवद्दुःखादिधर्मिणआत्यंतिकदुःखनाशस्यमोक्षस्यधर्मिना
शमंतरेणासंभवात् घटेयावद्रूपनाशादर्शनात् आत्मनश्चिलोभा
वेच जगदांध्यप्रसंगेन रूपाभावेपितस्यस्वात्मसाक्षित्वेनाविर्भू
तस्वरूपत्वान्नाशि अन्यथाहमोऽस्पितस्यसर्वमहमस्वाप्समितिप
रामर्शायोगात् न तु स्वप्रभो सन्नप्यात्मा न प्रकाशेन तत्प्रकाशकस्य
मनःसंयोगस्याभावात् कर्त्रा व्याप्रियमाणे हि करणे क्रियां साधयति
न च स्वप्रभो करणव्यापारोऽस्ति तस्मान्मलवासनादेवात्मा स्वप्रभोऽज्ञाना
दिगुणहीनोऽप्रकाशमानो भवेत्याशंक्याह ध्रुवमिति ननु आत्मा किंस
त्तामात्रेणायस्कांतवत्करणानि प्रवर्तयति उत व्यापाराविष्टः सन् ना
द्यः दृष्टापत्तेः त्वन्मते च आत्मनः कर्तृत्वासिद्धेः नांत्यः अनित्यत्वापत्तेः
व्यापारो हि स्पंदः स च परिच्छिन्नस्यैव संभवति न विभोः विभुत्वं ह्यात्म
नामभ्युपगमात् मध्यमपरिमाणत्वे च घटादिवदनित्यतापत्तेः तस्मा
न्ध्रुवं अप्रच्युतस्वभावमक्षरमित्यर्थः ३ ॥

आनंदटीका स्पष्टार्थम् ३ अत एवाव्यक्तोपासने
दुष्करत्वमाह ॥

रामकंठीटीका

+ तदेवं कर्मयोगिनामेव योगवित्तमत्वनिश्चयोऽनेन प्रतिपादितो योगंपतरोपायानामायासाभ्युपगमपूर्वं दुष्करत्वादिति प्रतिपादनेनावरत्वमेव प्रतिपादयितुमाह ॥

+ ये तु ये पुनर्योगिन इंद्रियग्राममवाप्याभ्यंतरेंद्रियसमूहं संनियम्य सम्य
गप्रमत्ततया नियम्य सर्वविषयेभ्यः प्रतिषिध्य मामनुपासते कीदृशम
क्षरमव्यक्तं च प्राग्व्याख्यातस्वरूपमत एवानिर्देश्यमिदंतावेदेयसम
स्तसंवेद्यभावविलक्षणत्वान्निर्देष्टुमशक्यं वाक्पथातीतं तथा सर्वत्र
गं सर्वव्याप्यावतिष्ठंतमचिंत्यं बुद्धिगोचरातीतं तथा परमार्थनित्य
त्वात्कूटस्थं निरुपमत्वाविनश्वरैकस्वभावनिष्ठमत एवाचलं ध्रुवं
नत्यपायपर्वनादिकूटस्थपदार्थवच्चलनलक्षणेनोपप्लवेनात्यंता
भावलक्षणेन वा नाशेन कदाचित्संयुज्यते ३ ॥ ॥ ॥ ॥

लासिकी टीका ॥ अनंतरपक्षस्य प्रयासबाहुल्ये
नावरत्वं प्रतिपादयति ॥ स्पष्टार्थम् ३ ॥
अस्यार्थ इम श्लोके

पंचोलीटीका

तर्हि निर्गुणोपासकाः किं न श्रेष्ठा इत्यत आह येत्विति द्वाभ्यां तु श
नःयद्दः इंद्रियग्रामं इंद्रियसमुदायमुपसंहृत्य सर्वत्र सर्वस्मिन्काले
इष्टानिष्टप्राप्तौ समबुद्धयः संतः अनिर्देश्यं शब्दागोचरमव्यक्तं प्र
माणागोचरं सर्वत्रगं व्योमवत्व्याप्तं सर्वव्यापिनमचिंत्यमव्यक्तं मामे

वकूटस्थं कूटायां सत्यां अंतःसंसारदोषवत्त्वां वहिर्गुणवदाभासमा
नायामविद्यायां स्थितं अथवा कूटमिव राशिरिव स्थितमत एवाचलं
चलनवर्जितं ध्रुवं नित्यमक्षरं ब्रह्मोपासते पर्युपासनं कुर्वते ३

रणवीरसमिद्धोधिनी॥

पूर्वेषामतिप्रायं वक्तुमितरान्स्तौति द्वाभ्यां ये त्वक्षरमुपास
ते तेपि मामेव प्राप्नुवंतीति द्वितीयश्लोकेनान्वयः तत्राहुः पूर्व
भ्योवैलक्षण्यद्योतनार्थः येत्वक्षरं निर्गुणं ब्रह्म तस्य विशेषणा
न्याह अनिर्देश्यमिति निर्दिश्यमाकरते अत्यनिर्देश्यं यतस्तदव्यक्तं
शब्दप्रवृत्तिनिमित्तजातिगुणक्रियासंबंधरहितं जात्यादिरहि
त्यमेवाह विशेषणैः सर्वत्रगमिति सर्वव्यापि अतो जात्यादिसत्त्वे
परिच्छिन्नस्यैव कार्यस्य जात्यादियोगात् तत एवाचिंत्यं बाह्यकरण
गोचरं तन्मनसापि चिन्त्यं तद्विपरीतत्वादचिंत्यं कूटस्थमिति द
श्यमानगुणमंतर्दोषवत्त्वं कूटं यथा कूटकार्षापणः कूटसा
क्षित्वमिति तथा चाज्ञानमपि मायाख्यं सदसत्कार्यप्रपंचेन मि
थ्याभूतमपि लौकिकानां सत्यायमानं कूटं तस्मिन्नध्यासिकेन
संबंधेनाधिष्ठानतया तिष्ठतीति कूटस्थमज्ञानतत्कार्याधिष्ठान
मित्यर्थः ३॥

मधुभाष्य

येत्वित्यादिना अनिर्देश्यत्वं चोक्तं भगवते माधुस्याः अप्रतर्क्य
इत्निर्देश्यपादिति केशापि निश्चय इति ईश्वरस्त्वेदं वषा हे नोक्तः
देवमन्येपुरे अन्यत्र उक्तं च सामवेदे कौषीयणश्रुतौ नासदासी
न्नो सदासीत्तदानीमिति नमहाभूतं नोपभूतं तदासीदित्याद्यन्य
तम आसीत्तमसा गूढमग्रे इति तमोऽस्य व्यक्तमजरमनिर्देश्य
मेषा एव प्रकृतिरिति सर्वेणाः चिन्त्यादि लक्षणवमा तथा
हिमोत्तयमे नमायगणगणाप्रथादजराद्तीद्रियाद्यथास्याद्

संभवतः असत्यादहिंसालक्षणामाहितीयप्रकृतिप्रोक्षादवैराद
हंमादमगादद्वगादमूर्तितः सर्वस्याः सर्वकर्तृः प्राप्ततनमस
इति आसीदितितमोभूतमप्रज्ञातमलक्षणं अप्रतर्क्यमविज्ञे
यं प्रसुप्तमिव सर्वत इति वा मनेः कूटस्थोऽक्षर इति वक्ष्यति कूटे
आकाशे स्थिता कूटस्था आकाशे संस्थिता वेषा ततः कूटस्थ
ता मतेति मूर्वेदाखिलेषु सा सर्वगा निश्चला लोकयोनिः सा वा
च्याविरंजस्केति सा मवेदे गोतमप्रणीतायां कथं तद्विज्ञाप
सकानां ज्ञातमन्त्रमित्यत आह ३॥

भाषा अनुवाद टीका

और अक्षर ब्रह्मका लक्षण स्वरूप कहते हैं कि ब्रह्म अनिर्देश्य अर्था
त् यह है ऐसा है इस कहनेके अयोग्य है क्यों कि अव्यक्त कहे रू
पादि रहित है औ सर्व व्यापी तथा निराकार होनेसे अचिन्त्य औ कू
टस्थ अर्थात् कूट जो माया प्रपञ्च कहलाए तिसका अधिष्ठान क
हे आश्रय रूप स्थित है और अचलकहे व्यापार रहित तथा ध्रुव
कहे अचल नित्य हानि वृद्धि शून्य है तिन चारि के श्लोक का अर्थ ए
क साथ है ३ ॥

दोहा

अक्षर अलख अव्यक्त जो ताकों भजहि जोय सर्वग अचिंत अच
लध्रुव कूटस्थ जो होय ३॥

19

सन्नियम्येंद्रियग्रामंसर्वत्रसमबुद्धयः तेप्राप्नु
वंतिमामेवसर्वभूतहितेरताः ४ ॥

शांकरभाष्यं

सन्नियम्येति संनियम्य सम्यक्नियम्य संहृत्य इंद्रियग्रामं
इंद्रियसमुदायं सर्वत्र सर्वस्मिन्कालेसमबुद्धयः समातु॰
ल्याबुद्धिर्येषामिष्टानिष्टप्राप्तौ तेसमबुद्धयः ते य एवंवि
धाः तेप्राप्नुवंति मामेव सर्वभूतहितेरताः न तेषां वक्त
व्यं किंचित् मांते प्राप्नुवंति इति ज्ञानीत्वात्मैव मेमतमि
त्युक्तत्वात् नहिभगवत्स्वरूपाणां सतां युक्ततमत्वमयुक्त
तमत्वं वा वाच्यं ४ आनन्दगिरिकृतटीका

कथमक्षरमुपासते तदुपासनेवा किंस्यादिति तदाह
सन्नियम्येति तत्राह हर्षविषादरागद्वेषादिरहिता सम्य॰
क्ज्ञानेनाज्ञानस्यापनीतत्वात् परस्परापेक्षयोरसम्भ
वमविवक्षित्वाह ते यइति सर्वेभ्यो भूतेभ्योहितमेव चि
न्तयन्तस्तदेवाचरन्ति ज्ञानवंतो यथाज्ञानस्यभगवत्॰
प्राप्तेरर्थसिद्धत्वादनुवादमात्रमित्याह नत्विति ज्ञा॰
निनोभगवत्प्राप्तिः सिद्धेत्यत्रप्रमाणमाह ज्ञानी॰
त्विति ज्ञानवतांभगवत्प्राप्तौतएवयुक्ततमावक्तव्याः कथं
सगुणब्रह्मोपासकान् युक्ततमानुक्तवानसीत्याशंक्या॰
ह नहीति ४ ॥ स्वामिकृतटीका

ननुचतेपिमामेवप्राप्नुवंतीति तर्हीतरेषांयुक्ततमत्वंकु
तइत्यपेक्षायांक्लेशाक्लेशकृतंविशेषमाह ४ ॥

पिशाचभाषाटी॰ स्पष्टार्थम् ४॥

## रामानुजभाष्य

सन्नियम्येति सन्नियम्येंद्रियग्रामंसर्वेभ्यःस्वव्यापारेभ्यःस
म्यक्नियम्य सर्वत्रसमबुद्धयः सर्वत्रदेवादिविषमाकारेष्व
वस्थितेष्वात्मसुज्ञानैकाकारतयासमबुद्धयः ततएवस
र्वभूतहितेरताः सर्वभूताहितरतत्वमात्मनोदेवादिविषमा
काराभिमाननिमित्तंयएवमक्षरमुपासते तेपिमांप्राप्नुवंत्ये
व मत्समानाकारमसंसारिणमात्मानंप्राप्नुवंत्येवेत्यर्थः
ममसाधर्म्यमागताइतिवक्ष्यते श्रुतौचनिरंजनःपरम
साम्यमुपैतीति तथाक्षरशब्दनिर्दिष्टात् कूटस्थादन्य
त्वंपरस्यब्रह्मणोवक्ष्यते कूटस्थोक्षरउच्यते उत्तमःपुरुष
स्त्वन्यइतिअक्षरविद्यायांतु अक्षरशब्दनिर्दिष्टंपरमेव
ब्रह्मभूतयोनित्वादेव ४ ॥

## अभिनवगुप्तकृतटीका

येत्वक्षरंब्रह्मोपासते आत्मानंसर्वत्रगमित्यादिभिर्विशेषणै
रात्मनःसर्वैश्वर्यमारोप्यते अतोब्रह्मोपासका अपि
मामेवयद्यपियांतितथाप्यधिकतरस्तेषांक्लेशः आत्म
निकिलापहतपाप्मत्वादिगुणाष्टकारोपंविधायपश्चा
त्तमेवोपासतइतिस्वतःसिद्धगुणग्रामभगवतिमणीश्वरेय
त्नसाध्येस्थितेपिद्विगुणमायासंविंदंति ४ ॥

## परमार्थप्रपाटीका ॥

सर्वत्रसमदर्शिनःपुरुषाः इंद्रियग्रामंसन्नियम्य यदुपा
सते तेमामेवप्राप्नुवंति उभयोःफलेविसंवादोनास्तीत्यर्थः ४

## वनमालीटीका

एतेषांयमनियमादिसाधनान्यमेवदर्शयति संनियम्येति
इंद्रियग्राममिंद्रियसमूहं विषयेभ्योनिवर्त्यसर्वत्रसमबु
द्धयः सर्वभूतेषुरागद्वेषरहिताः इंद्रियदेवावाह्येंद्रिया
णांतरिंद्रियस्यमनसोपिग्रहणंतन्नियमनेचसमाधितेन
योगेनभवतीति सन्नियम्येत्यनेनसमाधिनायोगीभिप्रेत
इतिसूचितं सर्वभूतहितेरताः सर्वभूतानांनिरुपाधि
कोपकारेरतास्तेमांप्राप्नुवंत्येवव्याख्यातेरेवाक्षरत्वादयो
धर्मास्त्विन्यहस्तौजीवेपिचसंतीति तदुपासकाअपिमां
प्राप्नुवंत्येवेत्यर्थः ४ ॥

## ज्ञानमवैजयन्ती टीका

तस्मिन्नक्षरोपासनेकोवाविधिरित्यपेक्षायामाह सन्निय
म्येति इंद्रियग्रामंश्रोत्रादिकरणसमूहंशब्दादिविषयसं
चारेभ्यस्तद्व्यापारेभ्यस्तन्नियमात्याहृत्यएतेनशमदमा
दिसाधनसम्पत्तिरुक्ता ननुविषयभोगवासनायांसत्या
मिंद्रियाणां ततोनिवृत्तिःकथंस्यादितिचेत्तत्राह सर्व
त्रसमबुद्धयःसर्वत्रसुहृन्मित्राद्युदासीनादिषुसमबु
द्धयस्तुल्यदृष्टयःयद्वासर्वत्रदेवमानवादि विषमा
कारेष्ववस्थितेष्वात्मस्वज्ञानैकाकारतयातुल्यदृष्टयः
यद्वासर्वत्रचिदचिद्वस्तुष्ववस्थितेब्रह्मणिबुद्धिर्मतिर्येषां
तेब्रह्माधिष्ठानतयातेषुद्वेषरहिताः अतएवसर्वभूत
हितेरताःसर्वेषांभूतानांप्राणिनांहितेचउपकारेरताः
सर्वेषांप्राभूयादित्यनुकूलसंकल्पवंतः एवंस्वात्मना
त्मानुकृतिपूर्विकायांमदर्पितकर्मलक्षणायांममभक्तौ

गी॰ येप्रवर्त्तंतेतेपिमांपरमेश्वरंप्राप्नुवंत्येदमत्समानाकारम
टी॰ संसारिणमात्मानंप्राप्नुवंत्येवात्रनास्तिसंशयइत्यर्थः निरं
द्वा॰ जनःपरमंसाम्यमुपैतीतिश्रुतेः ममसाधर्म्यमागताइतिव
क्ष्यते नन्वक्षरशब्दनिर्दिष्टंपरंब्रह्मत्वंजीवात्मानंकथंव
दसीतिचेत्सत्यंअक्षरविद्यायांयदक्षरशब्दनिर्दिष्टंतत्प
रंब्रह्मैवअत्रतुअक्षरशब्दनिर्दिष्टात्कूटस्थात्परस्यब्र॰
ह्मणोऽन्यत्वमग्रेवक्ष्यते द्वाविमौपुरुषौलोकेक्षरश्चा
क्षरएवच क्षरःसर्वाणिभूतानिकूटस्थोक्षरउच्यते उ
त्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतइत्यादिना ४ ॥

मधुसूदनी टीका

कथंपुनर्विषयेंद्रियसंयोगेसतिविजातीयप्रत्ययति
रस्कारश्चतत्राह सन्नियम्यस्वविषयेभ्यउपसंहृत्यइंद्रि
यग्रामंकरणसमुदायं एतेनशमदमादिसंपत्तिरुक्ता
विषयभोगवासनायांसत्यांकुतः इंद्रियाणांततोनिवृ
त्तिस्तत्राह सर्वत्रविषयेसमातुल्याहर्षविषादाभ्यां॰
रागद्वेषाभ्यां
चरहि
ताम
नियै ॥

यो सम्यग्ज्ञानेन तत्कारणस्याज्ञानस्यापनीतत्वाद्विषयेषु दोषद-
र्शनाभ्यासेन स्पृहाया निरस्तत्वाच्चातेः सर्वत्र समबुद्धयः एतेन व-
शीकारसंज्ञा वैराग्यमुक्तं अत एव सर्वत्रात्मदृष्ट्या हिंसाकारणद्वे-
षरहितत्वात्सर्वभूतहिते रताः अभयं सर्वभूतेभ्यो मत्तः स्वाहेति मं-
त्रेण दत्तसर्वभूताभयदक्षिणाः कृतसंन्यासा इति यावत् अभयं स-
र्वभूतेभ्यो दत्वा संन्यासमाचरेदिति स्मृतेः एवंविधाः सर्वसाधनसं-
१सक्तः पन्नाः स्वयं ब्रह्मभूताः निर्विचिकित्सेन साक्षात्कारेण सर्वसाधनफ-
लभूतेन मामक्षरं ब्रह्मैव ते प्राप्नुवंति एवं मामपि मद्रूपा एव संतो अ-
विद्यानिवृत्त्या मद्रूपा एव तिष्ठंतीत्यर्थः ब्रह्मैव सन्ब्रह्माप्येति ब्रह्म
वेद ब्रह्मैव भवतीत्यादिश्रुतिभ्यः इहापि वक्ष्यति ज्ञानी त्वात्मैव मे मतमि-
त्युक्तं [illegible] ४ ॥

सदानंदी टीका ॥

विषयेंद्रियसंयोगे सति विक्षेपकारणे कथं पुनर्विजातीयप्रत्य-
यानां तिरस्कृतिः १ अत आहेंद्रियग्राममनुपसंरुध्य सर्वतः उक्ता
शमादिसंपत्तिरेतेन स्वविपश्चितां २ सति भोगाभिलाषस्यादि-
द्रियाणां न संयमः अतः सर्वत्र भोगेष्वल्पायेषां मतिः सदा ३
२त् भूत्या हर्षविषादाभ्यां रागद्वेषोज्झिता मतिः सम्यग्ज्ञानेन तद्धेतोर २त्
ज्ञानस्य विनाशनात् ४ विषयेष्वनुराग्यल्पदोषदृष्टेर्वलात्स्वयं
अभिलाषनिवृत्तेः स्यादिंद्रियाणां सुसंयमः ५ एतेनैव वशीकार
संज्ञं वैराग्यमीरितं अत एवात्मदृष्ट्यैते हिंसाकारणवर्जिताः ६
सर्वदा सर्वभूतानां हित एव रता भुवाः अभयं सर्वभूतेभ्यो मत्तः स्वा
हेति मंत्रतः दत्ता यैः सर्वभूतेभ्योऽप्यभयात्मकदक्षिणा एतेन कृत-
संन्यासाः स्मृता सिद्धाः प्रकीर्तिताः अभयं सर्वभूतेभ्यो दत्वा संन्या
समाचरेत् सर्वसाधनसंपन्नाः संत एवंविधा जनाः ब्रह्मभूताः स्व
यं साक्षात्कारेण फलरूपिणा मामक्षरं परं ब्रह्म शुद्धमेवाप्नुवंति
ते ९ प्रागपि स्वात्मभूता मे विद्याहान्याद्वयेमयि तिष्ठंतीत्याशयो
विष्णोः श्रीमद्भगवतो हरेः ॥ ४ ॥

नीलकंठी ॥

एवंविधमक्षरं कथमुपासनीयमित्यत आह संनियम्येति सर्व

श्री॰
गी॰टी॰
टा॰

22

त्रकाले सर्वदा एतेन ध्यानस्यैव नैरंतर्यमुक्तं इंद्रियग्रामं समनस्कानी
न्द्रियाणि संनियम्य एकीभावेनात्मनि वशीकृत्वा स्वकारणे प्रविला
प्येत्यर्थः समा उच्चावचस्पृहीना बुद्धिर्येषां ते समबुद्धयो ये भवंति ते पि
मामेव निर्विकल्पं परं ब्रह्म परोक्षं प्राप्नुवंति श्रुतिश्च यदा पंचा
वतिष्ठंते ज्ञानानि मनसा सह बुद्धिश्च न विचेष्टति तामाहुः परमां
गतिमिति सर्वभूतहिते रता इत्यनेन सर्वभूताभयदानेन संन्या
सोपि ध्यानांगमिति विधीयते ४ ॥

आनंदीटीका

अचिंत्य अनाद्यस्य स्थूलमहत्त्वमदीर्घमित्यादिश्रुतिप्रतिषिद्धरूपादि
कम् सर्वत्र कार्यकारणात्मिके सर्वस्मिन्वस्तुनि सदा मां सदात्म्यैक्य
दर्शनान्निर्विशेषा बुद्धिर्येषाम् अत एव सर्वभूतेरताः इंद्रियग्रामं सं
नियम्य समाहितचित्ताः ये मामव्यक्तं निराकारं भजन्ते ते पि मामेव
प्राप्नुवन्ति न तत्प्राप्त्युपर्यायो वा भूमिकायां तिष्ठन्तीत्यर्थः ४ ॥

रामकंठीटीका

कीदृशाः संत एवंविधे मामुपासते सर्वत्र समबुद्धयः सर्वस्मिन्व
स्तुनि मत्स्वरूपैकदर्शित्वात्समा निर्विशेषा बुद्धिर्येषां ते तथोक्ताः
समबुद्धित्वादेव सर्वभूतानामेव हिते रताः सर्वस्यात्मत्वेन प्रतिप
न्नैर्न क्वचिद्द्वेषरागकालुष्यमनुभवंतो नेन विशेषणद्वयेन विनाक्षु
समाधेरनिष्पत्तिः प्रतिपादिता नहि सर्वेसाम्यदर्शनं ऋते रूढो यो
गी निष्पन्नः इत्युच्यते एवंविधा योगिनो ये मामुपासते ते सत्यं मा
मेव प्राप्नुवंति यथोक्तयेति कृतं च तया निष्पन्नसमाधीनां मत्स्वरू
पसमापत्तिरेव समाधिफलं तेषां नान्यत [illegible] ४ ॥ ॥

लाक्षिकी [illegible]टीका

तः एतांतरे ये योगिनः सर्वभूतहिते रता मे आदिसंस्कारयुक्ताः सर्वत्र
देहे समा निर्विशेषा बुद्धिरात्मविषया बोधः येषां ते ईदृशाः संतः इंद्रिय
ग्रामं बाह्याभ्यान्तरं करणवर्गं संनियम्य सम्यग्निरुध्य समाधिकाली
नमंतरमात्मानं स्वरूपासंचलनेन पश्यंत्या विषयं पर्युपासते ध्यायंति
तथा चोपदिष्टं शिवोपनिषदि सर्वदेहेष्वात्ममयं हि जगद्दृपरिभावये
त् युगपन्निर्विकल्पेन मनसा परमो भवतीति कीदृशं तमनिर्देश्यं वे।

त्वर्थानिर्देश्यमशब्दाम् अतोऽव्यक्तं कूटस्थमनाभासमानम् तथा सर्वत्र
गं सर्वदेहं व्याप्य तिष्ठन्तमपि अचिन्त्यं चिन्तयितुमशक्यं मनसामगोचरं
अतः कूटस्थं मायातिनया वस्थितम् अचलं स्वरूपपरिणामरहितम् ध्रुव
मपरिणामित्वान्नित्यं ते च मामेव प्राप्नुवंति ४

पंचोलीटीका

संनियम्येति संनियम्य इंद्रियग्राममिंद्रियसमुदायं संनियम्य उपसंनि
यम्य उपसंहृत्य सर्वत्र समबुद्धयः सर्वस्मिन्काले इष्टानिष्टप्राप्तौ सम
बुद्धयः संतः मामुपासते ये सर्वभूतहिते रताः मामेव प्राप्नुवंति ४

रगवीरसमिद्धोधिनी॥

अत एव विकारभावाभावविषयकत्वात्तदधिष्ठानं निर्विकारमित्या
ह अचलमिति अचलं निर्विकारं यस्मादेवं तस्माद्ध्रुवं नित्यं एता
दृशं ब्रह्म पर्युपासते तैलधारावत्समानप्रत्ययप्रवाहेन विष
यीकुर्वंतीत्यर्थः कथमित्याह संनियम्येति विषयेभ्य इंद्रिय
ग्राममुपसंहृत्येंद्रियसमुदायमेतेन शमदमादिसंपत्तिरु
क्ता सर्वतो निवृत्तिरुक्ता भवति कथं सा स्यात्तत्राह सर्वत्रेति
सर्वेषु विषयेषु समा तुल्या हर्षविषादरागद्वेषशून्या मतिर्ये
षां ते विषयेषु दोषदर्शनात्तद्रागत्यागेन समबुद्धयस्तथा
सर्वभूतहिते रताः सर्वेषां भूतानां हिते हिंसायां निरताः कु
तसत्यासादन्यर्थः एवंविधाः सर्वसाधनसंपन्नाः स्वयं ब्रह्म
भूता निर्विचिकित्सकेन साक्षात्कारेण साधनफलभूतेन
मामक्षरं ब्रह्मैव ते प्राप्नुवंति एवमपि मद्रूपापत्तावविधानि
वृत्याति सिद्धितीत्यर्थः ४॥

मधुभाष्य

६॥

23

भाषा अनुवाद टीका

जो निर्गुण के उपासकों को क्लेश अधिक है तो फेरि क्या निर्गुण के उपासक श्रेष्ठ नहीं हैं इस शंकापर दो श्लोक से कहते हैं कि जो समदर्शी जन इन्द्रिय गण को अपने वशीभूत करके अक्षर कहे अविनाशी ब्रह्मका ध्यान करते हैं सो सकल भूतोके हितकारी निर्गुण उपासक मनुष्य भी हमको प्राप्त होते हैं ४ ॥

दोहा

इन्द्रियगण

इंद्रीयाम वशि रोकके सर्वत्र समबुद्ध सोभी मोको प्राप्त हि सर्वभूत हितयुत ४ ॥

24

क्लेशोधिकतरस्तेषामव्यक्तासक्तचेतसां अव्य
क्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ५ ॥

शांकरभाष्यटी०

किंतु क्लेशोधिकतरो यद्यपि मत्कर्मादिपराणां क्लेशोधिक
तरस्त्वेवात्मनां परमार्थदर्शिनां देहाभिमानपरित्यागनिमि
त्तः अव्यक्तासक्तचेतसामव्यक्ते आसक्तं चित्तं येषां ते अव्यक्तास
क्तचेतसस्तेषां अव्यक्तासक्तचेतसां अव्यक्ता हि यस्मात् या गतिरक्ष
रात्मिका दुःखं देहवद्भिर्देहाभिमानवद्भिरवाप्यते अतः क्लेशो
धिकतरः ५ ॥

आनंदगिरिकृतटी०

सगुणोपासकेष्वपि कथमित्याह किंत्विति अक्षरोपासनस्य दुः
करत्वादुपासनान्तरस्य सुकरत्वादित्यभिप्रेत्याह क्लेश इति अ
धिकएवेतरेभ्यो देहदर्शिभ्यः कामिभ्य इति शेषः तेषां क्लेशस्याधि
कत्वे हेतुमत्वा विशिनष्टि देहेति अव्यक्तमव्यक्तमन्तत्त्वं निर्विशेष
मक्षरं तस्मिन्नासक्तमभिनिविष्टं चेतो येषां ते तेषामित्यावत् अक्ष
रोपासकानां क्लेशस्याधिकतरत्वे भगवानेव हेतुमाह अव्यक्ते
ति दुःखं दुःखेन कृच्छ्रेणेतियावत् अतो देहाभिमानत्यागादि
त्यर्थः ५ ॥

स्वामिकृतटीका

क्लेश इति त्रिभिः अव्यक्ते निर्विशेषे अक्षरे आसक्तं चेतो येषां तेषां क्ले
शोधिकतरः हि यस्मादव्यक्तविषया गतिर्निष्ठा देहाभिमानिभिर्दुः
खेन प्राप्या भवति तथाप्युक्ते देहाभिमानिनां नित्यमप्यव्यक्तश्रवणात्व
स्पष्टत्वादितिभावः ५ ॥

पिशाचभाष्यटी०

क्लेश इति अव्यक्ता गतिः अव्यक्तं ज्ञानं ५ ॥

रामानुजभाष्यटी०

क्लेश इति तेषामव्यक्तासक्तचेतसां क्लेशोधिकतरः अव्यक्ता हि गा

श्री॰
गी॰टी॰
द्वा॰
25

ति अव्यक्तविषया मनोवृत्तिर्देहवद्भिर्देहात्माभिमानयुक्तैः दुः
खेनावाप्यते देहवंतो हि देहमेवात्मानं मन्यंते ५ ॥

अभिनवगुप्तकृत टीका

येत्वक्षरं ब्रह्मोपासते आत्मानं सर्वत्रगमित्यादिभिर्विशेषणैरा
त्मनः सर्वैश्वरधर्मा आरोप्यंते अतो ब्रह्मोपासका अपि मामेव य
द्यपि यांति तथाप्यधिकतरस्तेषां क्लेशः आत्मनि किलापहत
पाप्मत्वादिगुणाष्टकारोपं विधाय पश्चात्तमेवोपासत इति स्व
तः सिद्धगुणग्रामगरिमणीश्वरे यत्नसाध्ये स्थितेपि द्विगुणमा
यासं विंदंति ५ ॥

परमार्थप्रपा टीका

तत्रापि पूर्वश्रेष्ठ इत्याह क्लेश इति अव्यक्तेऽक्षरे आसक्तं चेतो
येषां ते तेषां क्लेशोऽधिकतरः हि यस्मादव्यक्तविषया गतिर्दे
हवद्भिर्देहाभिमानिभिर्दुःखं यथा स्यात्तथा प्राप्यते ५ ॥

वनमाली टीका

ननु फलतारतम्याभावात् किं मार्गानुवर्तिनामन्योन्यः को वि
शेषस्तत्राह क्लेश इति तेषामक्षरोपासकानां विहाय स्वबलेन योगाभ
रतानां नौकां हठेभ्यो बाहुभ्यां महाब्धिं तरतामिव मद्भक्तापेक्ष
याधिकः क्लेशो भवति कीदृशानामव्यक्तासक्तचेतसां अव्यक्ते
चक्षुरा[illegible]यगोचरे आसक्तं चेतो येषां तेषां हि यतो अव्यक्ता गति
रव्यक्तविषयाधिका स्थिरा चेतोवृत्तिर्देहवद्भिर्देहाभिमानिभिर्दुः
खं यथा स्यात्तथावाप्यते अयं भावः मनश्चक्षुरादिसर्वेंद्रियागो
चरस्वभावो व्यक्तः केवलोपनिषदेकवेद्यः परं कृपया मनश्च
क्षुरादिविषयोपि भवामि यमेवैष वृणुते तेन लभ्य इति श्रुतेः
दिव्यं ददामि ते चक्षुरित्याद्युक्तत्वात् मद्भ
क्तो मां शीघ्रमाप ॥

सारयतितेनैभक्तानांशीघ्रमभिव्यक्तीभवामि योगादिनानन्यायासी
र्वप्रसादेनेनशीघ्रमभिव्यक्तीभवामीत्यनेनाव्यक्ताहीसुकेनतव्यक्त
मव्यक्तंचेतिभगवत्स्वरूपेद्वैविध्यमस्तीति व्याख्यानेदेवभक्तेषु
हृदयेयथाप्रसादोनतथान्येष्वितितत्प्रसादंविनाचित्प्रकृतिजीव
स्वरूपयोगतिरुपासने अव्यक्तविषयकत्वाद्व्यक्तेदुःखंयथास्या
न्नतथाव्यक्तइत्यर्थः ननुभक्तिपूर्वकभगवदपरोक्षंविनाकेवल
योगेनमुक्तेरसंभवात्कथंममुक्षोर्भक्तिंविहायतत्रप्रवृत्तिरितिचे
न्न तस्माद्योगीभवार्जुनेतिवदताभगवतायोगस्यापिप्रसादद्वारा
मोचकत्वप्रतिपादनात् अथसंप्रज्ञातासंप्रज्ञातयोगयोर्निरोध
रूपयोःकिंप्रयोजनंयोगांगानुष्ठानादशुद्धिक्षयेज्ञानदीप्तिराविवेक
ख्यातेरितिसूत्रेणयोगांगस्यैवज्ञानहेतुतायाउक्तत्वात् संप्रज्ञात
योगकालेज्ञानोत्पत्तेरेवशास्त्रेष्ववगमात् नचतद्धेतुतायाःएकका
लकत्वेनहेतुहेतुमद्भावासंभवाच्च असत्त्वाविपर्ययोनरसंवाराय
प्रतिबंधनिवृत्तिरूपतयाज्ञानहेतुत्वंसंप्रज्ञातयोगस्य नत्वसंप्र
ज्ञातस्यतस्यज्ञानजन्यत्वात् नचज्ञानोत्पत्त्यनंतरंमोक्षायास्याप्यन
मपेक्ष्यते दृष्टैवतेमुच्यतइत्यादिश्रुत्याज्ञानस्यनिरपेक्षतयामोक्ष
हेतुत्वोक्तेःप्रत्युच्यतेज्ञानस्यकर्मजन्यदेहहेतुत्वंयथातथायोगस्यापि
विनिष्पन्नसमाधिस्तुमुक्तिंतत्रैवजन्मनि प्राप्नोतियोगीयोगाग्निद
ग्धकर्मचयोविरादित्यादिस्मृतेः नचवासंप्रज्ञातयोगेनाखिलसंस्का
रदाहकेनप्रारब्धकर्मणोप्यतिक्रमणमस्तिज्ञानाद्विशेषः ज्ञानस्यहि
प्रारब्धनाशकत्वेबाधकानितस्यतावदेवचिरमित्यादिकाश्रुतिः
अतःप्रारब्धस्यापिकर्मणोप्यतिक्रमःस्फुटितिभावनमेवयोगफले न
उक्तेमोक्षयमेनास्तिसांख्यसमंज्ञानेनास्तियोगसमंबलमिति ब
लेप्रारब्धस्याप्यतिक्रमेणास्वच्छंदपाशीघ्रमेवमोक्षहेतुः किंचवृत्ति
निरोधात्मकोयोगएवदुःखनि[illegible]हन्यात्मकमोक्षेसाक्षाद्धेतुःपुरु
षेदुःखस्यचित्तवृत्तिधर्मोपाधिकत्वात् उपाधिनिवृत्तिश्चौपाधिकनिवृ
त्तौचरमंकारणमतोनज्ञानेनान्यथासिद्धिरितिपातंजलैरपियोग
स्यैवनिवृत्तित्वेनयामोचकत्वमुक्तं यत्तुमत्कर्मकृदित्युक्तप्रकारेणास
गुणायेत्वामुपासनेयेचाक्षरंनिर्गुणमुपासनेतेषांमध्येकेश्रेष्ठाः

श्री·
गी·टी·
द्वा·

26

तिप्रश्नार्थः नत्रसगुणोपासनायामर्जुनाधिकारं दृष्ट्वा सगुणोपासन
मेवश्रेष्ठमित्युक्तंभगवतेतितुच्छं सगुणनिर्गुणब्रह्मविषयस्था
लीकत्वात् यतुजातिक्रियादीनांप्रवृत्तिनिमित्तानामत्यंताभावादक्ष
रमनिर्देश्यंसर्वशब्दावाच्यं यतोवाचोनिवर्तंते अप्राप्यमनसासहेति
श्रुतेरितिनदसत् अस्तित्वादीनामेवप्रवृत्तिनिमित्तानामसत्वात्
नदैतदक्षरंगार्गिब्राह्मणा अभिवदंतीत्यक्षरत्वप्रतिपादकश्रुते
र्वाच्यत्वोक्तेः यद्यपीदंनैववाच्यंताद्वसर्वशब्दावाच्यस्यलक्ष्यत्वस्याद
ष्टत्वेनासंभवेनवेदस्यानर्थकत्वापत्तेः तंत्वौपनिषदंपुरुषंपृच्छा
मीति दृश्यतेत्वग्र्ययाबुद्ध्या मनसैवानुद्रष्टव्यमित्यादिश्रुतेः शास्त्र
योनित्वादित्यादिसूत्रस्य च विरोधात् अतः सर्ववेदरत्नार्थं यतोवा
च इत्यादिश्रुतिः साकल्येनाज्ञातत्वाद्वावाच्यत्वपरेतिव्याख्येया यच्च
विद्याकल्पितसंबंधेनशब्दजन्यायांबुद्धिवृत्तौचरमायांपरमानंद
बोधरूपस्यहेवस्तुनिप्रतिबिंबितेऽविद्यातत्कार्ययोः कल्पितयोर्नि
वृत्त्यु[illegible]पपत्तेरुपचारेणविषयत्वाभिधानाददतस्तत्रकल्पितमवि
द्यासंबंधंप्रतिपादयितुमाह कूटस्थं यत् मिथ्याभूतंसम्यक्तयाप्रती
यतेंतत्कूटमितिलोकैरुच्यते यथाकूटकार्षापणः कूटसाक्षित्वमि
त्यादौ अज्ञानमपिमायामायाख्यंस्वकार्यप्रपंचेनसहमिथ्याभूतम
पिलोकैः सम्यक्तयाप्रतीयमानंकूटंतस्मिन्नाध्यासिकेनसंबंधेनाधि
ष्ठानतयातिष्ठतीतिकूटस्थमज्ञानंतत् कार्याधिष्ठानमितितत्वं
बुद्धिवृत्तिप्रतिबिंबितस्यवृत्तेर्वाधिष्ठानाविषयकत्वेज्ञाननिवर्तक
त्वासंभवात् ज्ञानाज्ञानयोः समानविषयत्वेनैवविरोधात् वृत्तेर्ब्र
ह्मविषयकत्वानंगीकारेहिघटाद्याकारवृत्तिप्रतिबिंबितचैतन्येनमेव
मूला ज्ञाननिवृत्तिःस्यात् घटादेर्बुद्धिवृत्तिविषयत्वेब्रह्मणस्त
दविषयत्वमित्यत्रनियामकस्यव[illegible]नुक्तत्वाच्च कल्पकाभावेनावि
द्यादेःकल्पनासंभवाच्च नचशुद्धंकल्पकंसदोषस्यैवकल्पकत्वात्
नचाविद्याविशिष्टंकल्पकंकल्पकस्याध्यस्ताधिकसत्ताकत्वनिय
मेनाध्यस्तसमसत्ताकस्याविशिष्टस्यमिथ्याभूतस्यकल्पकत्वासंभवा
त् मिथ्यावस्तुनिकूटशब्दोपपादासत्त्वदृष्ट्येवशुक्तिरूप्यादौस्थाव
रनिकूटशब्दस्यरूढ्याप्रयोगात् क्वचिन्मायादित्वादौकूटशब्दः सम्य

भाषणानिर्वचनः सूक्ष्मत्वमनाद्यन्तत्वा कूटस्थापणादावपिवं
चकत्वानिर्वचनः निःसामान्यस्यनिर्विशेषस्यब्रह्मणोज्ञानाज्ञानवि
भागहीनस्यसामान्यतोज्ञातत्वेसम्यग्ज्ञातविशेषवत्त्वरूपाधिष्ठाना
त्वासंभवाच्च नेन्द्रियमुपैतिमामेवैतिनस्यास्यंतामस्मगतेनेहिनिर्गुणो
पासकानांमस्गुणोपास्तिर्युक्ता मनःपरतंत्रनात्मनःकिंचिदात्तियत्ने
जयेत्यादिनानेनग्रंथेन स्वसाध्यत्वरूपस्यनिषेधाच्च ५ ॥

हनुमद्वैजयन्ती टीका ५

ननुयदितेषांमामेवप्राप्तिफलंहिसर्वेषांप्रकारमस्माकंकिंनिर्वचन
मितिचेत्तत्राह क्लेशोऽधिकतर इति तेषामव्यक्तासक्तचेतसामव्य
क्तेवरराघविषयैतिमूलमेनीरूपानुपरिमाणकेजीवात्मनिप्रास
क्तसमाधिनिरतेवेनोमनोयेषांतेनथायेषांप्रत्यगात्मचिंतनपरा
णांक्लेशः प्रयासोऽधिकतरोऽतिशयेनाधिकः यद्यपिसर्वेषामपि
मदन्यविषयेभ्यःकरणानामुपसंहारेणमस्क्रंतकून्समाचारस्त्वेत्यादि
क्लेशोऽस्तितथापिममानंदमूर्तिस्फुरणं तेषांतत्स्वभावमेवतस्या
दतःप्रत्यगात्मसक्तानामेवाधिकतरःक्लेशस्तत्राशयःतत्रहेतुमाह
अव्यक्ताहिगतिःहियस्मादव्यक्तागतिरव्यक्तात्तरविषयामनोवृत्तिः
देहवद्भिर्देहाभिमानप्रक्रैर्जनैर्दुःखंयथास्यात्तथाप्यवाप्यते देहव
न्तःखलुस्थूलंदेहमेवप्रविरादात्मत्वेनानुशीलितवंतःकथमण
वैनस्यात्तुविरोधिनविमर्शमात्मत्वेनानुशीलितुप्रभवेयुरित्यभि
प्रायः ५ ॥ २

मधुसूदनी टीका ५ ॥ इदानींतेभ्यःपूर्वेषामतिशयंदर्शयन्ना

ह— पूर्वेषामपिविषयेभ्य आहृत्यसगुणेब्रह्मणिमनसआवेशसमर्थ
नकर्मपरायणत्वेचपरमेश्वरोपेतत्वेचक्लेशाधिकोभवत्येवकिंतु
अव्यक्तासक्तचेतसांनिर्गुणब्रह्मचिंतनपराणांतेषांपूर्वोक्तसाध
नवतांक्लेशआयासोऽधिकतरःअतिशयेनाधिकःअत्रस्वयमेव
हेतुमाहभगवान् अव्यक्ताहिगतिःहियस्मादक्षरात्मकंगंतव्यं
फलभूतंब्रह्म दुःखंयथास्यात्तथाकष्टेनदेहवद्भिर्देहाभिमानिभि
रवाप्यते सर्वकर्मसंन्यासंकृत्वागुरुमुपसृत्यवेदांतवाक्यानां
तेनतेनविचारेणअनन्तदुर्मतिनिराकरणेमहानायासःप्रत्यक्षसिद्धः
ततःक्लेशाधिकतरस्तेषामित्युक्तं यद्यप्येकमेवफलंतथापि

श्री॰
गी॰ टी॰
द्वा॰
27

दुष्करेणापि येन प्राप्स्यन्ति तदपेक्षया सकरेणोपायेन प्राप्स्यन्ते तो भवं
तिष्वाहेत्यभिप्रायः क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचे
तसाम् अव्यक्ता हि गतिर्दुःखं निर्गुणब्रह्मविदां इह ५ ॥

सदानंदी टीका ॥

किमाधिक्यं तत्राह तेषामेतेभ्यः सर्वयोगिनो इत्यत्राह जयानंत्राह्यः स
र्वेनिष्ठा यदात्मदं १ सर्वेषामपि भोगेभ्य आत्मनस्सगुणोहरौ मनः
स्थवेशेनकर्मरतत्वे च तिरेतरं परब्रह्मान्विनत्वे च तेषां क्लेशोऽधि
कोऽस्त्यपि परं तन्निर्गुणब्रह्मविन्नात्मकत्वेन सो आपासोति षा
येनास्तिहेतुमत्राह मायतिः यतोऽक्षरात्मकेब्रह्मगतत्वेनत्फ
लात्मकं दुःखं यथा तथा चैव क्लेशेन तदवाप्यते सर्वसाधनसं
पन्नैरपि देहाभिमानिभिः यतोऽक्षरपि यो देहाभिमानत्यागहेतु
कः वेदान्तश्रवणाद्येश्च स देहापनयात्मकः ८ क्लेशोऽधिकतरः
प्रोक्तः सर्वेषां तो विपश्चितो यद्यप्येकफलं तेषामुभयेषां तथा
पि तु ९ सगुणब्रह्मनिष्ठानां सकरोपायनो हरेः पदं प्राप्नुवतोऽत्र
ऽसंसमतेन तदपेक्षया ८ यथा ब्रह्मविदोऽनत्वसाक्षात्कारेण मुक्ता
ता तथा सगुणनिष्ठानामीश्वराराधनेन च ९ निर्मलप्रतिबंधानां
विनाचार्योपदेशेन श्रवणादेर्विनाहि निमीश्वरानुग्रहेण च १० तत्त्व
ज्ञानोदये नैव सकार्यज्ञानबाधनात् प्रह्लादादिवदेवैषां केवल्यं भ
वति स्वयं ११ ब्रह्मलोकगतानां वा भोगैश्वर्यावसानतः भवेत्कैव
ल्यसंसिद्धिर्ब्रह्मविद्याफलं परं १२ ५ ॥

नीलकंठी टीका ॥

अस्यागतेर्दुष्प्रापत्वमाह क्लेश इति यद्यपि सगुणविदामधिकः क्ले
शोऽस्त्येव तथापि तेषामालंबनाध्यायतिसोपानारोहक्रमेण परोक्षा
क्षोभविशेषोऽस्ति येषां तु निरालंबध्यानमाकाशग्रहसमं तेषां ति वि
षये चेतः स्थिरीकरणे अधिकतरः क्लेशोऽस्ति न तत्र क्रमिकध्यानप्रयो
गः शुद्धे चिन्मात्रे विश्वरूपमायया ध्याते न तत्र च केवलमानिवाहि
केऽहन्त्वे जडमाधिभौतिकमध्यस्ते यथोक्तं वसिष्ठेन प्रातिवा
हिकपवायत्वाहं पौष्ठिनदेहकः आधिभौतिकयावु[illegible]रहीन ॥ आ
स्थिरभावनादिति प्रतिक्रम्यपाषाणादीनवहति इष्टदेशेनयाय
भिमानिनमित्यतिवाहि सर्वत्राप्रतिहतगतिकं भूतसूक्ष्मेनेन

निहितत्वात्तिवाह्निकोयंक्रमः प्रपंचोयत्नाष्ठितदेहकः चित्तमेवदे
हः स्वरूपमस्येति स्वमतत्वमेवमतन् विरमावनात्वच्चपंजरवत्
कारिन्येनोपेनत्वाधिभौतिकयास्थूलभूतप्रभवयाब्रह्माण्डदेहोनर
तिश्लोकार्थः एवंचयथातीव्राभिनिवेशेननिरीक्ष्यमाणेरज्जूरगः
स्वयंशाम्यतितदधिष्ठानभूतारज्जुश्चाविर्भवति तथावस्तुतश्चि
द्रूपायामपिमायवादिमूर्त्तौजाड्यमध्यस्तेतामेवाभिनिवेशेनचिर
कालेचर्मचक्षुषैवपश्यतस्तस्यामूर्त्तौजाड्यंतिरोधीयतेचैतन्यमा
विर्भवति यतएवबाणादयः स्वाराध्यैः शार्ङ्गस्वामिमूर्त्यपायेनव्य
वहरंतीतिसर्वत्रोपाख्यायते एवमचेतनायामूर्त्तेरपिचैतन्यविश्व
रूपमेवेतिमूर्त्तिमेवात्यादरेणपश्यतस्तस्यास्तत्वविश्वरूपमवग
च्छतियदपश्यदर्जुनोवासुदेवदेहे एतदेववितर्केजप्रत्यक्षंप्रह्ला॰
त्योक्तंभगवतायोगभाष्यकारेणबादरायणेन तत्परंप्रत्यक्षंतच्च
श्रुतानुमानयोर्बीजमिति स्थूलालंबनःसमाधिर्वितर्कः विश्व
रूपस्याप्यस्मितामात्रेध्यानात् तस्यावलोकनेऽस्मितामात्रमव
शिष्यते अस्मितायाअपिशब्दाद्यविनावध्यस्तत्वात्तस्यामपिस
माहितेमनसिसहैवमनसास्मितातिरोधीयतेशब्दावितिरेवा
वशिष्यतेइति एवंव्यक्तासक्ताःसोपानारोहक्रमेणपरांकाष्ठांप्र
तिपद्यंते येत्वव्यक्तासक्ताःपक्षिवदकस्मादूर्ध्वंपदमारुरुक्षंते
तेलयेनविक्षेपेणचसंशयाध्येनेलयमेवचकदाचित्समाधि
त्वेनाभ्युपगच्छंतीतितेषांपराभवसंभावनायामस्तीत्यतउक्तं क्ले
शोधिकतरस्तेषामव्यक्तासक्तचेतसामिति हियस्मादव्यक्ताति
रालंबनागतिःपदप्राप्तिर्देहवद्भिर्देहाभिमानिभिर्दुःखेनयथास्या
त्तथाअवाप्यते ततस्तास्तत्वप्राप्त्यंतिभावः ५ ॥

आनंदीटीका

अव्यक्तेवाङ्मनसगोचरातिक्रान्तस्वभावेमयिनिराकारेपरमात्म
निसक्तमावेशितंमनोयेषांक्लेशोधिकतरः यद्यपिमनोवाह्यवि
षयेभ्योनिवर्त्यमयिसाकारेबहुशोनुभूतेपिमनआवेशयितुंमहा
नेवप्रयासः तथाप्यव्यक्तेमनसःसमाधानंबहुजन्माभ्यस्तयोगविभ

गी॰ वैः कश्चिदेव शक्यते न सर्वैरित्यर्थः अत्र हेतुमाह देहभृद्भिः नियत
टी॰ ज्ञात्यावच्छिन्नं शरीरमहमिति भावनया धारयद्भिः अव्यक्ता गतिः स
द्वा॰ र्वभावातिरिक्तब्रह्मस्वरूपापत्तिः दुःखेन क्लेशपूर्वमवाप्यते बहुप्रया
ससाध्येत्यर्थः अत्रायं वाक्यार्थः शास्त्रचोदितासु क्रियास्वेव वर्तमा
28 नः पुरुषः यथा मम साकारस्योपासनाभिः सुखेन मां प्राप्नोति न त
था दुष्करसकलक्रियानिषेधनरूपाभिः निराकारोपासनाभिरिति ।
एतदेव स्थिरयति ५ ॥

## रामकंठीटीका

किंच तेषां सर्वभावनिषेधसमाधिनिष्ठानां योगिनां सर्वभावनिष्ठत्वे
न मदुपासनपरेभ्यो युक्ततमत्वेन प्राक्प्रतिपादितेभ्यो योगिभ्यो
ऽधिकतरः सातिशयः क्लेशः कीदृशानां सताम् अव्यक्तासक्तचेतसाम
व्यक्ते वाङ्मनसगोचरातिक्रांतस्वरूपे मय्यासक्तमालम्बनीयत्वेन
तत्रैव निषण्णं चेतोऽन्तःकरणं येषां तथाविधानां कथमव्यक्तासक्ति
त्वमधिकतरक्लेशकारणमित्युपपादयितुमाह यस्माद्देहभृद्भिर्दे
हे नियतजात्यभिमानावच्छिन्नं शरीरमहमिति प्रतिपत्त्या धारयद्भि
स्तैस्तादृशैर्योगिभिरव्यक्ता सर्वात्मना निराभासा गतिः समाधिप्रा
प्तिः दुःखमतिक्लेशेनाऽवाप्यतेऽधिगम्यते अयमभिप्रायः शरीरेऽहंत
या प्रतिपद्यमानैः सर्वभावव्यतिरिक्तमतत्स्वरूपसमापत्तिर्नुपपन्नैव
तदभिनिवेशश्चास्य महाक्लेशप्रद अध्यात्मिकाविद्युक्तिर्येद्देहए
व सद्भावेन प्रतिपन्नं शक्यः सर्वात्मना सर्वक्रियोपरमस्यासद्भाविते
न प्राग्ज्ञानात् तस्माच्छास्त्रचोदितासु क्रियास्वेव वर्तमानः पारमा
र्थिकमतत्स्वरूपमसौ यथा सुखमनुभवति न तथा दुष्करसकलक्रिया
निषेधाभिनिविष्टेन च तादृशो योगिनः सर्वत्र समबुद्धित्वमप्युपपद्यते
सर्वार्थेषु निषेध्यतया द्वेषादिव्यक्तेः यस्तु मत्प्रवहत्वात्सर्वदा सर्वथा
मतत्स्वरूपैकविश्रांतसंवित्तस्य सर्वत्र निष्ठत्वे हेयोपादेयव्यापारैर्यविक
ल्पस्य सर्वत्र समबुद्धित्वमुपपन्नं सेषा महती भगवत्स्वरूपोपासनाव
नर्थीभावस्था [illegible]
[illegible] ५ ॥ ॥

क्लेश

नासिकी [illegible]टीका

किंच तेषां निरोधयोगमात्रतत्पराणामव्यक्तचेतसां [illegible] मव्यक्तोऽक्षरलक्षणविम
र्शनयानिरोधात्मकेनासक्तनिश्चलमनसां चेतोवृत्तिः कष्टमित्येषाम् ते
षां क्लेशः समाधिप्राप्तये चित्तप्रशमनरूपः खेदः उक्तरूपेभ्यो मदुपा
सननिष्ठेभ्यः कर्मयोगिभ्यः सकाशादधिकतरः प्रचुरतरः सर्वदात्म
चिन्तनात्सर्वक्रियोपरमस्यासंभवात् मदुपासकानां कर्मयोगिनां य
द्यप्यस्ति मद्विमर्शविच्छेदनेन क्लेशोऽधिकः तथापि यदा यदा कर्मस
मये चित्तं समयेनैकाग्र्यमालंबते तदैव तस्य शिलापतिततैलबिन्दूपम ज
चित्तप्रशान्तिलक्षणः निरोधात्मकं प्रयासं विनैव समाध्युदयः उत्त
द्रूपस्य व्यवहारासक्तस्यापि नेन्द्रियेव किंपुनर्निरोधलक्षणो यद्भीरुहभिः
स्तंतच नाथवेद्यत्वयैकेनतदुपासकः स्थितः वेद्यवेदकसंबंधाभे
दासिभक्तैः स्वदर्शनः कदाचित्कापिलभ्योसि योगेनेतीशवचनात् अ
न्यथा सर्वकस्यास्य भासि भक्तिमतां कथमिति नैवमतरात्मोपासकाना
म् यतो देहवद्भिर्देहाभिमानेन नित्ययोगिभिः अव्यक्ताऽक्षरात्मवि
षया गतिः समाधिरूपा निष्ठा दुःखमिति क्लेशेनावाप्यते देहाहंभावा
विलयस्य दुर्घटत्वात् चिरतरसमोऽपि तस्य वपुनर्देहाहंभावनादुरू
पो निद्राऽऽक्रमः [illegible] ५ ॥ ॥

पंचोलीटीका

तर्हि द्वयोः को विशेष इति जिज्ञासायां क्लेशकृतं विशेषमाह क्लेश
इति त्रिभिः तेषामव्यक्तासक्तचेतसामक्षरोपासकानां क्लेशः प्रयास
अधिकतरः देहाभिमानपरित्यागनिमित्तः हि यस्मादव्यक्ताक्षरात्मि
का गतिः देहवद्भिः देहाभिमानवद्भिः दुःखेन प्राप्यते अतएवाधिकत
रः क्लेशः ५

रणवीरस्वामिदीपिनी।

इरानी तेभ्यः सर्वेषामतिशयं दर्शयन्नाह क्लेश इति यद्यपि
मत्कर्मपरायणत्वे परमेश्वरार्पितत्वे च सगुणोपासकानामधि
कः क्लेशो भवत्येव किंत्वव्यक्ते त्वक्षरात्मके ब्रह्मण्यासक्तं चेतो
येषां तेषामव्यक्तासक्तचेतसां निर्गुणब्रह्मचिन्तनपराणां पू
र्वोक्तसाधनवतां क्लेश आयासोऽधिकतरोऽतिशयेनाधिकः
अत्र स्वयमेव हेतुमाह अव्यक्तेति हि यस्मादक्षरात्मिका ग
तिर्दुःखं यथा स्यात्तथा कष्टेन देहवद्भिर्देहाभिमानिभिरवा
प्यते सर्वकर्मसंन्यसनेन गुरूपसरणेन वेदान्तवाक्यानां श्रवणा
दीति तेषां महानायासस्ततस्तेषामधिकतरः क्लेशस्तद्ये च
यासुकरेणोपायेन शुद्धरूपस्वधर्माचरणेन प्राप्नुवन्ति श्रे
ष्ठा इत्यभिप्रायः ५॥

## मधुभाष्य

क्लेश इति अव्यक्ता गतिः दुःखं सुवाप्यते गतिर्मार्गः अव्य
क्तोपासनद्वारकोऽक्षराभिमार्गो दुःखमाप्यत इत्यर्थः अति
शयोपासनसर्वेन्द्रियनियमनसर्वसमबुद्धिसर्वभूतहितर
तत्वातिसूक्ष्मवारसम्यगुपलम्भाभ्यासादिसाधनसंदर्भस्तेना
व्यक्तोपासनं दुरतेऽचिन्त्यविलम्बप्रसादः सत्यपि तस्मिन्नस्य
गभेवेद्भगवदुपासनमस्ते नसंपत्तमोक्षः विनाव्यक्तोपास
नं भवत्येव भगवदुपासकानां मोक्ष इति क्लिष्टोऽयं मार्ग इ
तिभावः तथाप्यंगीकृताव्यक्तोनासकर भगवदुपासन
मित्येतावत्प्रयोजनं तत्रापि योऽव्यक्तोपासने प्रयासः तावता
प्रयासेन यदि भगवन्तमुपास्तेऽदूनेन वा तदा भगवदर्पणोक्त
मेव भवतीति द्वितीयमधिकं इन्द्रियसंयमनाद्युत भावे समस्तु
पासकस्यापि देवीनातिप्रसादमेति देवस्तु तानि साधनानि भ

क्तिमतः स्वयमेव प्रयत्नेन ददातीति वा तिसौकर्यमिति भक्ता
नां भगवदुपासने प्रयत्नके सौधिकतरः तदेतत्सर्वं पद्धपा
सते सन्निधस्याधिकतरइति परिसंतत्स्पृग्राह्यैः प्रतीयते सा
मवेदे मपुच्छंदसशाखायांवोक्तं भक्ताश्वयेतीव विलावनी
वविजितेंद्रियाः सम्यग्गावारयुक्ताः उपासते तां समनुद्धयस्य
तेषां देवी दृश्यतेनेतरेषां दृष्टा च सा भक्तिमतीव विलासदवो
पात्तोसर्वविघ्नांछिनत्ति उपास्यतं वा महदेवं विदित्वा ततत्त्वतः
प्राप्नोति मन्यंतमेतीति उक्तं च सामवेदे प्रयास्यशाखायां प्रसन्नो
भवतीता देवः सोव्यक्तेन समहदेवत यावत्तावत्प्रसादोदितावते
वन संशयः न तत्प्रसादमाहेणाप्रीयते समहेस्वरः तस्मिन्प्री
ते तत्सर्वस्य प्रीतिस्त्वभवति ध्रुवं यद्यप्युपासनाधिक्यं तथापि
गुणदोदितः मुक्तिदः स सर्वेकाना व्यक्तादिस्तु कश्चनेति समा
त्मभावमिच्छंतोयतंते परमात्मनेइतिच मोक्षयमेश्रीववन
प्रीनित्यमहाबुद्धौ ब्रह्मण्ये सत्यवादिनि प्रष्ठिते दानशीले च स
देवनिवसाम्यहमितिव महतः परत्वं प्रसेव तथाहि भगवता
सद्गुक्तिकमभिहितं वदतीवेन्न प्राप्तोदि ययाणमेववैवस
पन्यासः प्रप्नञ्ज्ञेत्यादि तमिति पुल्लिंगाबैतन्नासिद्धिः महतः
परत्वं तद्व्यक्तपरस्य भवत्येव तथा चाग्निवैश्यशाखायां प्रना
यंते महतः परं ध्रुवमिति परोहि देवः पुरस्तान्महत्तरइतीति
नचाव्यक्तस्वरूपं भगवतानाभिहितं भारतादौसाधितत्वात् [redacted]
शारीररूपकविन्यस्तगृहीतेरित्यादौ सांख्यप्रसिद्धं प्रधानं निषि
ध्यवैदिकमव्यक्तमेवोक्तम् तथा च सौकरायणश्रुतिः शारीर
रूपिका सा शरीरस्य विलोपयेतः प्रियातः साजगतः प्रसूतिरि
ति हि अव्यक्तानां तत्परं महद्देवं देवी ददाति न देव इति विशेषः

सुवर्णवर्णों पुष्मकर्णां वदेवी सर्वेषां व्याप्रसन्नं चतुष्या सेवे
तिवे सुव्रतानां तमासान्महा विभूतिं श्रीमद्दयान्न देव स्यु
वेद विलेख मडपामकानामकानां नकक्षिल्लेपाइतिद
मायति ५॥

30

### भाषा अनुवाद टीका

जो निर्गुणोपासक भी ब्रह्म को प्राप्त होते हैं तो सगुणोपासक युक्त कहे श्रेष्ठ जो आपने कहा सो कैसे संभव होय है इस शंका को निवारण करते हुये तीनि श्लोकसे क्लेश हेतुक विशेष कहते हैं कि अव्यक्तनिर्विशेष अक्षर ब्रह्मसे जिसका चित्त आशक्त भया उसको अधिक क्लेश होय है क्यों कि अव्यक्त ब्रह्म विषयक जो निष्ठा सो देहाभिमानी मनुष्यको अति दुःख से प्राप्त होती हैं कारण यह कि स्थूल शरीरमे आत्म बुद्धि विशिष्ट मनुष्यों के मनको अन्तर्मुख वृत्तिका प्रत्यक चैतन्यमे निमग्न होना सर्वथा दुष्कर है ५ ॥

### दोहा

क्लेश अधिक है तिनहिको अव्यक्तासक्त चित्तजोय अव्यक्त
गति है दुखको देहवंत कहुं सोय ५॥

31

येतुसर्वाणिकर्माणिमयिसंन्यस्यमत्पराः अ-
नन्येनैवयोगेनमांध्यायंतउपासते ६ ॥

शांकरभाष्यटीका १

अगुणोपासकानां यदुक्तं तदुपरिष्टाद्वक्ष्यामः ये त्विति ये तु सर्वाणि
मयीश्वरे संन्यस्यमत्परा अहं परो येषां ते मत्पराः सन्तः अनन्येनैव
अविद्यमानमन्यदालम्बनं विश्वरूपं देवमात्मानंमुक्त्वा यस्य सोनन्य
स्तेनानन्येनैव केवलेन योगेन समाधिना मां ध्यायन्तश्चिन्तयन्त उपा
सते ६ ॥

आनंदगिरिकृतटीका २

ते कथंवर्तंते तत्राह अन्येत्विति यद्यक्षरोपासकामामेवाप्नुवन्तीति वि
शिष्यते तर्हि सगुणोपासकास्त्वां नाप्नुवन्ति न तेषामपि क्रमेण म
त्प्राप्तिरित्याह येत्विति तुशब्दः शङ्कानिवृत्यर्थः ६ ॥

स्वामिकृतटीका ३

मद्भक्तानां तु मत्प्रसादादनायासेनैव सिद्धिर्भवतीत्याह येत्विति द्वाभ्यां
ये मयि परमेश्वरे सर्वाणिकर्माणि संन्यस्य समर्प्य मत्परा भूत्वा मां
ध्यायन्तोऽनन्ये न न विद्यतेऽन्योभजनीयोयस्मिन् तेनैवैकान्तभक्तियो
गेनो पासत इत्यर्थः ६ ॥

स्वामिकृतटीका ३

सगुणोपासकानांमद्भक्तानांतुमत्प्रसादादनायासेनएवसिद्धिर्भवतीत्या
ह येत्विति द्वाभ्यां मयिपरमेश्वरेसर्वाणि[कर्माणि]संन्यस्यसमर्प्य मत्पराभूत्वा
मांध्यायंत अनन्येन नविद्यते अन्योभजनीयोयस्मिन्तेनैवएकांतभ-
क्तियोगेनोपासतइत्यर्थः ६ ॥

पैशाचभाष्य टीका ४

येत्विति अनन्योनविद्यतेन्ययस्मिन्योगोसोनन्यः ६ ॥ +भगवंतमुपासीनानांयुक्त तमत्वसख्यकमाह+

रामानुजभाष्य टीका ५

+येतु+इति तेषामिति येतुलौकिकानिदेहयात्राशेषभूतानिदेहधारणार्था
निवाऽशनादीनिकर्माणिवैदिकानिचयागदानहोमतपः प्रभृतीनिस
र्वाणिकारकाणिसोद्देश्यानिअध्यात्मचेतसामयिसंन्यस्यमत्परामदेक
प्राप्याअनन्येनैवयोगेनअनन्यप्रयोजनेनयोगेनमांध्यायंतउपासते
ध्यानार्चनप्रणामस्तुतिकीर्तनादीनिस्वयमेवात्यंतप्रियाणिप्राप्यसमा
निकुर्वंतोमामुपासतइत्यर्थः ६ ॥

अभिनवगुप्तकृत टीका ६

श्री॰
गी॰ टी॰
ह॰

32

स्यहार्थे ९

परमार्थप्रपा टीका ७

मद्भक्तानांत्वप्रयासेनप्राप्तिर्भवतीत्याहयेत्विति ९ ॥

वनमाली टीका ८

यथाविक्रीताश्वेस्वस्वामिमानोविक्रेताविक्रेतव्यविगततत्त्राणादिवैती
भवतिपरिक्रेताचपालनादितत्परोभवतितथायेनस्वस्वीयमध्या
पितेनतस्ययोगक्षेमादावहंतत्परइत्याहयेत्वितिद्वाभ्यांयेतुसर्वाणिनि
त्यकाम्यादीनिवैदिकानिलौकिकानिचानिषिद्धानिमय्यनेनलक्षणालयं
नयोगिनांमत्समक्षसेनकारितेनकर्मणास्वयमेवतुष्यावितिसमर्प्य
नन्येनत्नवियतेमांविनावलंबनेयस्यतेनमदेकशरणत्वरूपयोगेनमां
मदनेनलक्षणलयेजगदुद्धादिकर्तारमत्तरत्वाचलत्वध्रुवत्वादिने
नगुणविशिष्टंसर्वकृतिनान्ययेविवयेब्रह्मरुद्रादियोगीश्वरैर्मेने॰
साध्यविन्यानेनवैभवेभक्तोकगम्यधामानंसौन्दर्यातिशयनिधानमा
नंदैकविग्रहंवंशीभूषितनायकंव्रजाङ्गनाकौमारहकीरवीणागायपाणिपल्लवं
नृसिंहाद्यनेकरूपंयथादर्शितविश्वरूपमचिंत्यघटनापटीयानेन
शक्तिंसर्वेष्वियोगोवरमपिभक्तवशपतयाद्वूणोच्चरेप्रसादैकलभ्यंध्या
येन्तोहरिंगयोगेननवधाभक्त्यावाउपासतेनिरंतरंमदेकाकारवृत्तिह
निश्चवाहेसंपादयंतस्तेषामप्यहमेवद्रष्टेस्तुतरेणान्वयः ९ ॥

अनुमवैजयन्ती टीका ९

एवंप्रत्यगात्मोपासकानांदुःखमार्यांगतिमुक्त्वाधुनाभगवदुपासका
नांसुखसाध्यांगतिंवदन्नुक्तमेवमाहद्वाभ्याम् येतुसर्वाणीतितु
पुनःयेमदेकांतिनोमत्रापरार्थंमपिसर्वेश्वरेसर्वाणिसकारणानिसोहे
श्यानिकर्माणिदेहयात्रार्थकान्यशनादीनिलौकिकानियागदानत
पोहोमादीनिवैदिकानिचस्वविहितानिसंन्यस्यभक्तिविक्षेपकत्वबु
द्ध्यापरित्यज्यमत्परामदेकपुरुषार्थाःमदेकशरणाःसन्तोनन्येनान्यप्र
योजनरहितेनकेवलेनयोगेनमच्छ्रवणादिलक्षणेनोपायेनमांध्या
यंतःश्रवणकीर्तनार्चनप्रणामलक्षणादिकालेपिसततविष्णुमननसमे
तोमांभगवंतंकृष्णमुपासतेमध्रकिलक्षणांमद्ध्यामनोकुर्वतीति ९

+ननुफलेकेवलेजोगाल्पत्वाधिक्याभ्यामु
त्कर्षनिकर्षोस्यातांतदेवतुनास्तिनिर्गुण
ब्रह्मविदांहिप्र॥

मधुसूदनी टीका १०

+लमविद्यानकार्यनिहत्यानिर्विशेषपरमानंदबोधब्रह्मरूपतामधु

णब्रह्मविदांतुअपिज्ञानप्रमायाअभावेनाविद्यानिवृत्त्यभावादै
श्वर्यविशेषःकार्यब्रह्मलोकगतानांफलेअनःफलाधिकार्यमा
यासाधिकंतत्अनंतमायादयतीतिचेत्न सगुणोपासनयाति
रहस्य वेदांतिवेपानांविनागुरूपदेशंविनावाश्रवणमननानि
दिध्यासनाद्यनुष्ठितिःक्लेशैःस्वयमाविर्भूतेनवेदांतवाक्येनस्वस्व
साक्षात्कृतेनतत्त्वज्ञानोदयात्विद्यानत्कार्यनिवृत्त्याब्रह्मलो
कप्रैश्वर्यभोगांतेनिर्गुणब्रह्मविद्याफलपरमकैवल्योपपत्तेः
सएतस्माज्जीवघनात्परात्परंपुरिशयंपुरुषमीक्षतइतिश्रुतेः
सप्राप्यहिरण्यगर्भैश्वर्यः भोगांतेएतस्माज्जीवघनात्सर्वजीव
समष्टिरूपात्परात् श्रेष्ठात्हिरण्यगर्भात्परंविलक्षणंश्रेष्ठं
पुरिशयंसर्वहृदयगुहानिविष्टंपुरुषंपूर्णंप्रत्यगभिन्नमद्वि
तीयंपरमात्मानमीक्षतेस्वयमाविर्भूतेनवेदांतप्रमाणेनसा
क्षात्करोतितावताचमुक्तोभवतीत्यर्थः तथाचविनापिप्राग
क्लेशेनसगुणब्रह्मविदामीश्वरप्रसादेननिर्गुणब्रह्मविद्या
फलप्राप्तिरितितत्सर्वमाहद्वाभ्यां तथाहुरुक्ताशंकानिवृत्त्यर्थं
येतुसर्वाणिमयिसगुणेवासुदेवेसंन्यस्यसमर्प्यमत्पराःअहंभ
गवान्वासुदेवएवपरःप्रकृष्टप्रीतिविषयोयेषांतेतथासंतः
अनन्येनैवयोगेननविद्यतेमांभगवंतंमत्तोऽन्यदालंबनंयस्य
नास्तितेनैवयोगेनसमाधिनापकोतभक्तियोगापरनाम्नामांभ
गवंतंवासुदेवंसकलसौंदर्यसारनिधानमानंदघनविग्रहंद्वि
भुजंवाचतुर्भुजंवासमस्तजनमनोमोहनीमुरलीमतिमनोहरैः
स्वराभिःसुरैरापूरयंतंवा दरकमलकौमोदकीरथांगशार्ङ्गपा वर
णिपल्लवंवा नरसिंहराघवादिरूपंवा यथादर्शितविश्वरूपं
वाध्यायंतःचिंतयंतउपासते समानाकारमविच्छिन्नचित्तवृत्ति
प्रवाहंसंतन्वते समीपवर्तितयाआसतेतिष्ठंतिवा ८ ॥

सदानंदी टीका ॥

योगिनामुभयेषांप्रारब्धसमस्तानांविभज्यवै निष्ठोक्तानुत्कलेमो
हःसद्यःकालांतरेक्रमतः १ इदानींभक्तिरामिकाभोगमोक्षादि

33

निःस्पृहाःयेसंतिविरलाःकृष्णपादपद्मरसग्रहाः तेषामनिच्छताम
प्याशुहंमोक्षपदेपरे संतोषारयितेत्याहप्रेमभक्तिप्रियोहरिः य
द्यपीशोस्तिसर्वेषांमोक्षदाताजनार्दनः तथापियत्नमस्थायमुमु
क्षूंश्चयोगिनां ४ मोक्षेधारयितास्वामीज्ञानद्वाराधिकारिणां
निष्कामानांतुभक्तानांकृष्णपादानुरागिणां ५ ननुमुक्तावुभुक्षु
त्तःप्रक्षादेननयेरिति नाथयोनिसहस्रेषुयेषुयेषुव्रजाम्यहं
तेषुतेष्वच्युताभक्तिरच्युतास्तुसदात्वयि याप्रीतिरविवेकानां
विषयेष्वनपायिनी ७ त्वामनुस्मरतःसामेहृदयान्मापसर्पतु
यत्तेभ्योप्यनिच्छद्भ्यःस्वयंमोक्षंजनार्दनः ८ ददातीतिविशे·
षोपित्वाहेनात्रस्यते येतुसर्वाणिकर्माणिवासुदेवेमयीश्व
रे समर्प्यात्यंतमत्प्रेम्णामत्पराःसेतन्त्राद्रात् नान्यदालंबनेय
स्यभगवतेतेविहायमां ९ तेनभक्त्याख्ययोगेनवासुदेवंरमाप
तिं मामेवसर्वसौंदर्यसारंसर्वेशमीश्वरं ११ चिंतयंतःसदानं
दं विषयीकर्तुमुद्यताः चित्तहृत्त्यैकतानत्वात्तिष्ठंतत्तरोमयि १२८

नीलकंठी टीका १२

ननुश्रवणादिसक्तचेतसांक्लेशप्रापिकोपिक्लेशोनेतस्यःकैवल्यसि
द्धिरस्तीतिकिंविलंबसाध्येनभक्तिभावनेनेत्याशंक्याह येत्विति
द्वाभ्यां सर्वाणिनित्यनैमित्तिकस्वाभाविकादीनि संन्यस्यसमर्प्य
मत्पराअहमेवपरःसर्वकर्मभिःप्राप्योयेषांतेमत्पराःमत्प्रा
प्तिपरावा अनन्येनभेदशून्येनअहमेवभगवान्वासुदेवइतिपर
मेश्वरेऽहंग्रहलक्षणेनयोगेनचेतःसमाधानेनमांध्यायंतउपा
सतेतेनैवध्यानेनमोक्षंलभंते ९ ॥

ज्ञानेश्वरीटीका स्पष्टार्थम् ९

यात्तनित्यक्रियांतःपातिनीनानादर्शनप्रसिद्धेतिक
तेव्यताविशिष्टामापिहृष्टोपपन्नेतिप्रतिपादयित
माह—

रामकंठीटीका

योगिभ्योयेतुपुनरव्यक्तोपासकेभ्योव्यतिरिक्तायोगिनः सर्वकर्मा
णिशारीरीमानसीवाचिकीःशास्त्रीयालौकिकीश्चसकलाःक्रियाः
मयिसर्वकर्तृत्वेनप्रतिपादितस्वरूपेसंन्यस्यकार्यतेनसमर्प्यदेहा
यहंकारात्मकत्वेनकर्तृत्वविनिवृत्ताभिमानामत्पराःअहमेवपरः

कर्तृत्वादिना मत्परा ये येषां तथाविधा अनन्येनाविद्यमानमन्यद्व्य
तिरिक्तं तत्त्वान्तरं येन योगेन विहितकर्मानुष्ठानरूपेण समाधिना
मां यथोक्तस्वरूपं ध्यायन्तः स्मरन्त उपासते ६ ॥

## लासिकी टीका

एवमव्यक्तोपासकानां क्लेशाधिक्यमुक्त्वा कर्मयोगिनां स्वानुग्रहा
दीनां प्रयासाभावं प्रतिपादयितुमाह ये त्विति तुरुक्तपक्षवैलक्ष
ण्ये ये तु नः सर्वाणि विहितानि स्वाभाविकानि च कर्माणि मयी
श्वरे संन्यस्य समर्प्य मत्परा अनुध्यानेन सत्यवमर्पणाख्यागेन मदेक
निष्ठाः सन्तः तथानन्येन न विद्यते अन्यद्ध्यानेश्वरं हेयाचरं वस्तु
यस्मिंस्तादृशेनैव योगेन ध्यानयोगेन मामीश्वरात्मानमहं ता
संवेद्यं ध्यायन्त उपासते लक्षणे विद्यमानेन शास्त्राख्यानात्मकेमे
वोपासनमत्र लक्ष्यते ६ ॥

## पंचोली टीका

सगुणोपासकानां मद्भक्तानां मत्प्रसादादनायासेनैव सिद्धिः भव
तीत्याह ये त्विति तु पुनः ये सर्वाणि कर्माणि मयि संन्यस्य मत्प
रा अनन्येनैव योगेन न विद्यते अन्यत् विश्वरूपं देवमात्मानं मुक्त्वा
आलंबनं यस्य सोऽनन्यस्तेन अनन्येनैव योगेन समाधिना मां
ध्यायन्त उपासते ६ ॥

## रणवीरसमिद्धोधिनी

सगुणोपासकानां क्लेशं विना परमेश्वरप्रसादान्निर्गुणब्रह्मफला
वाप्तिरित्येतमर्थं द्वाभ्यामाह ये त्विति द्वाभ्यां तु पक्षः पूर्वोक्त
पक्षान्निवृत्त्यर्थः ये भक्ताः सर्वाणि कर्माणि मयीश्वरे समर्प्य
मत्परा अहं वासुदेव एव परः प्रकृष्टः प्रतिविषयो येषां ते अन
न्येनाविद्यमानमन्यदालंबनं यस्य तेन भक्तियोगेन मामीश्वरं
मां दृष्टयनिधानं द्विभुजं चतुर्भुजं वा पीतवस्त्रं शंखचक्रगदापद्मधरं
सिंहासनवादिरूपं वा चिंतयन्तः पर्युपासते निरंतरं भजन्ति

34

तेषां भक्तानां मय्यावेशितचेतसां मयि यथोक्तरूपे आवेशितं
प्रवेशितं चेतसां मयि येषां तेषां भक्तानामहमुपासितदेवता मृ
त्युसंसारसागरात् मृत्युयुक्तः संसारो मृत्युसंसारः स एव सागर
इव सागरो दुस्तरत्वात्तस्मात्समुद्धर्ता न चिरात्क्षिप्रमेवास्मिन्जन्म
नि भवामि इति ७॥

मधुभाष्य

ये त्वित्यादिना उक्तं च सोऽकरणस्मृतो उपासते ये तु कथं वा स
देवमव्यक्तादेशीप्सितं किं तु तेषामिति तेषामेकांतिनः श्रे
ष्ठास्ते चैवानन्यदेवताः अहमेव गतिस्तेषां निराशीकर्म
कारिणामिति मोक्षधर्मे अज्ञानपूर्वादभ्यासाज्ज्ञानमेव विशिष्य
ते ज्ञानमात्राद्धि सज्ञानं ध्यानं तथा च सामवेदे अनभिज्ञानवा
त्वाचा अधिकं केवलाभ्यासाज्ज्ञानं तस्मादपि ततः ध्यानं तत
श्चापरोक्ष्यं ततः प्रीतिर्भविष्यतीति ध्यानात्कर्मफलत्याग इ
ति श्रुतिः अन्यथा कथमसमर्थोऽसीत्युच्यते ततयोक्तत्क
र्मसन्न्यासात्कर्मयोगो विशिष्यते इति चोक्तम् सर्वाधिकध्या
नमुदाहरति ध्यानाधिके ज्ञानभक्ती परात्मन् कर्मफला।
कांक्षमथो विरागस्त्यागस्तेन ध्यानफलाफलोऽहीति कांक्ष
यत्राश्रयणत्वाद्वा वाक्यसामर्थ्यमसमर्थो विषयत्वोक्तेः नान्यथा
भावस्तत्र च प्रतीयते ध्यानादिमात्रकारणत्वाच्च त्यागस्तु
ति युक्ता केवलध्यानात्फलत्यागयुक्तं ध्यानमधिकं ध्यान
युक्तत्याग एवाभोक्तः अन्यथा कथं त्यागाच्छान्तिरनंतरमि
त्युच्येत कथं च ध्यानादाधिक्यं तथा च गोपवनश्रुतवाचा ध्या
नात्तु केवलात्त्यागयुक्तं तदधिकं भवेदिति न हि त्यागमात्रा
दनन्तरमेव मुक्तिर्भवति भवति च ध्यानयुक्तात् केवलत्याग

स्तुतिरेवमपिभवति यथानेनश्लोकोनेतानान्यथेत्युक्ते सर्वा
रंभपरित्यागी शुभाशुभपरित्यागीत्यादेः सामान्यविशेष
व्याख्यानव्याख्येयभावोनपुनरुक्तिः हर्षादिभिर्मुक्तइत्युक्ते
कदाचित्कमपिभवतीतियोनहृष्यतीत्यादि उपचारपरिहा
रार्थंपूर्वप्राप्तिकस्थापनार्थभक्त्यभ्यासः येतुसर्वाणिकर्मा
णीत्यादेः प्रपंचपथःपिंडीकृत्योपसंहरति ८॥

35

### भाषा अनुवाद टीका

परन्तु मेरे भक्त मेरी कृपा से अनायास सिद्ध होते हैं यह दुईश्लोक के द्वारा कहते हैं कि जो मनुष्य परमेश्वर स्वरूप मेरे को सकल कर्म अर्पण पूर्वक मत्परायण कहे अनन्यभाव से मेरे में तत्पर होयहैं तेमेरा ध्यान उपासना करते हैं अनन्य भाव कहे नहीं है अन्य वस्तु मे भाव प्रीति जिस मे ६ ॥

### दोहा

जो सम कर्म दि मोहिमे अर्प मोहि रत होय अनन्य योग सें मो
हि हुं ध्याय उपासें सोय ६॥

36

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् भ-
वामि नचिरात्पार्थ मय्यावेशितचेतसां ७

शांकरभाष्ये टीका १

तेषां किं तेषामिति तेषां मदुपासनैकपराणां अहमीश्वरः समुद्ध-
र्त्ता कुत इत्याह मृत्युसंसारसागरात् मृत्युयुक्तः संसारो मृत्युसंसा-
रः स एव सागरवत् सागरो दुस्तरत्वात् तस्मान्मृत्युसंसारसाग-
रादहं तेषां समुद्धर्त्ता भवामि न चिरात् किं तर्हि क्षिप्रमेव हे पा-
र्थ मय्यावेशितचेतसां मयि विश्वरूपे आवेशितं समाहितं चेतो
येषां ते मय्यावेशितचेतसस्तेषां ७ ॥

आनंदगिरिकृत टीका २

तेषां भगवद्ध्यायिनां किं फलमिति शङ्कामनूद्य फलमाह ते-
षामित्यादिना समुद्धर्त्ता सम्यगुद्धर्त्तेत्यज्ञानादिबन्धप्रदानेनेत्यर्थः
मृत्युरज्ञानं मरणाद्यनर्थहेतुत्वात्तेन कार्येण तया युक्तः संसारः ७

स्वामिकृत टीका ३

एवं मयि आवेशितं चेतो येषां तेषां मृत्युयुक्तात्संसारसागरादहं सम्य-
गुद्धर्त्ता अचिरेणैव भवामि ७ ॥

पिशाचभाष्ये टीका स्पष्टार्था ४

रामानुजभाष्ये टीका ५

तेषां मत्प्राप्तिविरोधितया मृत्युभूतात्संसाराख्यात्सागरादहमचि-
रेणैव कालेन समुद्धर्त्ता भवामि [illegible] ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्था [illegible] ॥

परमार्थप्रपा टीका ७

प्र तथा तेषां मयि मय्यावेशितं वाशितं चित्तं यैस्तेषां मृत्युरूपाणां मृत्युसं-
सारसागरादहमचिरेण समुद्धर्त्ता भवामि मृत्युयुक्तसंसरणं संसारो
जन्म एव जन्ममरणरूपात्सागरात् तेषां केषां ये तु सर्वाणि कर्मा-
णि मयि संन्यस्य मत्पराः मदेकनिष्ठाः संजः न विद्यते [illegible] नोभ

श्री॰
गी॰ टी॰
त्रा॰



न्नीयो यस्मिन्नित्यनन्ययोगस्तेन मां ध्यायंत उपासते उपासनां कुर्वं
ते भाषामिति प्रश्नार्थमर्थः दुःसाध्यकर्मणामाश्रयं विना न सिध्यति प
थ्यानरणाभ्यासवतोपि वाहुभ्यां भागीरथीं तितीर्षोर्नु विकाश्रयेण
भवितव्यो अन्यथा श्रांतहस्तपादः सन्मध्य एव मज्जति एवं कर्म
योगज्ञानवानपि मदाश्रयं विना बहुलमाउज्येन प्राप्नोति यतः क्षिप्ता
दिविक्षेपशतैः पुनर्निवर्त्यते तदुक्तं महापुराणे तथा न ते माधव ता
वकाः क्वचिद्भ्रश्यंति मार्गात्त्वयि बद्धसौहृदाः त्वयाभिगुप्ता विचरं
ति निर्भया विनायकानीकपमूर्द्धसु प्रभो इत्यादि ७ ॥

वनमाली टीका ८

तेषां योगिनां नवधा भक्तिमतां वोक्तप्रकारेण मय्यावेशितचेतसाम
हं सर्वेश्वरो मृत्युसंसारसागरान्मृत्युप्रकोपः संसारसागरस्तस्माद्नाया सार
सेन समुद्धर्त्ता भवामि न चिरान्तत्क्षिप्रमेव तस्मिन्नेव जन्मनि एके वा
ऽम लमन्यतत्त्वापेक्षयानमत्येन विज्ञेयाथ केमां मत्वाष्टांगयोगेन मयि
चित्तैकाग्र्यं कुर्वंति तेषां चिरस्थैर्ये सम्प्रज्ञात समाधौ मत्प्रसादः ये
चाष्टांगयोगेन नवधा भक्त्या [illegible]तिलिहे न मत्प्रीत्यर्थे कर्माणि सर्व
के मयि वेतो धारयंति तेषां तत्क्षणमेव तत्प्रसाद इति भावः ७ ॥

ऊतमवैजयन्ती टीका ९

तेषामिति हे पार्थ मय्यावेशितचेतसां मदेकानुरक्तमनसां तेषां मे॰
कांतिनां भक्तानां मृत्युसंसारसागरात् मृत्युरूपात् संसाराख्यात्सा
ऽदु गरात्सागरवद्दुस्तरात् अचिरादचिरेणैव कालेनाहमेवानित्वरया
नत्स्वामि विलंबासहमानः समुद्धर्त्ता सम्यकूनान् स्वमात्मानं
दर्शयित्वा सर्वकर्माणि संन्यासादिकं मन्वामि विरोधकत्वं पंकृ
त्वाभिधने हृदयग्रंथिच्छिद्यते सर्वसंशयाः छीयंते चास्य कर्माणि
तस्मिन्दृष्टे परावरे इति स्मृतेः उद्धर्त्ता उद्गति प्रापको भवामि अचि
रादित्यनेनाचिरादिगतिं विना भक्तिविवशोऽहमतित्वरयानानारू
ढकं यमारोप्य स्वधाम प्रापयामीति सूचितम् नयामि परमं स्थान
मचिरादिगतिं विना मत्स्कंधमारोप्य यथेष्टमनिवारित इति वारा
हवचनात् अतः सर्वकर्मादिसाधननिरपेक्षैव मद्भक्तिरभीष्टसा
धिका यावै साधनसंपत्तिः पुरुषार्थचतुष्टये तया विना न तदाप्नोति
नरो नारायणाश्रय इति नारायणीयात्सर्वधर्मा॑किनाविस्मानाम
ज

मात्रैकजल्पकाः स्वत्वेन यां गतिं यांति न तां सर्वेपि धार्मिकाः
इति पद्माच्च १ मधुसूदनीटीका १०

तेषां मयि आवेशितचेतसां मयि यथोक्ते आवेशितमेकाग्रत-
या प्रवेशितं चेतो यैस्तेषामहं सततोपासितो भगवान्मृत्युसं-
सारसागरात् मृत्युयुक्तो यः संसारः मिथ्याज्ञानतत्कार्यप्र-
पंचः स एव सागर इव दुस्तरः तस्मात्समुद्धर्त्ता सम्यगनायासे-
न उत्तर्द्धः सर्वबाधावधिभूते शुद्धे ब्रह्मणि धर्त्ता धारयि-
ताज्ञानावष्टंभदानेन भवामि न चिरात् शीघ्रमेव तस्मिन्ने-
व जन्मनि हे पार्थेति संबोधनमाश्वासार्थं १ ॥

सदानंदीटीका ११

तेषामेकाग्रभावेन मय्यावेशितचेतसां मिथ्याज्ञानं च तत्-
कार्यं मृत्युरूपसागरात् १ अनायासेन सर्वोर्द्ध्वं शुद्धे ब्रह्म-
णि चिद्घने सर्वबाधावधौ तत्त्वज्ञानदानेन समुद्धर्ता २ अहं धा-
रयिता पार्थ तस्मिन्नेवैकजन्मनि यस्मात्ते सोऽप्यवगुणसं-
तमारवार्द्धेः सोऽदर्श्यसारवासिकाप्रशमेप्सनीप्साः लोका-
स्मनंति हृपयाचिरजोभिरद्धानं वा सुदेवमुपयामि समोश-
रणपम् ४ १ ॥ नीलकंठीटीका १२

तेषां ध्यायिनां न चिरात् शीघ्रमेवाहं समुद्धर्ता समुद्धरणक-
र्ता यतस्ते मयि सगुणे विश्वरूपे आवेशितचेतसो भवंति ।
अतो अक्षरासक्ता अपि शीघ्रमेव परं पदमारोढुमर्हा इति ।
नाव्यक्तेऽत्यंताभिनिवेष्टव्यमिति भावः १ ॥

आनंदीटीका

येतु ये तु नररूपासकेन्ये साकारोपासकाः तेषां ज्ञा-
नकर्मसमुच्चयानुष्ठायिनां न चिरात्स्वल्पकालेनैव मृत्यु

गी॰ मरणंसंसारोजन्मताविवडस्तरत्वात्समुद्रस्तस्मात्समुद्ध
टी॰ र्तास्मि ७ ॥
द्वा॰

## रामकंठी टीका

शुद्धयोगेणवाभक्त्यामेवंतेतेषांतथाविधकर्मयोगिनां
नचिरादव्यक्तोपासकापेक्षयाल्पीयसाकालेनाहंमृत्युसं
38
सारसागरात्पुनःपुनर्नाशोत्पादप्रबंधयययोधेःसमुद्धर्ता
सम्यगुत्तारकोभवामि कीदृशानांमयिपरमकारुण्य
रमेश्वरेआवेशितचेतसांमद्भावनयासमर्पितांतःकर
णानां ७ ॥

## लासिकी टीका

तेषामिति तेषांतादृशानांमय्युक्तस्वरूपेआवेशितमभेदे
नसमर्पितंचेतोयैः तेषांकर्मयोगिनांनचिरादक्षरात्मो
पासकापेक्षयाऽल्पीयसाकालेनजन्ममरणरूपात्समुद्रा
दहंसम्यगुत्तारकोभवामि ७ ॥

## पंचोली टीका

तेषांफलमाह तेषामिति हेपार्थअहंतेषांमय्यावेशित
चेतसांमृत्युसंसारसागरात् मृत्युयुक्तःसंसारःमृत्युसं
सारःसएवडस्तरत्वात् सागरइवसागरः तस्मान्मृत्युसं
सारसागरात् क्षिप्रमेवसमुद्धर्ताभवामि ७ ॥

रणवीरसमिद्धोधिनी॥

स्पष्टार्थः ७॥

मधुभाष्य

७॥

## भाषा अनुवाद टीका

इस प्रकार से जिनोने मेरे मे चित्त लगाया है उनका हे पार्थ त
काल इस मृत्यु युक्त संसार सागरसे उद्धार करनेवाला मै हों अ
र्थात् एकाग्रचित्त भक्तजनों को मै संसार दुःख से उद्धारकर्त्ता हूं ७

दोहा

मृत्युसंसारसमुद्रसें तेहिं उद्धारक मैंह होवोंसिद्धहिअर्जु
नमोवशाहैं चितजेह ७॥

मय्येवमनआधत्स्वमयिबुद्धिंनिवेशय निव-
सिष्यसिमय्येवअतऊर्ध्वंनसंशयः ८ ॥

शांकरभाष्य टीका १

यतएवं तस्मात् मय्येवेति मय्येव विश्वरूपईश्वरे मनः संकल्पवि
कल्पात्मकमाधत्स्व स्थापय मय्येवाध्यवसायं कुर्वतीं बुद्धिं आधत्
स्व निवेशय ततस्तेन किं स्यादिति शृणु निवसिष्यसि निवत्स्यसि
निश्चयेनमदात्मना मयि निवासं करिष्यस्येव अतः शरीरपातादू
र्द्ध्वं न संशयः संशयोत्र न कर्त्तव्यः ८ ॥

आनंदगिरिकृत टीका २

भगवदुपासना विशिष्टफलेत्येवं यतः सिद्धमतोभगवन्निष्ठया भ
वितव्यमित्याह यत इति अस्मिन्नाकरणे श्लोकद्वयार्थं मनोबु
द्ध्योर्भगवत्यवस्थापने प्रत्येकं फलमाह तत इति भगवन्निष्ठ
स्य तस्मात्प्रतिबन्धाभावं सूचयति संशयोत्रेति ८ ॥

स्वामिकृत टीका ३

यस्मादेवंतस्मान्मय्येवेति मय्येवसंकल्पात्मकंमनःआधत्स्वस्थिरीकु
रु बुद्धिमपिअध्यवसायात्मिकांमय्येवप्रवेशय एवंकुर्वन्मत्प्रसा
देनलब्धज्ञानःसन्नतऊर्ध्वदेहांतेमय्येवनिवसिष्यसिनिवत्स्यसिम
दात्मना वासंकरिष्यसिनात्रसंशयः तथाचश्रुतिःदेहांतेदेवःपरंब्र
ह्मतारकंव्याचष्टइति ८ ॥ पिशाचभाष्य टीका ४ स्पष्टार्थं

रामानुजभाष्य टीका ५

\+ अतऊर्ध्वंमय्येवनिवसिष्यसिअहमेवपरमप्राप्यइत्यध्यवसायपूर्व
कमनोनिवेशनानंतरमेवमयिनिवसिष्यसीत्यर्थः ८ ॥

\+ अतोतिशयज्ञानार्थत्वात्सु
लभत्वादविरलभ्यत्वाच्चमय्ये
वमनआधत्स्वमयिमनःसमा
धानंकुरुष्वमयिबुद्धिंनिवे
शयअहमेवपरमंप्राप्यःइत्यध्य
वसायंकुरु +

अभिनवगुप्तकृत टीका ६

आत्मोपदेशेनतयेसर्वंमयिसंन्यस्यंतितेषामहंसमुद्धर्त्तासकलवि
घ्नादिक्लेशेभ्यः येनसमावेशनेव्याख्यानेनतथाचैवएवोक्तमोपायोगाकृ
त्रिमत्वात् तथाचममस्तोत्रेविशिष्टकरणसनाथितिममापिसंभा
वनाविभावितेनतयायदाकमपिवायसुल्लासयेत् नसानवसदाट्रि
नामरसवाहिनीयाचितिर्यतस्त्रितयमत्रियोस्फुटमित्राषिसंवेयने

श्री॰
गी॰ टी॰
द्वा॰

40

यदात्तविरागैर्धनः स्ववशावर्त्तितो संप्रपन्नहृत्त्रिमसमन्हलसमुलकके
पवाष्पानुगः शरीरनिरपेक्षतो स्फुटमुपादरानश्चितः स्वयंकृतोतिव
ष्पने युगपदेव बोधानलः तदैवनवदेविनहृयुकृपाश्रियैवशीनेम
हेशामवबुध्यते विवशापाशसंतोभकामित्यादि ८ ॥

परमार्थप्रपा टीका ९

यद्येवं तर्हि मय्येवेति संकल्पविकल्पात्मकं मनः मय्येव आधत्स्व
स्थिरीकुरु तथा बुद्धिं व्यवसायात्मिकां मय्येव निवेशय प्रवेशय मु
तऊर्ध्वं मनोनन्तरं मय्येव निवसिष्यसि मदाकारो भविष्यति तदुक्तं
चेतो मन नमनं गजेन्द्र मदभरा वने भ्रमनं दिशो डुः संकल्पविकल्पनिव
त्तिर्भावितमदाकारो भविष्यसि तदुक्तं चेतो मनन मतंगजेन्द्र मदभराश्रा
न्तभ्रमं तं दिशो डुः संकल्पविकल्पदन्तेर्दलितप्रोटामयेर्यद्युमेत्तु यत्
हनस्पबोधपतिगाडभूयः समाक्रामितं यथाश्रायो जितमभ्यं तेनवहृदेए ६९
लीनमस्ति हृदयं ८ ॥

वनमाली टीका ८

यथा भक्तोपासकस्यापि कुमतो भक्तिं विधत्ते मयीति मय्येवानेनम
ल्पविक हिमसंकल्पात्मकेमनआधत्स्व धारयतनाम्यत्र विषयान्तरे देवांत
या रेनत्वांतरेवा मय्येव व्यवसायात्मिकां बुद्धिं निश्चयात्मबुद्धिहतिं निवेशय
विषयान्तरेभ्यो व्याहृत्य निरंतरं मय्येव निवेशयेत्यर्थः कर्हि मत्प्राप्तो
नेतरं मदपरोक्षप्रसादहारा मय्येव तिवसिष्यसि मत्स्वरूपविशेषव
त्तृयो मत्सामीप्यान्योसायुज्यमुक्तिं प्राप्स्यसीत्यत्र सर्वेश्वरस्य परमेश्वरस्य
वचनेनसंशयः कर्तव्य इति शेषः एवमुक्तरूपया सौधिः पादसेवा
धैः निरंजनः परमं साम्यमुपैतीति श्रुतेः ८ ॥ २

कुसमवैजयन्ती टीका ९

यस्मादस्य मदुपासनस्यातिदुर्लभत्वमविरलत्वं ज्ञात्वा नार्थकत्वं वा
स्ति तस्मान्मय्येव मनो बुद्धिं समाधानं त्वं कुर्वित्याह मय्येव मन इति म
य्येवनन्तस्वरूपे मनः संकल्पात्मकमाधत्स्व समाधानं कुरु मय्य
मेव च बुद्धिं व्यवसायात्मिकां त्वं निवेशय श्रीकृष्णस्यैव परमप्रा
प्यो नान्य इति निश्चयं कुरु एवं कुर्वाणस्त्वमतऊर्ध्वं एव भगवान् कृ
ष्ण एव परमप्राप्य इति निश्चयपूर्वकमतो निवेशनानन्तरमेव मय्ये

वपरमैश्वर्यरूपेसर्वेश्वरेश्वरेभगवतिमय्येवनिवसिष्यसिनिव
त्स्यसिनतुस्वात्मनिष्ठवदंतिकष्टान्मोप्राप्स्यसिनसंशयस्त्वयात्रप्र
तिबंधशंकानकर्तव्येत्यर्थः ८ ॥

तदेवमियताप्रबंधेनसगुणो **मधुसूदनी टीका ९** पासनंस्तुत्वाइदानीं तां विधत्ते ॥

मय्येवसगुणेब्रह्मणिमनः संकल्पविकल्पात्मकमाधत्स्वस्थापय
सर्वामनोवृत्तीर्मद्विषयाएवकुरु एवकारानुषंगेनमय्येवबुद्धि
मध्यवसायलक्षणांनिवेशय सर्वाबुद्धिवृत्तीर्मद्विषयाएवकुरु।
विषयांतरपरित्यागेनसर्वदामांचिंतयेत्यर्थः ततःकिंस्यादित्यत
आह निवसिष्यसिनिवत्स्यसिलब्धज्ञानःसन्मदात्मनामय्येवशुद्धे
ब्रह्मण्येव अतऊर्ध्वमेतद्देहांतेनसंशयःनात्रप्रतिबंधशंकाकर्त
व्येत्यर्थः मय्येवअतऊर्ध्वमित्यत्रसंध्यभावःश्लोकपूरणार्थः [illegible]
[illegible] ८ ॥

**सदानंदी टीका ११**

प्रबंधेनैतनाख्येवंसगुणोपासनोहरिः स्तुत्वेदानींविधत्तेतंमय्येवे
त्यादिनास्फुटं १ मय्येवसगुणेविश्वेसंकल्पात्मकंमनः स्थापय
वैतथाबुद्धिंनिश्चयैकस्वरूपिणीं विषयांतरसंत्यागात्मामीशमनु
चिंतय एवंचिंतयतस्तेयत्फलंस्यात्कथ्यतेतत्स्फुटं २ निवत्स्यसिप्र
विध्येयेलब्धज्ञानोमहात्मना एतद्देहलयादूर्ध्वंनात्रशंकास्तिकाच
न च ब्रह्मादयोपिसततंनैकानिसारविज्ञायस्मिन्रत्नाख्यवगणाप्यप
दंस्वकीयंपद्मारत्नाकमलसद्विहायचत्र श्रीशानमेवमनसाह
विमाश्रयामि ५ ८ ॥

**नीलकंठी टीका १२**

यस्मादेवंतस्मान्मय्येवविश्वरूपेईश्वरेमनःसंकल्पविकल्पात्मकं
आधत्स्वस्थापयमय्येवाध्यवसायंकुर्वतींबुद्धिंनिवेशयतत्फलंच
निवसिष्यसिनिवत्स्यसिनिश्चयेनमदात्मनामय्येवासंकरिष्यसि
अतःशरीरपातादूर्ध्वं नसंशयःकर्तव्यः ८ ॥

**आनंदी टीका**

अत्रोपपत्तिमाह— मय्येवमयिसाकारेएवमनःसंकल्पविकल्पात्मकम् बुद्धिंनिश्चयात्मि

श्री
गी टी
टा

अथ कथमिदमित्याश्चर्यमुपपद्यते योलोकवत्सर्वा क्रियमा
णास्वपि द्वैतपरंब्रह्मस्वरू
पावच्युति रूपपरमसमा
धिनिष्ठतिरित्यत्रशंकां
प्रतिपादितामपिभक्ति
सूक्ष्मत्वातद्दुर्ग्रहामुपदे
शप्रतिपत्तिस्थैर्यायपु
नराह ॥

काम एवमत्र मेयोगं मे यम यो गः पूर्वं ज्ञानकर्मसमुच्चयरूपभक्तिमा-
श्रितः मय्येव निवसत्यसिद्देहपातोत्तरं मत्स्वायुज्यमेव प्राप्नोतीत्यर्थः
८ ॥

रामकंठीटीका

इह सर्वज्ञानानां मनोवुद्धिनिबंधनाः सर्वार्थसंविदस्तथाहि मनोवा-
ह्याद्विप्रकारा स्वतंत्रविकल्पात्मिका पूर्वानुभूतस्मरणरूपविकल्पा-
त्मिका च वुद्धिस्तु निश्चयात्मिकत्वान्निर्विकल्पैवं स्थिते मय्येवै-
कस्मिन्परमार्थसति नित्योदितनिर्मलचित्प्रकाशस्वरूपे परमात्मनि य
थोक्तस्वरूपं मनस्थापत्व सन्निवेशय यद्यन्मनसा विकल्पयसि तत्तन्म
दात्मकत्वेन जानीहि तथा वुद्धिं यथोक्तरूपं मय्येव यथोक्तस्वरूपे निवे-
श्य समर्पय यद्यद्वुद्ध्या निश्चिनुषे तत्तन्मदात्मकत्वेनैव जानीहि अयम
त्रतात्पर्यार्थः योयउक्तो विकल्पो निश्चयमानोवा तेन तेन रूपेणासंवे
द्यमानत्वादेव संवित्प्रकाशादभिन्नः संविदात्मकश्च प्रकाशो ममैव पारमा-
र्थिकस्यैकस्य संवेदनस्याव्यभिचारी धर्म इति वास्तवेन रूपेण सर्वभावाः।
सर्वावस्थासु मदात्मका एव केवलं मायाव्यामोहितो लोकस्तान्निह्नु
याद्यावत्किं नेति तत्तत्सम्प्रवृत्तात्मोपदेशेन सम्यग्मे समाराधितगुद्धिस्तेनो-
योगपनातिशयायातमात्मस्वरूपमनुभावितः स सर्वावस्थासु सर्वे
भावान्परमार्थतो मत्प्रकाशकत्वेनैव परिमृषेत्येवंविधं मत्संयो
गांतरापेतया प्रकृष्टं योगसमाधिमास्थितः समाश्रितः स त्वस्थ एव प
रमात्मनि निवसत्यसिस्थितिलयमेपरमात्मसमीपत्वेनायं कर्मयोग
स्य यथोक्तज्ञानसंस्कृतविहितकर्मानुष्ठानमात्रमाचरतात्सर्वथास
र्वदा सर्वत्र संपूर्णरूपत्वेनानुभूयमानत्वादीर्घकालनैरंतर्यादरसा
ध्यमानक्रमसम्यक्त्वबहुविधानुष्ठाननिष्ठानतयोगाभिकथाकराविक
र्षविदनुभवनीयस्वरूपादस्मान्मयोगात्ज्ञनमतं
॥

लास्तिकी वल्लभ्यांटीका

नत्रकर्मयोगिनोलोकवदेवकर्माणि आहृतस्य कथं भवदनुस्मरणलक्षणेविम
र्शात्यागउपपद्यते एतदत्याश्चर्यमिवभासते इत्यतआह ॥

त

मय्येवेश्वरात्मनि निरंतरं याकतिपयं कालं मनो मननात्मकमन्तः
करणमाधत्स्व सन्निवेशय मय्येव बुद्धिं बोधशक्तिं समर्पय अत
ऊर्ध्वं मनोबुद्ध्योः सम्यक्निवेशानानंतरं मय्येव मुक्तोपि निवसिष्यसि
मद् विश्रांतो भवसि व्यवहारेपि न विमर्शाद्गुरुपसीत्यर्थः नात्र संशयः
[illegible]
[illegible] ८ ॥ ॥

पंचोलीटीका

यस्मादेवं तस्मात् मयीति मनः संकल्पविकल्पात्मकं मय्येव विश्व
रूपे ईश्वरे आधत्स्व स्थापय बुद्धिं निश्चयात्मिकां मयीश्वरे निवेशय
आरोपय अत ऊर्ध्वं देहापातोत्तरकाले त्वमपि मय्येव निविशिष्यसि ८

रणवीरसमिद्धोधिनी ॥

यस्मादेवं तस्मान्मय्येव संकल्पात्मकं मनः आधत्स्व स्थिरीकुरु
बुद्धिमपि व्यवसायात्मिकां मय्येव प्रवेशय ततः किं स्यादित्यत
आह अत ऊर्ध्वं देहांते मय्येव निवसिष्यसि निवत्स्यसि मदात्मना
वासं करिष्यसि नात्र संशयः देहांते देवः परं ब्रह्म तारकं व्याचष्टे
इति श्रुतेः ८ ॥

मधुभाष्य

८ ॥

## भाषा अनुवाद टीका

इससे सं कल्प विकल्पात्मक मनको मेरे मे स्थिर करो और व्यव
सायात्मिका बुद्धिको भी मेरे मे लगावो तो देहके अन्तमे मेरी कृ
पासे तत्त्व ज्ञान को प्राप्त होय परमात्मा रूप मेरेमे स्थिति करके
वास करोगे इसमे कछु संशय नहीं हैं कोई श्रुति कहती है
कि सगुण उपासक को देहान्त होनेपर वह उपास्यदेव परब्रह्म
मन्त्र उपदेश करिके अपरोक्ष करके साक्षात करदेय है ८ ॥

## दोहा

मोमें धरमन आपनो मोमे बुद्धिनिवेश मोमे वसहुं अंत मे
यामे नाहि संदेस ८॥

43

अथचित्तंसमाधातुंनशक्नोषिमयिस्थिरं
अभ्यासयोगेनततोमामिच्छाप्तुंधनंजय ९

शांकरभाष्य टीका १

अथेतिअथएवंयथावोचामतथामयिचित्तं समाधातुं स्थापयितुं
स्थिरमचलं कर्तुं न शक्नोषि चेत्ततःपश्चादभ्यासयोगेन चित्तस्यैकस्मि
न्नालम्बने सर्वतः समाहृत्य पुनःपुनः स्थापनमभ्यासस्तत्पूर्वको
योगः समाधानलक्षणस्तेनाभ्यासयोगेन मां विश्वरूपमिच्छ प्राप्तुं
यत्न आप्तुं प्राप्तुं हे धनञ्जय ९ ॥

आनंदगिरिकृतटीका २

ततप्रदर्शनपूर्वकं भगवत्प्राप्त्युपायान्तरमाह अथेत्यादिना ९

स्वामिकृत टीका ३

अत्राशक्तंप्रतिसुगमोपायमाह अथेति स्थिरंयथाभवत्येवंमयि
चित्तंधारयितुंयदिशक्तोनभवसि तर्हिचित्तमेचित्तंपुनःप्रत्याहृत्य
मदनुस्मरणलक्षणोयोभ्यासयोगस्तेनमांप्राप्तुमिच्छप्रयत्नंकुरु ९

पिशाचभाष्य टीका ४

स्पष्टार्थं ९ ॥ ॥

रामानुजभाष्य टीका ५

अथेति अथसहसैवमयिस्थिरंचित्तंसमाधातुंनशक्नोषिततोभ्या
सयोगेनमांप्राप्तुमिच्छस्वाभाविकानवधिकातिशयसौन्दर्यसौशी
ल्यसौहार्दवात्सल्यकारुण्यमाधुर्यगाम्भीर्यौदार्यशौर्यवीर्यपराक्र
मसर्वज्ञत्वसत्यसंकल्पत्वसकलकारणत्वाद्यसंख्येयकल्याणगुण
सागरेनिखिलहेयप्रत्यनीकेमयिनिरतिशयप्रेमगर्भस्मृत्यभ्या
सयोगेनस्थिरंचित्तसमाधानेलब्ध्वामांप्राप्तुमिच्छ ९ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थं ९ ॥ ॥

परमार्थप्रपा टीका ७

अथोक्तोपायाशक्तत्वेपुनरुपायान्तरमाह अथेति अथमयिचित्तं
स्थिरंनिश्चलंसमाधातुम् कर्तुंयदिनशक्नोसितर्हि प्रत्याहृत्यम

श्री॰
गी॰टी॰
द्वा॰

55

दनुस्मरणरूपोयोभ्यासस्तेनमामाप्तुंप्राप्तुंइछांप्रयत्नंकुरु ९ ॥

वनमाली टीका ८

लक्षेपचित्तस्यैकतानत्वरूपध्यानासंभवेमनोनिवेशनेकलेमसाक्षा
सध्यानार्थमुपायांतरमाह अथेति अथपदंमयींद्रियागोचरेचित्तं
स्थिरंसमाधातुमेकाग्रंकर्तुंनशक्नोषितत्तर्हि अभ्यासयोगेनम
दाकारवृत्तप्रवाहरूपेणमदनुस्मरणाभ्यासेनमामाप्तुमिछकदा
भगवंतंप्राप्स्यामीतिचिंताप्रकोध्यानार्थमदनुस्मरणमनिशंकुर्वि
त्यर्थः ९ ॥

ऊहमवैजयन्ती टीका ९

ननुयेषामेवमनोहत्तिसत्त्वकेवलेस्थिरास्यात्तएवत्वांप्राप्नुयुस्तिम
मनुत्तादृशीनहत्तिनेस्मात्कथंत्वामहंप्राप्स्यामीतिचेत्तत्राह अथचि
त्तमितिहेधनंजययद्यप्येवमपिस्थिरंयथास्यात्तथाचित्तंस
माधानेसम्यगनायासेनाधातुंस्थापयितुंनशक्नोषिसमर्थोनभव
सितत्तर्हि अभ्यासयोगेनमनोऽन्यत्रगतमपमनसस्तत्तद्विषये
भ्यःसर्वेभ्यःपुनःपुनर्मय्येवस्थापनमभ्यासस्तत्पूर्वकोयोगस्समा॰
धिस्तेनमांसर्वेश्वरमाप्तुंप्राप्तुमिछकामयस्वराजसत्वादौवहूनशत्रू
न्जित्वातेभ्यस्त्वंवसुधनमाप्तवानसिशब्दादिविषयरूपान्शत्रू
न्जित्वातेभ्योमनोरूपंधनमाप्तुमपिसमर्थोभविष्यसीतिनाश्चर्य
मितिसंबोधनाभिप्रायः ९ ॥

इदानींसगुणब्रह्मध्याना
सक्तानामशक्तितार
तम्येनप्रथमं

मधुसूदनी टीका ९

अतिमादौवाह्यभगवद्ध्यानाभ्यासस्तदशक्तौभागवतधर्मानुष्ठानेन
तदशक्तौसर्वकर्मफलत्यागइतित्रीणिसाधनानित्रिभिःश्लोकैर्विध
त्ते अथपक्षांतरेस्थिरंयथास्यात्तथाचित्तंसमाधातुंस्थापयितुंमयि
नशक्नोषिचेत् ततपकस्मिन्प्रतिमादावालंबनेसर्वतःसमाहृत्य
चेतसःपुनःपुनःस्थापनमभ्यासःतत्पूर्वकोयोगःसमाधिःतेना
भ्यासयोगेनमामाप्तुमिछयत्नस्वहेधनंजय बहूनशत्रूनजित्वा
धनमाहृतवानसिराजसूयार्थमेकंमनःशत्रुंजित्वातत्त्वज्ञानध
नमाहरिष्यसीतिनतवाश्चर्यमितिसंबोधनार्थः ९ ॥

सदानंदी टीका ॥

इदानीं सगुणब्रह्मध्यानाशक्तोऽन्तरंगो हरिः अशक्तितारतम्येन वि
धत्ते साधनत्रयं १ प्रतिमादौ हरिध्यानाभ्यासः स्यात्प्रथमे त्वशक्तो न
दशक्तोऽन्यैः कार्यो धर्मो भागवतः सदा २ सर्वकर्मफलत्यागस्त
दशक्तौ च साधने अशक्तितारतम्येन साधनत्रयमुच्यते ३ मदर्क
रीत्या चित्तं चेत्स्थापयितुं क्षमः मयीश्वरे वासुदेवे निश्चले तर्हि
सर्वदा आद्यमसर्वतो वा स्यादेकस्मिन्नवलंबने चेतसः स्थापने
भूयो भूयोऽभ्यासः समुच्यते ५ तत्सर्वैकसमाधिर्यत्नेन मोक्षमामी
प्सुं यतस्व प्रतिमादौ चेत्तं कुतस्समाहितं ६ ॥

## नीलकंठी टीका १२

विश्वरूपधारणायामशक्तं प्रति आह अथेति मयि विश्वेश्वरे विश्व
रूपे अथ यदि चित्तं समाधातुं निवेशयितुं अचलं धारयितुं न शक्नो
षि ततस्तर्हि अभ्यासयोगेन चित्तस्यैकस्मिन्नालंबने बाले वा प्रति
माद्यालंबने सर्वतः समाहृत्य पुनः पुनः स्थापनमभ्यासस्तत्पूर्व
को योगः समाधानलक्षणस्तेनाभ्यासयोगेन मां विश्वरूपमाप्तुं
प्राप्तुमिच्छ प्रार्थयस्व हे धनंजय ९ ॥

संयम प्रकारमेवोपदिशति ॥

## आनंदीटीका

अभ्यासयोगेन षष्ठाध्यायोक्तक्रमेण चित्तसंयमेन मामाप्तुमिच्छ ९

## रामकंठीटीका

+ अथेति प्रकरणोपन्यासार्थं यदि यथा प्रतिपादितप्रकारेण यथोक्तस्व
रूपे मयि चित्तं मनोबुद्ध्यात्मकमंतःकरणं स्थिरं सर्वावस्थास्वविच
लावधानतया समावेशयितुं समर्पयितुं मत्स्वरूपाभेदेन भावयि
तुं न शक्नोषि न प्रभवसि ततोऽभ्यासयोगेन कर्मयोगं च तथा षष्ठाध्याय
संविधानेन तत्र योगशास्त्रप्रणीतेतिकर्तव्यतां विशिष्टेन वा चित्तवृ
त्तिनिरोधप्रयत्नात्मकाभ्यासप्रधानेन समाधिना मां यथोक्तस्वरूपा
मात्मभेदेन प्रतिपत्तुमिच्छ मत्स्वरूपप्राप्तिमभिसंधाय परित्यागेनाभ्या
सयोगमपि कर्मयोगयोग्यतारतम्यतमनुतिष्ठेत्यर्थः ९ ॥ ॥ ॥

+ एवं शुद्धं भगवत्स्वरूपोपासाक्रमं प्रतिपाद्य सर्वस्य कस्यचित्तत्रपात्रतामर्जुनवदसंभाव
यन्नर्जुनोपदेशेनैवोपायान्तराण्यनुज्ञामाह ॥

+ एवमीश्वरात्मनि विश्वात्मार्थेश्वरव्यक्तोपासनोक्रमसुक्ता अतोऽशक्तौ वैतदनुष्ठानस्यासंभवे सति गौणानि साधनान्तराण्याह ॥+

गी॰ टी॰ द्वा॰ 45

लाक्षिकी [illegible]टीका

+ अथ यदि मयि चित्तमन्तःकरणं यथोक्तप्रकारेण दृढेन नित्यनिश्चलतया मदभेदेनावस्थापयितुं न शक्नोषि न समर्थोसि ततस्तर्हि चित्तमविरतं पुनः पुनः प्रत्याहृत्य मदवस्थानलक्षणो योऽभ्यासयोगस्तेन मामात्मममभेदेन लब्धुमिच्छ प्रयत्नं कुरु [illegible] ९ ॥

पंचोलीटीका

अथासक्तं प्रति सुगमोपायमाह अथेति हे धनंजय एवं मदुक्तप्रकारेण चित्तं मयि विश्वरूपे समाधातुं स्थापयितुं अचलेकर्तुं न शक्नोषि चेत् ततः पश्चादभ्यासयोगेन चित्तस्यैकस्मिन्नालंबने सर्वतः समाहृत्य पुनः स्थापनं अभ्यासः तत्पूर्वोक्तश्लोकेन अभ्यासयोगेन मनःसमाधानलक्षणेन मां विश्वरूपं प्राप्तुमिच्छ प्रार्थयस्व ९

धनवीरसमिद्धोधिनी

अत्रैवाशक्तान्प्रति सुगममनुपायत्रयं त्रिभिः श्लोकैराह अथेति अथ पक्षांतरे स्थिरं यथा स्यात्तथा चित्तं मयि धारयितुं चेन्न शक्नोषि तत एकस्मिन्प्रतिमादावालंबने सर्वतः संहृत्य चेतसः पुनः पुनः स्थापनमभ्यासस्तत्सर्वको योगो युक्तिस्तेन मामाप्तुमिच्छ प्रयत्नं कुरु यत्नं मयेति साकूतेपदं यथा रिपुं निवाधनमद्राक्षीस्तथैव मनो रिपुं विजित्य मत्स्वरूपं मा द्रक्ष्यसीति न तवाश्चर्यं ९॥

मधुभाष्य

९॥

भाषा अनुवाद टीका

और सगुण उपासनामे अशक्त पुरुष को सुगम उपाय कहते
हैं कि जो चित्तको मेरे मे थिर करनेन शकै तो हे धनञ्जय अर्जु
न विषयमे विक्षिप्त चित्त को विषयोंसे पुनः पुनः फेरि कर मे
रे स्मरण की अभ्यास से हमै प्राप्त होने की यत्न करै ९ ॥

दोहा

जो चित धारन थाकहो मोमेहूं थिर सोय अभ्यासयोगसें
मोहि तु प्राप्त धनंजय होय ९ ॥

## अभ्यासेप्यसमर्थोसि मत्कर्मपरमोभव
## मदर्थमपिकर्माणिकुर्वन्सिद्धिमवाप्स्यसि १०

शांकरभाष्ये टीका १

अभ्यासेपीति अभ्यासेप्यसमर्थोसि अशक्तोसि तर्हि मत्कर्मपरमो
भव मदर्थं कर्म मत्कर्म तत्परमोभव मत्कर्मप्रधानइत्यर्थः अभ्या
सेन विना मदर्थमपि कर्माणि केवलं कुर्वन् सिद्धिं सत्वशुद्धि
योगज्ञानप्राप्तिद्वारेणावाप्स्यसि १० ॥

आनंदगिरिकृत टीका २

एकमालम्बनं स्थूले प्रतिमादिसमाधाने ततोभ्यन्तरे विश्वरूपे
चित्तैकाग्र्ये हेताभिनिवेशादभ्यासाधीने योगेपि सामर्थ्याभावे पु
नरुपायान्तरमाह अभ्यासेपीति अभ्यासयोगेन विना भगवद
र्थंकर्माणि कुर्वाणस्य किं स्यादित्या शंक्याह अभ्यासेनेति सिद्धिः
ब्रह्मभावः अपि रिह अवधिसूचनार्थः १० ॥

स्वामिकृत टीका ३

यदि पुनः अभ्यासइति अभ्यासेपियद्यशक्तोसि तर्हि मत्प्रीत्यर्थंकर्मा
प्रजापति णि एकादश्युपवासव्रतचर्यानामसंकीर्तनादीनि तदनुष्ठानमेव
परमंयस्य तादृशोभव एवंभूतानि कर्माण्यपि मदर्थंकुर्वन् मोक्षं
प्राप्स्यसि १० ॥

पिशाचभाष्ये टीका ४

स्पष्टार्थं १० ॥

रामानुजभाष्ये टीका ५

अभ्यासेति अथैवंविधस्याभ्यासेप्यसमर्थोसि मत्कर्मपरमोभ
घाति वमदीयानिकर्माणि आलयनिर्माणोद्यानकरणप्रदीपारोपणमा
र्जनाभ्युक्षणोपलेपणपुष्पाहरणपूजनावर्त्तननामकीर्तनप्र
दक्षिणनमस्कारस्तुत्यादीनि तान्यत्यर्थप्रियत्वेनाचर अत्यर्थप्रिय
त्वेनमदर्थंकर्माणिकुर्वन्नचिरादभ्यासयोगपूर्विकां मयिस्थिरां
चित्तस्थितिंलब्ध्वामत्प्राप्तिरूपांसिद्धिमवाप्स्यसि १० ॥

अभिनवगुप्तकृत टीका ६

श्री॰
गी॰ टी॰
द्वा॰

47

तीव्रतरभगवद्भक्तिपानविरतरप्रसादितगुरुचरणानुग्रहेण वा
विनाऽपि लभ्यावेश इत्यभ्यासः अभ्यासोपि न शक्यते विक्षेपाभि
भवादतस्तन्नाशाय कर्मसु जपस्वाध्यायहोमादीकुरु १०॥

परमार्थप्रपा टीका ७

यदि त्वनः अभ्यास इति मदनुस्मरणरूपेऽभ्यासेपि असमर्थोसि त
र्हि मदर्थं यानि कर्माणि तपोदानव्रतादीनि तान्येव परमं यस्य तदेक
निष्ठो भव एवंविधानि कर्माणि मदर्थं कुर्वन्नपि सिद्धिं प्राप्स्यसि १० प॰

वनमाली टीका ८

मत्प्रीत्यर्थं कर्म मत्कर्म श्रवणकीर्तनादिकं भगवानेतत्पुरःकारयु
क्तिकर्मतेन सप्रवश्रीयतामिति बुद्ध्या योगं नयादानादिकं च कृतं
मत्कर्म तत्परस्तन्निष्ठो भव मदर्थं मत्प्रीत्यर्थमुक्तप्रकारेण कर्मा
ण्यपि कुर्वन् सिद्धिं मुक्तिमवाप्स्यसि १०॥

कुसमवैजयन्ती टीका ९

ननु वायोरिव मनसोऽतिचंचलत्वानस्य प्रत्याहारे मम न शक्तिरिति
चेत्तत्राह अभ्यासेप्यसमर्थोऽसीति यद्येवंविधस्त्वमभ्यासेप्यसम
र्थोऽसि तर्हि मत्प्रीणनार्थं मत्कर्मपरमो भव मदीयानि कर्माणि आ
लयनिर्माणोद्यानकारणप्रदीपारोपणमार्जनाभ्युक्षणोपलेप
नपुष्पवाटीसेचनतुलसीपुष्पाद्याहरणपूजनोद्गीतेन नामकीर्त
नप्रदक्षिणनमस्कारस्तुतिवाद्यगीतनृत्यादीन्यतिप्रेम्णा चरएव
मत्प्रीतिप्रियत्वेन मदर्थमप्यवधारणे मत्प्रसादप्रयोजनायैव न
नतु लोकप्रसादप्रतिष्ठाभोगनिमित्तं यकर्माणि स्वकराणि मत्स्वा
स्वपायानि कुर्वन्नकुर्वाणस्त्वं सिद्धिमवाप्स्यसि अचिरादभ्यासयोग
हविकामयिस्थिरोचित्ततस्थितिलब्ध्वा मत्साक्षिरूपां सिद्धिं मुक्तिं प्रा
प्स्यसीत्यर्थः १०॥

मधुसूदनी टीका १०

मत्प्रीणनार्थं कर्म मत्कर्म श्रवणकीर्तनादि भागवतधर्माः तत्प
रमः तदेकनिष्ठो भव अभ्यासासामर्थ्ये मदर्थं भगवद्धर्मसंज्ञ
कानि कर्माण्यपि कुर्वन् सिद्धिं सत्त्वभावलक्षणां मनःकरणशु
द्धिज्ञानोत्पत्तिद्वारेणावाप्स्यसि १०॥

सदानन्दी

तत्रापि यद्यशक्तोसि तर्हि मत्प्रीतिसाधनं मत्कीर्तनं मच्छ्रवणं मद
र्चनादिकर्म यत् १ धर्मोभागवतःसत्पात्तस्मिन्नेकरतोभव एवं
भागवतान्धर्मान्कुर्वन्निष्कामचेतसा २ सत्वशुद्ध्यात्मविज्ञानोत्प
त्तिद्वारेणमत्पदं सिद्धिंप्राप्स्यसिसद्योतिब्रह्मभावैकलक्षणां ३ १०

नीलकंठी टीका १२

अभ्यासेपीति अभ्यासेसर्वश्लोकोक्ते मत्कर्मे श्रवणंकीर्तनंवि
ष्णोःस्मरणंपादसेवनं अर्चनंवंदनंदास्यंसख्यमात्मनिवेदन
मिति नवविधभजनात्मकेभगवत्तोषार्थकर्ममत्कर्मशब्दि
ते तदेवपरमंआवश्यकंयस्यतादृशोभव कर्माणिश्रवणा
दीनिसिद्धिंसत्वशुद्धिं १० ॥

आनंदीटीका

योगाभ्यासेचेदशक्तस्त्वंमत्कर्मपरमोभवमदर्थंकर्माण्येवपरमा
णिप्रकृष्टान्यभीष्टसाधनानियस्यतादृशोभव यत्किमपिकरोषिचेत
स्तन्मयिसमर्पयन्सिद्धिमाप्स्यसीत्यर्थः १०॥

रामकंठीटीका

एवंविधेप्यभ्यासेभ्यासयोगेसमर्थोशक्तःसन्मत्कर्मपरमोमदर्थं
कर्माणिमत्कर्माणितान्येवपरमाण्यभीष्टसाधनतयाप्रकृष्टानिय
स्यसतथाविधोभवकर्मयोगाङ्गतयोपगतेश्वरप्रणिधाना
ख्यक्रियायोगस्यानुष्ठानमाचरेत्यर्थः ततोपिसिद्धिमन्तत्वरूपावा
प्तिलक्षणांसमाधिफलसिद्धिर्भवति अतएवाह मदर्थमपिकर्माणि
कुर्वन्सिद्धिमवाप्स्यसीति १०॥

लाक्षिकी धनपतीटीका

किंच — यद्यभ्यासेपिकृतश्चिदन्तरायादशक्तोसि तर्हिमत्कर्मपरमोभव
विघ्नविनाशायममेश्वरस्यप्रीत्युत्पादकानियानिकर्माणिजपस्वा
ध्यायपूजादीनितान्येवपरमाणि अवश्यकर्तव्येभ्यःकार्येभ्य उ
त्कृष्टानियस्यतादृशोभव कुतइत्यतआह मदर्थमपिकर्माणिकु
र्वन्सिद्धिमभीष्टतममहिंसांतिलक्षणांफलसिद्धिमवाप्स्यसि [illegible]
[illegible] १०॥

48

## पैचोलीटीका

अभ्यासासामर्थ्यप्रतिपत्त्यंतरमाह अभ्यासइति हेअर्जुनय।
दित्वमभ्यासेप्यसमर्थोसि तर्हिमत्कर्मपरमोभवमदर्थकर्मम
त्कर्मश्रौतस्मार्तादिकेदेवपूजापंचमहायज्ञादिकेममविष्णुरू॰
पस्यप्रीत्यर्थंक्रियमाणंकर्ममत्परमःमत्प्रधानोभवमदर्थमा॰
पिकर्माणिकुर्वन्सिद्धिमंतःकरणस्यशुद्धिंयोगज्ञानप्राप्तिद्वारे
णप्राप्स्यसि १०

## रणवीरसमिद्धेथिनी

अभ्यासेपि यदिनशक्तोसि तर्हि मत्प्रीत्यर्थं यानिकर्मा।
णिस्वधर्मस्थितिकत्वादायतितानिबुद्धादीनितदनुष्ठानमे
व परमंयस्यतादृशोभव एवं मदर्थकर्माणिकुर्वन्सिद्धिम।
वाप्स्यसि १०॥

## मधुभाष्य

१०॥

भाषा अनुवाद टीका

और जो अभ्यास करने मे समर्थ न होउ तो मत्प्रीत्यर्थ एकाद
शी उपवास व्रत पूजा औ नाम का कीर्त्तन आदिकमे यो धर्म
हैं उनमे तत्पर होउ क्यों किमत्प्रीत्यर्थ कर्म करनेसे भी मुक्तिको
प्राप्तहोउगे १ ॥

दोहा

अभ्यास विषै जि घाकन तो मो कर्मरत होहु मोहित कर्महि
करत भी सिद्धिप्राप हुं सोहु १०॥

49

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥११॥

शांकरभाष्ये टीका १

अथैतदिति अथ पुनरेतदपि यदुक्तं मत्कर्मपरमत्वं तत्कर्तुमशक्तोऽसि मद्योगमाश्रितो मयि क्रियमाणानि कर्माणि संन्यस्य यत्करणं तेषामनुष्ठानं मद्योगस्तमाश्रितः सन् सर्वकर्मफलत्यागं सर्वेषां कर्मणां फलसंन्यासं सर्वकर्मफलत्यागं ततोऽनन्तरं कुरु यतात्मवान् संयतचित्तः सन्नित्यर्थः ११ ॥

आनंदगिरिकृत टीका २

भगवत्कर्मपरत्वमप्यशक्यमिति शंकते अथेति बहिर्विषयाकृष्टत्वेन स्यादित्यर्थः तर्हि भगवत् आत्मा यायत्वेन संयतचित्तो भूत्वा कर्मफलसंन्यासं कुर्वित्याह मद्योगमिति ११

स्वामिकृत टीका ३

अत्यंतभगवद्धर्मनिष्ठामशक्तस्य पक्षांतरमाह अथैतदपीति अथैतदपि कर्तुं न शक्तोऽसि तर्हि मद्योगं मदेकशरणत्वमाश्रितः सर्वेषां दृष्टादृष्टार्थानामावश्यकानामग्निहोत्रादिकर्मणां फलानि नियतचित्तः संयतचित्तो भूत्वा परित्यज एतदुक्तं भवति यथा तावदीश्वराराधनतया यथाशक्तिकर्माणि कर्तुं आनि फलेषु न दृष्टमदृष्टं वा परमेश्वराधीनमित्येवं मयि वा समारोप्य फलासक्तिं परित्यज्य वर्तमानो मत्प्रसादेन कृतार्थो भविष्यसीति ११ ॥

पैशाचभाष्ये टीका ४

स्पष्टार्थं ११ ॥
॥

रामानुजभाष्ये टीका ५

अथेति अथ मद्योगमाश्रित्यैतदपि कर्तुं न शक्नोऽसि मद्गुणानुसंधानकृतमदेकप्रियत्वाकारभक्तियोगमाश्रित्य भक्तियोगमेवमेतत् कर्मापि कर्तुं न शक्नोषि ततोऽक्षरयोगमात्मस्वभावानुसंधानरूपं परभक्तिजननं सर्वं मद्वोदितमाश्रित्य तदुपायत

श्री॰
गी॰ टी॰
टी॰

50

यासर्वकर्मफलत्यागोऽकृतमत्प्रियत्वेनमदेकप्राप्यत्वाद्बुद्धिःशीघ्रमे
वपापक्षयैवजायते यतात्मवान्यतमनस्कःततोनभिसंहितफलेन
मदाराधनरूपेणानुष्ठितेनकर्मणासिद्धेनात्मज्ञानेननिवृत्ताविद्या
दिसंसृतिरोधनेमब्धेघनैकस्वरूपेप्रत्यगात्मनिसाक्षात्कृतेसतिम
यिपराभक्तिःस्वयमेवोत्पद्यते तथाचवक्ष्यतेस्वकर्मणातमभ्यर्च्य
सिद्धिंविंदतिमानवइत्यारभ्यमद्भक्तिंलभतेपरामित्यंतेन ११ ॥

अभिनवगुप्तकृत टीका ८

यदिचभगवत्कर्मकर्तुंनशक्तोसिअज्ञत्वाच्छास्त्रक्रमावेदनात् तत्स
र्वंमयिसंन्यस्य आत्मनिवेदनद्वारेणात्माश्रयः अमुमेवाश्रयमाश्रि
त्यलघुप्रक्रियायांमयैवोक्तं ऊनाधिकमविज्ञातंपौर्वापर्यविवर्जि
तम् यच्चावधानरहितंबुद्ध्वाविस्खलितंचयत् तत्सर्वंममसर्वेश
भक्तिस्यात्क्षम्यतांमतेः देवत्वंकृपयाशंभोयतस्त्वंकरुणापरः अने
नश्लोकद्वयेनतवात्मानंनिवेदये पुनर्निष्कारणमहेश्वरस्त्वंनोने
मिपात्रतामिति पारमेश्वरेब्रह्मसिद्धान्तेह्यात्मनिवेदनेयमेवाभिप्रा
यः ११ [illegible] ॥

परमार्थप्रपा टीका ७

यदिपुनःअथैतदिति यद्यैतदपिकर्तुमशक्तोसितर्हिमद्योगंमदेकश
रणत्वमाश्रितःआश्रितःसन्सर्वेषामेवश्रुपकानांकर्मणांफला
निनियतचित्तोभूत्वापरित्यज अतैनदुक्तंभवति मयातावदीश्व
१४ र्पणेनयथाशक्तिकर्माणिकर्तव्यानिफलेपुनर्दृष्टमदृष्टंवापर
मेश्वराधीनेत्स्येवंमयिभारमारोप्यफलाभिलाषंपरित्यज्यवर्तमा
नोमत्प्रसादात्कृतार्थोभविष्यसि ११ ॥

वनमाली टीका ८ त

ममोनयोगमिनोनुसंधानसर्वकर्मस्त्रीत्वर्थयथैतत्कर्मापिकर्तुमश
क्तस्त्रिष्वंतयोगमनुसंधातस्याशक्तत्वाद्धिसर्वाणिकर्माणिनि
त्यनैमित्तिकादीनकृत्वानेकर्मणाहरिःप्रियतामितिसर्वफलत्या
गमनुगोगेपरंपरयामत्स्वप्राप्त्युपायमाश्रितः कर्माणिअकृत्कर्मक
रणस्यस्वाभाविकत्वादंतर्यामिप्रसंधानागर्भेत्वाच्छ्वपेत्तया

स्तकरोयस्तुपायःयतात्मवान् यतःसंयतेंद्रियः आत्मवान्वि
वेकीचसन् मदर्पणरूपंसर्वकर्मफलत्यागंकुर्वित्यर्थः ११

कृष्णमवैजयन्ती टीका ९

ननुमहाकुलप्रसूतोराज्यधनविद्यादिसंपन्नोलोकमान्योलो
कोपहासासहमानोलज्जावान्महाभूत्वावदालयमार्जनोप
लेपनादिदासकर्मकथमहंकरिष्यामीतिचेत्तत्राहअथैतद
पीति अथेतिपक्षांतरेयदिमहाकुलीनत्वलोकमुख्यत्वादि
प्रतिबंधेनलोकलज्जयावापितत्वमेतदपिमन्निकेतनमार्ज
नादिरूपमपिकर्मकर्तुंनशक्नोषिलोकोपहासलज्जयान
करोषिततर्हिमद्योगंमयासहजीवात्मनोयोगःसंयोगोयस्मि
न्समद्योगःप्रपत्तिरूपस्तंयद्वाममयोगःप्रतिपाद्यप्रतिपा
दकभावसंबंधोयस्मिन्समद्योगोयत्स्वरूपगुणादिमत्प्रा
प्तिसाधनभक्तिभूतभक्तिप्रबन्धादिप्रतिपादकवेदांतपञ्च
रात्रादिसात्वतशास्त्रंयद्वामयियोगउपायोपेयमित्रपित्रादि
भावेनानन्यत्वेनवर्तिन्यसंबंधोयस्यसमद्योगोमदनन्यभ
क्तत्वं आश्रितस्सन्यतात्माविजितमनाभूत्वासर्वकर्मफल
त्यागंसर्वेषांस्ववर्णाश्रमोचितानामनुष्ठीयमानानांकर्मणां
फलत्यागंकुरुफलाभिसंधिंत्यजएवंफलाभिसंधानशून्यैर्म
दाराधनभूतैरग्निहोत्रदर्शपौर्णमासादिभिःकर्मभिर्विशात
न्नुवदेनरभ्युदितेनज्ञानेनपरमात्मजीवात्मनोरात्मात्मीय
भावेऽभ्युदितेसतिसर्वात्मत्वेनस्वप्राप्यत्वेनचपरमात्मनि
स्वात्मनिविदितेशनैःशनैःपरापिभक्तिर्भवेदित्यभिप्रायःन
थावस्थनेस्वकर्मणातमभ्यर्च्यसिद्धिंविंदतिमानवइत्यारभ्य
मद्भक्तिंलभतेपरामित्यन्तेनग्रन्थेन ११ ॥

मधुसूदनी टीका ९

अथवहिर्विषयाकृष्टचेनस्वादेनत्वमत्कर्मपरत्वमपिकर्तुं
नशक्नोषिततोमद्योगंमदेकशरणत्वमाश्रित्यततःमयिस
र्वकर्मसमर्पणंमद्योगंतेनाश्रितःसन्यतात्मवान्यतःसं

श्री· गी· टी· द्वा·

51

यतसर्वेंद्रियःआत्मवान्विवेकीत्वंमत्सर्वकर्मफलत्यागंकुरु
फलाभिसंधिंत्यजेत्यर्थः [illegible]
[illegible] ॥ ॥

सदानंदी टीका ॥

विषयाक्रांतचित्तत्वाद्यद्यशक्तोसिकर्मणन्तत् कर्तुंतर्ह्येवलेक
र्मसमर्प्यजगदीश्वरे १ मयिमच्छरणोभूत्वाविवेकीसंयतेंद्रि
यः सर्वकर्मफलासंगंत्यजत्वंमुक्तिसिद्धये २ ॥ ॥

नीलकंठी टीका १२

मद्योगंश्रवणादौनिष्ठां नर्हिसर्वांकंशक्तोनस्मात्तत्सर्वकर्मफ
लत्यागंकुर्वित्यर्थः यतात्मवान् यतश्वानियमादिभिः आत्म
वान्जितचित्तश्चेतियतात्मवान् ॥ ॥

आनंदीटीका

अथयद्येतदपिमदाराधनकर्मविस्तारात्कर्तुंनशक्तोषितत्तःत
र्हियतेन्द्रियविषयेभ्योनिरुद्धीतश्चासौआत्मान्तःकरणोतद्वान् मद्यो
गंमद्विषयंसमाधिमाश्रितः सर्वेषांकर्मणांनित्यानामावश्यका
नांयथादेशंयथाकालंक्रियमाणानांफलस्यलोकांतरोपभोग्य
स्त्यागंमत्स्पृहारूपंकुरुश्रेयोतरांतरानुष्ठानसकरत्वाय [illegible]
[illegible] ॥

रामकंठीटीका

अथैतदपियथोक्तंकर्तुंनिष्पादयितुमशक्तोसमर्थस्त्वंभवा
सितदामद्योगंमद्विषयंसमाधिमाश्रितःफलत्वेनसमाश्रितः
सन्सर्वेषामपर्वौकिककर्मणामनुष्ठीयमानानां यत्फलंतल्लोकां
तरोपभोग्यतात्मभोगात्मकामिष्टिरूपंतस्यत्यागमनभिसंध
नासंन्यासंयतात्मवान्सर्वविषय निरुद्धान्तःकरणोनम्रकःस
न्कुरुनिष्पादयमयिमनःसमादायशास्त्रविहितानिसर्वकर्माणि
यथोक्तत्वानसमर्पयनोपायतयाफलोनगाभिसंधानेविनानुतिष्ठस
र्वः [illegible]

[illegible] ॥११॥

लाक्षिकी [illegible]टीका

अत्रापि पक्षांतरमाह— अथैतदपियथोक्तंमत्कर्मापिकर्तुमसमर्थोसि अशक्तत्वाद्वाशास्त्रक्र
मावेदनाद्वा तर्हिमद्योगंमद्भक्तियोगमाश्रितःसन् यतात्मवान्त्व
द्धिविरलप्रचारचित्तःसन् सर्वेषांयथोपनतानांस्वाभाविकानांविहि
तानांचकर्मणांफलत्यागमभिसंधिराहित्येनकुरु यथोक्तंतुनाधिक
मविज्ञातमित्यादि [illegible]
॥ ॥ ॥

## पैचोलीटीका

भगवद्धर्मपरिनिष्ठायामप्यशक्तस्यपक्षांतरमाह अथेति अथ
पुनरेतदपिमदुक्तंमत्कर्मपरत्वंतत्कर्तुमशक्तोसिमद्योगमाश्रितः
क्रियमाणानिकर्माणिमयिसंन्यस्यमत्कर्मतयातेषामनुष्ठानंमद्यो
गस्तमाश्रितःसन्ततःसर्वकर्मफलत्यागंसर्वेषांकर्मणांफलसंन्या
संयतात्मवान्संयतचित्तःसन्कुरु ११

## रणवीरसिद्धिबोधिनी

उपायांतरमाह अथैतदिति एतदपिकर्तुंयदिभवानशक्तस्त
र्हिमद्योगंमदेकशरणत्वमाश्रित्यसर्वेषामावश्यकानांस्वध
र्मानुरूपकर्मणांफलानियतचित्तोभूत्वापरित्यजाशेदंतास्यं
परमेश्वराज्ञयाशुद्धादीनिकर्माणिममकर्तव्यानिकर्मफलंचे
श्वराधीनमित्येवमयिभारमारोप्यफलसंगंपरित्यजन्मत्प्रसा
देनकृतार्थोभविष्यसीति ११

## मधुभाष्य

११॥

52

भाषा अनुवाद टीका

और इस भगवद्धर्म मे भी असमर्थ पुरुष को दूसरी उपाय कहते हैं कि जो मदर्थीत्यर्थकर्म भी न करि शकै तो एक मेरी शरण होय औ चित्त वशीभूत करिके यावत् कर्मफलका परित्यागकरै इसका तात्पर्ययह है कि अन्तर्यामी रूप ईश्वर की प्रेरणासे हमें कर्म कर्तव्य हैं और इन कर्मो का दृष्ट अदृष्ट फलपरमेश्वर के आधीन है ऐसा भाव मेरेमे आरोप करिकै फलकी इच्छा त्याग पूर्वक कर्म्म करने से मेरीकृपासे कृतार्थ होउगे ११ ॥

दोहा

ताको कर्तन शक्त जो मो योगादि आश्रय होर सर्वकर्मफ
ल त्यागहूंकर फिर जित चित्तमोर ११

श्रेयोहिज्ञानमभ्यासाज्ज्ञानाद्ध्यानंविशिष्यते
ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनंतरं १२

शांकरभाष्यं टीका १

इदानीं सर्वकर्मफलत्यागं स्तौति श्रेयोहि प्रशस्यतरं ज्ञानं कस्मा
दविवेकपूर्वकादभ्यासात्तस्मादपि ज्ञानात् ज्ञानपूर्वकं ध्यानं वि
शिष्यते ज्ञानवतो ध्यानादपि कर्मफलत्यागो विशिष्यत इति अ
नुषज्यते एवं कर्मफलत्यागात् पूर्वे विशेषणवतः शांतिरुप
शमः सहेतुकस्य संसारस्यानंतरमेव स्यान्नतु कालांतरमपेक्ष
ते अज्ञस्य कर्मणि प्रवृत्तस्य पूर्वोपदिष्टोपायानुष्ठानाशक्तौ स
र्वकर्मणां फलत्यागः श्रेयःसाधनमुपदिष्टं न प्रथममेवातश्च
श्रेयोहि ज्ञानमभ्यासादुत्तरोत्तरविशिष्टत्वोपदेशेन सर्वक
र्मफलत्यागः स्तू यते संपन्नसाधनानुष्ठानाशक्तावनुष्ठेयत्वेन
श्रुतत्वात् केन साधर्म्येण स्तुतिः यदा सर्वे प्रमुच्यन्त इति सर्व
कामप्रहाणादमृतत्वमुक्तं तत्प्रसिद्धं कामाश्च सर्वे श्रौतस्मार्तस
र्वकर्मणां फलानि तत्त्यागे च विदुषो ध्याननिष्ठस्यानंतरैव शा
तिरिति सर्वकामत्यागसामान्यमज्ञस्य सर्वकर्मफलत्यागस्या
स्तीति तत्सामान्यात् सर्वकर्मफलत्यागस्तुतिरियं प्ररोचनार्था
यथागस्त्ये न ब्राह्मणेन समुद्रः पीत इदानींतना अपि ब्राह्म
णा ब्राह्मणत्वसामान्यात् स्तूयंते एवं कर्मफलत्यागात् कर्मयो
गस्य श्रेयःसाधनत्वमभिहितं अत्र चात्मेश्वरभेदमाश्रित्य विश्व
रूपईश्वरे चेतःसमाधानलक्षणो योग उक्त ईश्वरार्थं कर्मानुष्ठा
नादि चाथैतदप्यशक्तोसीत्यज्ञानकार्यसूचनान्नाभेददर्शिनोक्षरो
पासकस्य कर्मयोग उपपद्यते इति दर्शयति तथा कर्मयोगि
नोक्षरोपासनानुपपत्तिं दर्शयतिभगवान् ते प्राप्नुवन्ति मा मेवे
त्यक्षरोपासकानां कैवल्यप्राप्तौ स्वातंत्र्यमुक्त्वेतरेषां पारतंत्र्यमी
श्वराधीनतां दर्शितवांस्तेषामहं समुद्धर्तेति यदि हीश्वरस्यात्म
भूतास्ते मता अभेददर्शित्वादक्षररूपा एव ते इति समुद्धरणक

र्मेव वचनत्वात् प्रत्यपेशलं स्यादसाक्षात्मज्ञानस्यात्यन्तमेव हितैषी भ
गवांस्तस्य सम्यग्दर्शनात्विन्तं कर्मयोगं भेददृष्टिमन्तमेवोपदिश
ति न चात्मानमीश्वरं प्रमाणतो बुद्धा कस्यचिद्गुणभावं जिगमिषु
ति कश्चित् विरोधात् तस्मादक्षरोपासकानां सम्यग्दर्शननिष्ठानां
सन्न्यासिनां त्यक्तसर्वैषणानां अद्वेष्टा सर्वभूतानामित्यादि धर्मपू
गं साक्षादमृतत्वकारणं वक्ष्यामीति प्रवर्त्तते १२ ॥

आनन्दगिरिकृत टीका २

उत्तरश्लोकतात्पर्यमाह इदानीमिति ज्ञानं शास्त्रयुक्तिभ्यामात्मनिश्च
यः अभ्यासो ज्ञानार्थश्रवणाभ्यासो निश्चयसिद्धेको ध्यानाभ्यासो वा
तस्य विशिष्यमाणत्वे साक्षात्कारो हेतुस्त्यागस्य विशिष्टत्वे हेतुमा
ह एवमिति श्रीमान् भगवानिति तस्मिन् कर्मसन्न्यासपूर्वक
मित्यर्थः पूर्वविशेषणवतो नियतचित्तस्य पुंसो यथोक्तत्यागादि
त्यर्थः अनन्तरमेवेत्युक्तं व्यनक्ति नावति न तु कर्मफलत्यागस्य
सद्यः शान्तिकरत्वे सम्यग्धीरेव तथेति श्रुतिस्मृतिप्रसिद्धिविरु
द्धेन तत्राह अज्ञस्येति दीर्घेण कालेनादरनैरन्तर्यानुष्ठितात् ज्ञाना
हत्साक्षात्कारद्वारा संसारदुःखोपशान्तेस्तथाविधाज्ञानात्या
गस्य विशिष्टत्वोक्तेस्तदीयस्तुतिरन्वेष्टेत्याह अज्ञस्येति तत्र हेतु
माह सम्पन्नेति सम्पन्नानि श्रामाणि साधनान्यक्षरोपासनादी
नि तेषां मध्ये पूर्वपूर्वस्यानुष्ठानाशक्तावुत्तरोत्तरस्य अनुष्ठेयत्वे
नोपदेशात्यागे चोपदेशपर्यवसानादित्यर्थः त्यागे विशिष्टत्वव
चनस्यैकेन साधर्म्येण प्रति स्तुतित्वमिति पृच्छति केनेति उ
त्तरमाह यदेति अमृतत्वमुक्तं अथ मर्त्योमृतो भवतीति शेषादि
विशेषः काम ब्रह्मणस्यामृतत्वार्थत्वमथाकामयमान इत्यादाव
पि सिद्धमित्याह तदिति कामत्यागस्यामृतत्वहेतुत्वेपि कथं कर्म
फलत्यागस्य तद्धेतुत्वमित्याशंक्याह कामाश्चेति कर्मफलत्यागा
देव शान्तिश्चेत् ज्ञाननिष्ठोपदिष्टेनेत्याशंक्याह तत्त्यागे चेति तथा
पि कथमज्ञस्य कर्मफलत्यागस्तुतिरित्याशंक्याह इति सर्वेति
विद्यावतस्त्यागवदविद्यत्यागस्यापि त्यागत्वाविशेषाद्विशिष्टत्वो

क्ति पूर्वोक्तेति स्तुतिमुपसंहरति इति मत्सामान्यादिति किमर्था स्तु
तिरित्याशंक्य त्यागे रुचिमुत्पाद्य प्रवर्त्तयितुमित्याह प्ररोचना
र्थेति त्यागस्तुतिं दृष्टान्तेन स्पष्टयति यथेति फलत्यागः श्रेयो
हेतुश्चेत् कर्म्मत्यागादपि फलत्यागसिद्धेरलं कर्म्मानुष्ठानेनेत्या
शंक्याह एवं कर्म्मेति फलाभिलाषं त्यक्त्वा कर्म्मानुष्ठानस्यापि त
त्सेश्वरे श्रेयोहेतुतया विवक्षितत्वान्नानुष्ठानानर्थक्यमित्यर्थः
सम्प्रत्यद्वेष्टृत्वाद्यवतारयितुं वृत्तं कीर्त्तयति अत्र चेति तयोश्चे
दात्यन्तिकोऽभेदो न तर्हि ईश्वरे मनःसमाधानरूपो योगोऽत्यन्ता
भेदे ध्यातृध्येयत्वाभावात् न वात्यन्ताभेदे कर्म्मानुष्ठानेन तत्फ
लत्यागो वा अपरस्य तद्योगादित्यर्थः भगवद्भक्तिसामर्थ्यादपि
कर्म्मयोगादिना भेददृष्टिमतो भवतीत्याह अथेति अक्षरोपास
कस्य कर्म्मयोगायोगवत् कर्म्मयोगिनोऽक्षरोपासनानुपपत्ति
रपि दर्शितेत्याह तथेति अक्षरोपासकः अथैतदपीति श्लो यथा
ज्ञाने भगवन्तमेवाश्नुवन्ति न तथा कर्म्मिणः साक्षात्तदाश्र
पि ते तथा च कर्म्मिणो नाक्षरोपासनसिद्धिरित्यर्थः इतश्चाक्ष
रोपासने कर्म्मानुष्ठानं न चैकत्र युक्तमित्याह अक्षरेति तत्वा॰
क्षरोपासकवदन्येषामपि ईश्वरात्मताविशेषात् कुतस्तदधी
नत्वेनत्राह यदीति कर्म्मयोगस्याक्षरोपासनेन युगपदेकत्रायोगे
हेत्वन्तरमाह यस्माच्चेति कुरु कर्म्मैवेत्यादावितिशेषः किञ्चाक्ष
रोपासको वाक्यादीश्वरमात्मानम्वेत्ति नास्य क्रियायां गुणत्वेन
कर्त्तृत्वमनुभवति गुणत्वेश्वरत्वयोरेकत्रव्याघातादतोऽपि ना
क्षरोपासने कर्म्मानुष्ठानन्त्वेकत्र युक्तमित्याह न चेति अक्षरो
पास्तिकर्म्मयोगयोरेकत्रायोगे फलितमाह तस्मादिति अज्ञानां
कर्म्मिणां वक्ष्यमाणधर्म्मजातस्य साकल्येनायोगादक्षरनिष्ठाना
मेवेदमुच्यते अविरुद्धांशस्य तु सर्व्वेषां तत्सिद्धमेवेत्यर्थः १२

स्वामिकृतटीका १

तमिमं फलत्यागं स्तौति श्रेयोहीति सम्यग्ज्ञानरहितादभ्यासा
द्युक्तिसहितोपदेशपूर्वकं ज्ञानं श्रेष्ठं तस्मादपि ज्ञानतत्पूर्वकं

ध्यानं विशिष्टं ततस्तु तं पश्यते निष्कलं ध्यायमान इति श्रुतेः तस्माद्
पि उक्तलक्षणः कर्मफलत्यागः श्रेष्ठः तस्मादेवंभूतत्यागात्कर्मसु
तत्फलेषु वा सक्तिनिवृत्या मनःप्रसादेन च समनन्तरमेव संसारशांति
र्भवति १२ ॥

पिशाचभाष्ये टीका ४

स्पष्टार्थं ॥ ॥

रामानुजभाष्ये टीका ५

श्रेयोहीति अन्यथीप्रीतिविरहितात् अविपाकरूपात् स्मृत्यभ्यासात्तद्
र्शयाथात्म्यानुसंधानपूर्वकं तदपरोक्षज्ञानमेवात्महितत्वे विशिष्य
ते आत्मापरोक्षज्ञानादप्यनिष्पन्नरूपात्तदुपायभूतात्मध्यानमेवात्म त
हितत्वे विशिष्यते ध्यानादप्यनिष्पन्नरूपात्तदुपायभूतेन फलत्यागेनानुष्ठि पो
तकर्मैव विशिष्यते अनभिसंहितफलादनुष्ठितात्कर्मणोनन्त
रमेव निरस्तपापतया मनसः शांतिर्भविष्यति शांते मनस्यात्मनः
ध्यानं संपत्स्यते ध्यानात् ज्ञाने ज्ञानात्तदपरोक्षात् परा भक्तिरि॰
ति भक्तियोगाभ्यासाशक्तमनस आत्मनिष्ठैव श्रेयसी आत्मनिष्ठ
स्याप्यशांतमनसो निष्ठाप्राप्तये अन्तर्गतात्मज्ञानानभिसंहितफल
कर्मनिष्ठैव श्रेयसीत्यर्थः
१२ ॥

तदिदं तात्पर्यं उपसं
ह्रियते श्रेयो हीति

अभिनवगुप्तकृत टीका ८

ज्ञानमावेशात्मा अभ्यासाच्छ्रेयोऽभ्यासस्य तत्फलत्वात् तस्मादेवावेश
ज्ञानेन भगवन्मयत्वं विशिष्यते विशेषत्वं याति अभिमतज्ञात्यास
ति ध्यानेन भगवन्मयत्वे कर्मफलानि संन्यासितं युज्यते अयं ध्या॰
ज्ञानत्वपेक्षसंन्यासः कर्मफलत्यागे वात्यंतिकी शांतिः अतः सर्व॰
मूलत्वादावेशात्मकं ज्ञानमेव प्रधानम् १२ ॥

परमार्थप्रपा टीका ७

अथ फलत्यागप्रशंसामाह श्रेय इति केवलेकरचरणव्यापाररूपा
दभ्यासात्तत्त्व ज्ञानं श्रेयः श्रेष्ठं तस्मादपि तत्पूर्वके ध्याने निर्विष
यैकाग्रे विशिष्यते तस्मात्कर्मफलत्यागः स्वतएवोपरमात्मकमफ

लसंहितं तस्माच्छांतिः सर्वोपरमतो मत्स्वरूपाव्यवधानं ······ सुखं १२

वनमाली टीका ८

ध्यानालाभे ज्ञानं ज्ञानालाभे अभ्यासः कार्य इत्यादिके समर्थयन्ने श्रे
य इति सम्यक् ज्ञानरहितात्केवलाच्छ्रवणाद्यभ्यासात् ज्ञानं श्रेष्ठमिति
युक्तिभ्यामभ्यस्तं परोक्षं श्रेयः श्रेष्ठं ज्ञानाच्छ्रवणमननोत्पादितात्प
रोक्षज्ञानरहिताज्ज्ञानं भगवत्परोक्षजनकत्वाच्छ्रेष्ठं सकामाज्ज्ञा
नात्कर्मफलत्यागपूर्वकं निःकामध्यानं श्रेष्ठं त्यागाच्छांतिः कामध्याना
दनंतरम अपरोक्षद्वारा शांतिर्मोक्षः भक्तिपूर्वकश्रवणमननाभ्यां नि
दिध्यासनात्खलु देवमजातीयप्रत्ययप्रवाहरूपं विजातीयशून्यं
सदैकतानं भगवदपरोक्षजनकं ध्यानं निःकामतया कार्यमिति
भावः १२ ॥

कृष्णमवैजयन्ती टीका ९

अनभिसंहितफलस्य कर्मयोगस्याप्रमादत्वेन ज्ञानगर्भत्वेन च
त सुकरोपायत्वस्यादन्त्यमेवतन्वक्तुं विख्याह श्रेयो हीति अभ्यासाद
निष्पन्नज्ञानादतिकर्कशरूपात्प्रीतिरहितान्मं स्टतिसाजत्यरू त
पाज्ज्ञानेनात्मसाक्षात्कृतिरूपं श्रेयः पवप्रशस्ततरं परमात्मोप
लब्धिद्वारत्वात् अनिष्पन्नात्तस्माज्ज्ञानात् ध्यानेन तत्साधनभूते
नात्मचिंतनलक्षणेन विशिष्यते श्रेष्ठं भवति तस्मादति ष्पन्नात्
ध्यानाच्च कर्मफलत्यागः फलानुसंधानरहितं कर्म प्रशस्ततरं
तस्मादनभिसंहितफलात्कर्मणः सकाशादनंतरमेव निरस्तपा
पतया शांतिर्मनसः शुद्धिर्भविष्यतीत्यर्थः अयमाशयः शांतम
नस्यात्मध्याने संपन्ने ध्यानाज्ज्ञाने ज्ञानात्पराभक्तिः भक्तियोगा
भ्यासासक्तमनसः आत्मनैव आत्मनिष्ठैव श्रेयसी आत्मनिष्ठा
साध्य शांतमनसो निष्ठाश्रमयेः तेनात्मज्ञानानभिसंहितफ
लकर्मनिष्ठैव श्रेयसीति १२ ॥

इदानीमेवैवसाधनविधानप मधुसूदनी टीका ९ एवमानादिम सर्वकर्मफलत्यागं
स्तौति श्रेयः प्रशस्यतरं हि एव ज्ञानेशब्दयुक्तिभ्यामात्मनिश्चयः अभ्या
सात् ज्ञानार्थश्रवणाभ्यासात् ज्ञानाच्छ्रवणमननपरिनिष्पन्नाद

श्री॰
गी॰टी॰
टा॰

56

पिध्यानं निदिध्यासनसंज्ञं विशिष्यते अतिशयं भवति साक्षात्काराव्यव
हितहेतुत्वात् तदेवं सर्वसाधनश्रेष्ठध्यानेन ततोप्यतिशयत्वेन प्रश
स्तः कर्मफलत्यागः स्तूयते ध्यानात्कर्मफलत्यागो विशिष्यत इत्य
नुषज्यते त्यागान्नियतचित्तेन पुंसा कृतात्सर्वकर्मफलत्यागाच्छा
न्तिरुपशमः सहेतुकस्य संसारस्यानंतरमेवाव्यवधानेन न तु कालां
तरमपेक्षते अत्र यदा सर्वे प्रमुच्यंते कामा येस्य हृदि स्थिताः अ
थ मर्त्योमृतो भवत्यत्र ब्रह्म समश्नुत इत्यादिश्रुतिषु प्रजहाति य
दा कामान्सर्वानित्यादिस्थितप्रज्ञलक्षणेषु च सर्वकामत्यागस्यामृ
तत्वसाधनत्वमवगतं कर्मफलानि च कामानत्यागोपि कामत्याग तेषा
त्वसामान्यात् सर्वकामत्यागफलेन स्तूयते यथागस्त्येन ब्राह्म
णेन समुद्रः पीत इति यथा च जामदग्न्येन ब्राह्मणेन निःक्षत्रा पृ
थिवी कृतेति ब्राह्मणत्वसामान्यादिदानींतना अपि ब्राह्मणा अप
रिमेयपराक्रमत्वेन स्तूयंते तेन तद्वत् तदेवं मंदमधिकारिणं प्रति
अतिदुष्करत्वेनाक्षरोपासननिंदया सुकरं सगुणोपासनं विधा
य प्रशंसितुं तस्यानुवादेन अन्यान्यपि साधनानि विदधे भग
वान्वासुदेवः कथंभूतं नाम सर्वप्रतिबंधरहितः सत्त्वमधिका
रितया फलमेतायामतस्तुविद्यायामवनेरादिदृष्टिप्रायेण साध
नविधानस्य फलार्थत्वात् तदुक्तं निर्विशेषपरं ब्रह्म साक्षात्क
र्तुमनीश्वराः ये मंदास्तेनुकंप्यंते सविशेषनिरूपणैर्वशीकृते
मनसैषां सगुणवस्त्वनुशीलनात् तदेवाविर्भवेत्साक्षादपेतोपा
धिकल्पनमिति भगवता पतंजलिना चोक्तं समाधिसिद्धिरीश्व
रप्रणिधानादिति ततः प्रत्यक्चेतनाधिगमोप्यंतरायाभावश्चे
ति च तत इतीश्वरप्रणिधानादित्यपीः तदेवमक्षरोपासननिंदा
सगुणोपासनस्तुतये न तु हेयतया उदितहोमविध्यानुदितहोम च
निंदावत् नहि निंदा निंद्यं निंदितुं प्रवर्तते अपितु विधेयं स्तोतु
मिति न्यायात् तस्मादक्षरोपासका एव परमार्थतो योगवित्तमाः
प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रियः उदाराः सर्व एवैते ज्ञा
नी त्वात्मैव मे मतमित्यादिना पुनः पुनः प्रशस्तत्वमतपाउक्ताः

तेषामेवज्ञानेधर्मजातंवानुसरणीयमधिकारमासाद्यत्वयाऽ
त्मज्ञेनेतुर्वोयथेष्टःपरमहितैषीभगवानभेददर्शिनःक्रमक
मानत्तरोपासकान्प्रत्येतिसप्तभिः १२ ॥

सदानंदी टीका ॥

इदानींसाधनसाध्यविधेःपर्यवसानतः सर्वकर्मफलत्यागमि
मंप्रोतिहरिःस्वयं १ ज्ञानार्थश्रवणाभ्यासाज्ज्ञानंश्रेष्ठतरंभवेत्
निष्पन्नेऽस्मिन्प्रकृतिभ्यांततोध्यानंविशिष्यते निदिध्यासनसंज्ञे
यत्तत्वज्ञानैककारणंततोऽप्युत्तमः कर्मफलत्यागोविशिष्यते
इत्येवंस्तूयतेयस्मात्सहेतोःसंस्तुतेःस्वयः तत्क्षणेशांतिसिद्धि
नेकालांतरमपेक्षते यदासर्वेप्रमुच्यंतेकामायेऽस्यहृदिश्रिताः
अथमर्त्योमृतोभवत्यत्रब्रह्मसमश्नुते ५ प्रजहातियदाकामा
नित्यादौचश्रुतौस्मृतौ सर्वकामपरित्यागोमोक्षहेतुतयामतः
सर्वकर्मफलत्यागःकामत्यागत्वसाम्यतः स्तूयतेकेवलंयस्मा
द्भावनार्थाविधेयस्तुतिः ७ यथागस्त्येनपीतःप्राग्ब्राह्मणेनाब्धि
रित्यतः ब्राह्मणब्राह्मणत्वेनस्तूयतेयत्नताप्यपि ८ तथात्रापि
परित्यागसामान्यात्स्तूयतेहिसः तदेवंदुष्करत्वेनाक्षरोपासन
तोवरं सगुणोपासनंप्रोक्तंसुकरत्वादिहेतुना प्रशंसितारतस्या
नुवादेनभगवान्स्वयं ९ विदधौसाधनान्यत्रद्वेष्टाद्यंमंदाधिकारि
णः कथंतुनाममद्भक्ताभूत्वामुख्याधिकारिणः विशिष्टुःफल॰
भूतायांविद्यायामक्षरात्मनः इत्यभिप्रायईशस्यतदुक्तंसोद्ग॰
रायिकैः १२ निर्विशेषंपरंब्रह्मसाक्षात्कर्तुमनीश्वराः येमंदास्ते
नुकंपंतेसविशेषनिरूपणैः १३ वशीकृतेमनस्येषांसगुणब्र
ह्मशीलनात् तदेवाविर्भवेत्साक्षादपेतोपाधिकल्पनं १४ अक्ष
रोपासकास्तस्माद्वक्तुतोयोगवित्तमाः प्रियोहिज्ञानिनोत्यर्थम
हंसचममप्रियः १५ उदाराःसर्वएवैतेज्ञानीत्वात्मैवमेमतं इ
त्यादौज्ञानिनःप्राधान्यमत्यंतंहरिणेरितं १६ तेषामेवत्वयाज्ञाने
समासाद्याधिकारितां सदानुसरणीयंचेत्याशयःश्रीहरेरयं १७ १२

नीलकंठी टीका १२

श्री॰
गी॰ टी॰
हा॰

57

रमेवमार्गं सर्वपुरुषार्थमूलत्वात्स्तौति श्रेयो हीति अभ्यासाद्विदि
ध्यासनात्‌ज्ञानं श्रवणमननजं परोक्षं श्रेयः ज्ञानादपि ध्यानं विष्णोः
श्रवणकीर्त्तनादि विशिष्यते ततोपि कर्मफलत्यागः श्रेयान् यस्मा
दनेनरेत्र्यवधानेन शांतिर्मोक्षोस्ति विनश्यस्याशुत्पादनद्वारेण
अत्रबाह्यसाधनं सुकरत्वात्सर्वत्र सर्वोपेतयाप्रशस्तमित्युच्यते तत्रै
वपुरुषातिशयाय यद्वा श्रवणाद्यभ्यासात्तज्जं ज्ञानं तन्न निश्चया
त्मकं श्रेयः ततोपि ज्ञानस्याप्यर्थस्य साक्षात्कारार्थं ध्यानं श्रेयः ततोपि
कर्मफलत्यागः योगी हि सर्वकर्मत्यागी प्रजहाति यदा कामानि
ति श्लोकः अयमपि कर्मफलत्यागेन कामान् जहात्येवेति तेन स
मश्नुतिस्तूयते १२ ॥

एतदेवसिद्धान्तयति ॥

आनंदीटीका

अभ्यासात्सर्वविषयेभ्यः चित्तस्य भूमिजयक्रमेणावृत्तीनां निरो
धयत्नेभ्यासः सयोगः तस्माज्ज्ञानं श्रेयः सर्वेषां भावानां ब्रह्मैकता
ज्ञानं सुकरत्वादतिप्रशस्तम् अस्मात्‌ज्ञानाज्ज्ञानं निश्चितोपि यव
स्तुवितते श्रेयस्सुकरं एवंविधा ध्यानात्कर्मफलत्यागो विशि
ष्यते सर्वेभ्य उत्कृष्यते अत्र हेतुमाह त्यागादेवानन्तरात्कालेश
त्याशांतिर्मुक्तिर्भवतीति सर्वकर्मफलत्यागः एवसुकरः स्मर्थः १२

+ एवमुपदिष्टानां भगवदु
पासाभेदानां क्रमेणपूर्वस
पूर्वस्यानुष्ठानासामर्थ्ये सत्युत्तरस्योत्तरस्यानुष्ठानं यदुपदि
ष्टं तन्नावरत्वापेक्षया किंत्व
धिकारिविषयस्य त्यागस्य
सुकरंतरत्वमेव बोद्धव्यमि
ति प्रतिपादयितुमाह ॥

रामकंठीटीका

+ हिशाह्यो हेतौ यस्मादेवंविधोयंयथाक्रमः इह विवक्षितः तस्मा
त्स्मात्सर्वकर्मफलत्यागयोग्यतातिशयवशात्सुकरतरत्व
मिति पूर्वापरयोः संबन्धः कीदृशः क्रमः इह ज्ञानं यथोक्तयोग
पत्यासर्वभावानां परब्रह्मरूपतावगमनं तदभ्यासादभ्यासयोगा
त्सर्वात्मज्ञानाच्छ्रेयः सुकरत्वात्प्रशस्ततरं अभ्यासयोगो हि सर्वविष
यप्रतिषेधक्रमेणाचित्तवृत्तीनां निरोधयत्नः सच यथोक्तज्ञानल
ब्धप्रतिष्ठत्वात्पकारिविषयेज्ञानं तदपेक्षया सुकरत्वाच्छ्रेय उक्ता
मतएवाभ्यासयोगिनामव्यक्तचेतसामपि कतरः क्लेश इति प्राग
क्रमेवंविधाद्वज्ञानाज्ज्ञानं ज्ञाननिमित्तोपि यवस्तुवितते विशिष्य

ने सकरत्वादतिरिच्यते तस्यहिज्ञानापेक्षयात्वत्साक्षात्कारप्रवृत्तेर्वि
शिष्टोधिकारी नहिद्विषयत्वेनैवतस्यसकरत्वमेवंविधाच्चध्यानात्कर्मफल
त्यागोविशिष्यते यतोच्चरमानावस्थासौतादृग्ध्यानलक्षणोहिकर्मणि
व्यतिरेकबुद्धिःस्फुरत्येव तदधिकार्यपेक्षयात्यागःश्रेष्ठावस्थापिकारि
विषयत्वात्दृशस्यैव कर्मणोनर्पण सकरइति ध्यानात्कर्मफलत्यागोविशिष्य
तेइत्युक्तम् यस्मात्रै हेवंविधस्यत्यागोविवक्षितोयस्य नाहंकर्तानेमक
र्मफलसंबंधइतिप्रलापमात्रेणानिष्पत्तिः किंतव्यतिक्रांताभ्यासादिसर्वा
वस्थासिद्धयोगिविषयंसर्वभावानांपरब्रह्मस्वरूपेनित्यमनुभवाद्व्याप्ति
विक्तफलस्यादर्शनमेवत्यागउच्यते अतएववाह त्यागाच्छांतिरनंतरेति
शांतिःसंकल्पविकल्पतोभयलयादहृयविन्मात्रस्वस्वरूपेपरमात्मन्ये
वभगवत्यहमित्यभेदेननिरूपम्रवासुविदोविश्रांतिस्तस्यास्त्यागस्यैव
नास्त्यंतरंव्यवधानंयएवत्यागःसैवशांतिरीश्वरसमापत्तिलक्षणासिद्ध
रितित्यागाच्छांतिरनंतरमुक्तमनंतरमितिपादक्रियाविशेषणत्वेननसंधो
वाबोद्धव्यः

॥

लासिकी [illegible]टीका

हियस्मात् ज्ञानंप्रत्यभिज्ञालक्षणमभ्यासादंतुस्मरणरूपेणाभ्यासेन
हेतुनाश्रेयःप्रशस्तम् सुस्थिरमितियावद्भवति ज्ञानात्सुस्थिरेणाज्ञा
नेनहेतुनाध्यानमात्मन्येकतानत्वंविशिष्यतेश्रेष्ठंभजनंसकरंभवती
त्यर्थः ध्यानात्तादृशेनध्यानेनहेतुनाकर्मफलस्यत्यागोभवतित्या
गादनंतरंत्यागानंतरमेवशांतिश्चित्तविकल्पोपरतिर्भवतीत्यर्थः त
याचशिवसत्त्वम् अभिलाषाद्व्रहिंगीतिस्फुवाक्यस्येति अतोभ्यासाय
ध्यात्यागान्श्रेयःप्रशस्तम् अपिविज्ञानतत्तेनतयाभ्यासमिदंसदा ननु
ममाज्ञाकृतकफलमंत्रप्रसादकमिति

॥१२॥ ॥ ॥

पंचोलीटीका

58

इदानीं सर्वकर्मफलत्यागं स्तौति श्रेयइति हियस्मादविवेकपूर्वकाद
भ्यासात् ज्ञानं श्रेयः तस्मात् ज्ञानात् ज्ञानपूर्वकं ध्यानं श्रेयः ज्ञानयुक्ता
ध्यानादपि कर्मफलत्यागो विशिष्यते यथोक्तात् कर्मफलत्यागादंतेऽ
अंतःकरणशुद्धिद्वारेण ततः परं शांतिः सहेतुकस्य संसारस्य उपशमो
भवति १२

रणवीरसमिद्धेधिनी

इदानीं साधनविधानपूर्वकं फलत्यागं स्तौति श्रेयइति अभ्यासा
त् रसायनरूपात् ज्ञानं कवचानामाच्छादनं श्रेयः प्रपास्यतरं ज्ञाना
ध्यानं कवचाच्छादनादिष्टं मे भवेदिति चिंतनं विशिष्यते एवं रूपा
ध्यानात् कर्मफलत्यागः कर्मणां युद्धकर्मणां यानि फलानि तेषां
मय्यर्पणं श्रेष्ठं त्यागादनंतरं संसारशांतिर्भवति मदाज्ञया स्वधर्मा
नुरूपाणि कर्माणि कृत्वा तत्फलं मयि समर्प्य समनंतरमेव संसार
शांतिर्भवति १२॥

मधुभाष्य

१२॥

भाषा अनुवाद टीका

और उक्त फल त्याग की प्रसंसा करते हैं कि सगुण की उपास
ना से सम्यक् ज्ञान रहित जो अभ्यास तिससे युक्ति सहित उप
देश पूर्वक यह सगुण उपासना का अङ्ग भूत जो परोक्षज्ञान
सो श्रेष्ठ हो और उस ज्ञान से भी ध्यान अधिक है और तिससे
भी कर्म्मफलका त्याग श्रेष्ठ है क्यों कि कर्म्म औ कर्म्मफलमे आ
सक्ति निवृत्त होने पर मेरी अनुग्रह से शीघ्र संसार की शान्ति
होय है १२ ॥

दोहा

श्रेष्ठज्ञान अभ्याससें ज्ञानेह्विसें वरध्यान ध्यानसें कर्मफल
त्यागहि शांतित्यागसें मान १२

59

अद्वेष्टासर्वभूतानांमैत्रःकरुणएवच नि
र्ममोनिरहंकारःसमदुःखसुखःक्षमी १३

शांकरभाष्यं टीका १

अद्वेष्टेति अद्वेष्टा सर्वभूतानां न द्वेष्टात्मनो दुःखहेतुमपि न किञ्चिद्द्वे
ष्टि सर्वाणि भूतान्यात्मत्वेन हियस्मात् पश्यति मित्रभावोमैत्रोमित्रत
या वा वर्तते इति मैत्रः करुण एव च करुणा कृपा दुःखितेषु
दयातद्वान् करुणः सर्वभूताभयप्रदः सन्न्यासीर्थः निर्ममो ममे त्य
ति प्रत्ययवर्जितोनिरहंकारोनिर्गताहंप्रत्ययः समदुःखेति सम
दुःखसुखः समेदुःखसुखे द्वेषरागयोरप्रवर्तके यस्य समदुःखसुखः
क्षमी क्षमावानाक्रुष्टोभिहतोवाऽविक्रिय एवास्ते १३ ॥

आनंदगिरिकृत टीका २

सर्वेषां भूतानां मध्ये योदुःखहेतुः तं विद्वानपि द्वेष्टेवेत्याशंक्याह
आत्मन इति तत्रहेतुः सर्वाणीति सर्वभूतानामित्युभयतः सम्बध्य
ते ममप्रत्ययवर्जितोदेहेपीति शेषः व्रतस्वाध्यायकृताहङ्कारः नि
ष्क्रान्तत्वमाह निर्गतेति १३ ॥

स्वामिकृतटीका ३

एवंभूतस्यभक्तस्यातिप्रियमेवपरमेश्वरप्रसादहेतून्धर्मानाह अद्वेष्टे
त्यष्टभिः सर्वभूतानांयथायथमद्वेष्टामैत्रःकरुणश्च उत्तमेषुद्वेष
शून्यः समेषुमित्रतयावर्ततइतिमैत्रः दीनेषुकृपालुरित्यर्थः नि
र्ममोनिरहंकारश्च कृपालुत्वादेवान्यैःसहसमेसुखदुःखेयस्यसः
क्षमीक्षमावान् १३ ॥

पिशाचभाष्यं टीका ४

अद्वेष्टेति करुणायस्यास्तिसकरुणः आशीरादिभ्यश्च १३ ॥

अनभिसंहितफलकर्मनिष्ठ रामानुजभाष्यं टीका ५ स्योपादेयान्गुणानाह ॥

अद्वेष्टेति मन्त्रइति अद्वेष्टासर्वभूतानांद्विषतांद्वेषंकुर्वतां अपकु
र्वतामपिसर्वेषांभूतानामद्वेष्टामदपराधानुगुणमीश्वरप्रेरितानि
भूतानिद्विषंतिअपकुर्वंतिचेत्यनुसंदधानःतेषुद्विषत्स्वपकुर्वत्सु
चसर्वभूतेषुमैत्रींकुर्वन्मैत्रःतेष्वेवदुःखितेषुकरुणांकुर्वन्करुणः

श्री॰
गी॰ टी॰
द्वा॰

60

निर्ममः देहेंद्रियेषु तत्संबंधिषु च निर्ममः निरहंकारो देहात्माभिमान
रहितः तत एव समदुःखसुखः सुखदुःखागमयोः सांकल्पिकयोर्ह
र्षोद्वेगरहितः क्षमी स्पर्शप्रभवयोरवर्जनीययोर्विकाररहितः १३

अभिनवगुप्तकृत टीका ९

॥ अद्वेष्टा सर्वभूतानामित्यादि भक्तास्तेतीव मे प्रियाः इत्यंतम् १३

परमार्थप्रपा टीका ७

अथ प्रसादजनकान् धर्मानाह अद्वेष्टेत्यष्टभिः तत्रापि प्रथमं त्रयं
सर्वभूतानामद्वेष्टा द्वेषशून्यस्तर्हि उदासीनः स्यादित्याह मैत्र इति
तत्रोत्तमानामतिस्वल्पत्वेनाप्रसक्तेः समेषु मैत्रः अपकृष्टेषु करु
णः एवं सति तेषु निर्ममो ममताशून्यः तथात्राप्यहंकारशून्यः किं
च समे सुखदुःखे यस्य तत्समोत्तमाभावात् १३ ॥

वनमाली टीका ८

संसारभयमोचकभगवत्प्रसादप्रसाधनान्याह अद्वेष्टेत्यष्टभिः
सर्वभूतान्यंतर्यामित्वेन विष्टानि वेष्टंत इति विद्वान् सन् स्वप्यद्वेष्टा स
मेषु सत्सु मैत्रः अधमेषु करुणः यद्वा भगवत्स्वनिवासं जानन्
सर्वेषु मैत्रः दुःखेषु करुणो भगवानेषां दुःखं हिनाशयतु सद्बुद्धिं प्र
त्व यच्छ्विभिलाषयुक्तः गेहादौ निर्ममो देहादौ निरहंकारः दुःखसुख
योः समः स्वकर्मानुसारेश्वराधीनत्वेन हेयत्वेन च साम्यं अवश्यंभोक्त
व्यस्वकृतकर्मफलमिति धीयुक्तो भोगकाले हर्षविषादशून्य इत्य
र्थः दुःखसाहचर्यात् सुखवशीकृतमेव क्षमी आक्रोशनताडनादिना
पि विक्रियाहीनः १३ ॥

कुसुमवैजयन्ती टीका ४

नन्वभिसंहितफलस्य कर्मनिष्ठस्य किंलक्षणं भवतीत्यपेक्षायामाह
तस्य सर्वोपरंजकानुपादेयान् गुणान्निरूपयन् तल्लक्षणमाह अद्वे
ष्टेति सप्तभिः अद्वेष्टा सर्वभूतानामिति सर्वभूतानां सर्वेषां द्वेषं कुर्व
तामपकुर्वतां चापि भूतानां ब्रह्मादिस्थावरांतानामद्वेष्टा द्वेषं कुर्व
त्स्वपि तेषु मत्स्वरूपानुग्रहणपरेणप्रेरितान्यमूनि भूतानि मद्वि द्वि
षंतीति द्वेषरहितो मैत्रस्तेषु सर्वभूतेषु हितस्य पकुर्वत्स्व च पर
मात्मापिष्ठान्यस्तनीतिभावे नास्तिरपस्तेषु मैत्रीं कुर्वन्निस्पर्धः करुणः

मिते

केनचिल्लिंगेन दुःखितेषु मा भूदेषो दुःखमिति भावेन करुणां कुर्व
न्नेव पुनरर्थकः एवकारस्य सर्वैस्सह संबंधस्तेनाद्वेष्ट्रादिगुणव
र्जितो यः स मम प्रियो भक्त इति सूचितम् निर्ममः देहगेहपुत्रक
लत्रादिषु प्रकृते रमी विकारा ममैते चकर्मानुसारिणो भगवदि
च्छयेह प्राप्ता न ममेति तेषु ममताशून्यः निरहंकारः देहात्मा
भिमानशून्यः समदुःखसुखः समे दुःखसुखे यस्य स तथा दुःखेम
नुद्वेगशून्यः सुखे सति हर्षरहितो न एवं तनोः सुखदुःखादि सहि
ष्णुः १३ ॥

मधुसूदनी टीका ९

सर्वाणि भूतान्यात्मत्वेन पश्यन्नात्मनो दुःखहेताविव प्रतिकूल
बुद्ध्यभावान्न द्वेष्टा सर्वभूतानां किंतु मैत्रः मैत्री स्निग्धता तद्वान्
यतः करुणः करुणा दुःखितेषु दया तद्वान् सर्वभूताभयदाता प
रमहंस परिव्राजक इत्यर्थः निर्ममः देहेपि ममेति प्रत्ययरहितः
निरहंकारः वृत्तस्वाध्यायादिकृताहंकारान्निष्क्रांतः द्वेषरागयोरप्र
वर्तकत्वेन समे सुखदुःखे यस्य सः अतएव क्षमी आक्रोशताडना
दिनापि न विक्रियामापद्यते १३ ॥

सदानंदी टीका ११

अथ तत्त्वविदां धर्मजातं मोक्षैकसाधनं मुमुक्षूणां हितार्थाय ह
रिणात्रोपदिश्यते १ यः सर्वाणि भूतानि स्वात्मत्वेनात्त आत्मवि
त् दुःखहेतावपि स्वस्य प्रतिकूलधियोज्झितः २ न द्वेष्टा सर्वभूता
नां किंतु मैत्रीयुतोऽखिले दुःखितेषु दयावांश्च सर्वभूताभयप्रदः २
देहे देहोपकरणे ममेति प्रत्ययोज्झितः अहेनात्मावबोधेन निष्क्रां
तोहंकृतेर्मलात् ४ रागद्वेषविहीनत्वाद्यस्य दुःखसुखे समे आ
क्रुष्टस्ताडितो वाप्येति निर्विकारमनाः क्षमी १३ ॥

नीलकंठी टीका १२

परमप्रकृतस्यात्तरस्योपासकस्येति तद्गुणकथने हि साधकानां
तेषु गुणेष्वादरो भविष्यतीति बुद्ध्याह अद्वेष्टेति अद्वेष्टा चेदुदासी
नः स्यात्तत्राह मैत्रः मित्रमेव मैत्रो न तूदासीनः कदाचिदपि नत्व

श्री॰
गी॰ टी॰
द्वा॰

61

यस्मिन् शत्रौ सति कथं मैत्रत्वं स्यादत आह करुण इति दुःखदातारम
पि करुणया न बाधितुमीष्टे अपि त्रातुमेवेच्छति एतेन सर्वभूताभ
यप्रदः संन्यासीत्युक्तः अत एव तस्य निर्मम इति विशेषणं युज्यते
सुखमत्सरविद्वेषलक्षणं निरहंकार इति अहंकारो हि सर्वानर्थनि
दानं स एव निर्गतो यस्मात् स निरहंकारः अत एव समे दुःखसुखे
यस्य तत्र को मोहः कः शोक एकत्वमनुपश्यत इति श्रुतेः क्षमी क्ष
मावान् परिभवप्राप्तावपि स्वस्थचित्तः अन्योपि मन्मन्त्रेणानेन य
मीनतुतिष्ठेदित्यर्थः १३ ॥

+ तदेवं स्वकरत्वेन साकारोपासनं स्तुत्वाद्वयेषा
मपि भक्तानां धर्मानाह ॥

आनंदीटीका

+ अत्र मैत्री करुणा मुदितोपेक्षेति चत्वारि चित्तपरिकर्माणि लक्षि
तानि सर्वभूतेषु द्वेषाविर्भावाद्द्वेषाभावः निर्ममः ममेदं परस्ये
दमिति त्यक्तभेदबुद्धिः निरहंकारः अहंकर्तृत्वाभिमानहीनः १३

+ अथेदृशस्य त्यागिनः परसाम्यसमापन्नसंविदात्मभू
तस्य भक्तस्य लक्ष
णमाह ॥

रामकंठीटीका

+ परं ब्रह्मात्मकमतत्त्वरूपसमापत्तिसूचकैर्विविधगुणविशिष्टो यः ।
स मद्भक्तः स एव च मे प्रिय आत्मभूतत्वाद्दयितः कीदृशः सर्वस्याम्
समापन्नतात्सु चराचरेषु विलेषु भूतेषु द्वेष्टा द्वेषलक्षणादोषरहितः
स्वात्मतया सर्वभावजातं पश्यतस्तस्य द्वेष्याभावाद्द्वेषाभाव इत्यर्थः ६०
अनेन भावनिषेधात्मके समाधौ हि द्वेषदोषानुवेधच्छेदः प्रागुक्तेनो
दितः अत एव मैत्रः सर्वत्र सौहार्दवान् तथा करुणो दयावान् यतो
निर्ममः ममेदमेतदित्यर्थक्रियाकारितया स्वमिति परिग्रहबुद्धे ।
निष्क्रान्तः तथा देहादावनित्यवस्तुनि एष अहंकारप्रत्यया निष्क्रान्तो निर
हंकारः तथा ममैव वेद्यत्वमात्रेण प्रतिभासमानत्वादन्तेनताविष्कृ
तेद्वेषरागात्मकविकारत्वात् तुल्ये सुखदुःखे यस्य १३ ॥

लासिकी टीका

अधुना सर्वेषां बुद्धियोगादिप्रतिष्ठितानां योगिनां भक्तियोगाविना
कृतानां लक्षणपुरःसरं स्वबलभत्वमाह द्वाभ्यां तत्रादौ भक्ति
योगनिष्पन्नस्य लक्षणमाह अद्वेष्टेति मैत्र्यादिचित्तसंस्का
रसंपन्नः निर्ममो निरहंकारः ॥ ॥ ॥

ममैतदिति अहमस्यदारोहं तेजस्वीत्यादिरहंकारस्तेनोयस्य न स्तः
तथा समदुःखसुखः समे तत्स्याचित्तविकारात्तस्मादेके दुःखसु
खे यस्य ताद्दशः क्षमावतः क्षमी सहनशीलः हर्षविषादपार
तंत्र्यमयत्क्लन् १३ ॥

पंचोली टीका

एवंभूतस्य युक्तस्यात्तिप्रमेव परमेश्वरप्रसादहेतून् धर्मानाह
अद्वेष्टेत्यष्टभिः सर्वभूतानामद्वेष्टा सर्वमात्मत्वेन पश्यन् आत्मनो
दुःखहेतावपि न द्वेष्टि मैत्रः मित्रभावयुक्तः करुणो दयालुः निर्ममः
ममत्वबुद्धिरहितः निरहंकारः अहंबुद्धिरहितः सुखदुःखयोः प्री
तिद्वेषरहितः समदुःखसुखः आकृष्टो हतो वा विक्रियारहितः क्ष
मी १३ ॥

रणवीरसमिद्धोधिनी ॥

भक्तस्येश्वरप्रसादहेतून् धर्मानाह अद्वेष्टेति अद्वेष्टा न द्वेष्टा सर्वभू
तानामभयप्रदः क्षत्रिय इत्यर्थः तथ यथाहं रागद्वेषहीनोपि सर्व
लोकोपकाराय यावतारानगृहीत्वा लोककंटकान् रावणादीन्हत
वांस्तथैव यो यो भक्तोपि रागद्वेषहीनो दुष्टान्दुष्टे निहत्य सर्वभू
ताभयप्रद इत्यर्थः तथा मैत्रः करुणश्चामि रतयावर्तते मैत्रः सखे
व करुणः कृपालुर्दीनेषु निर्ममो निरहंकारश्च ममेदं जेयं मयै
तत्कृतमित्यादि शून्यो दत्ता ममत्वे विहाय स्वयमपर इत्यर्थोतएव
समदुःखसुखः समे तत्सुखदुःखे हेमवर्षणादुःखेदवर्णादि सुखं
युद्धे जयाभिगमनादि यस्य सोतएव क्षमी सर्वेसहिष्णुरिति सुख
दुःखाभिसंधि परादित्ये नभीतभूताभयदानाय दिपवः संयोयनी
याः क्षत्रियस्येति तात्पर्यं १३ ॥

मधुभाष्य

१३ ॥

62

भाषा अनुवाद टीका

अब पूर्वउक्त भक्तके ऊपर शीघ्र भगवनकी कृपा होने का हे
तु रूप सकल धर्म श्रेष्ठ श्लोकसे कहतेहैं कि साधारण से स
व जीवों के साथ निर्वैर और सबका मित्र तथा दयावान अर्था
त् समान से मै त्री औ हीनपर कृपा कारी और ममता विहीन
अहंकार शून्य औ कृपालुतासे और का सुख दुख देखि अप
ने सुखदुख समान जो जानैहै ऐसा अपने सुखदुखमे समदु
ष्टि औ क्षमा शील परमेरी शीघ्र प्रसन्नतहै १३ ॥

दोहा

अद्वेषि सम भूतमे मैत्र कृपालुपद निर्मम निरहंकार स
म दुखसुख क्षमादि सेद १३ ॥

संतुष्टः सततं योगी यतात्मा दृढनिश्चयः
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः १ ४

शांकरभाष्यं टीका १

सन्तुष्ट इति सन्तुष्टः सततं नित्यं देहस्थितिकारणस्य लाभेव उप
न्नाले च प्रत्ययः तथा गुणवल्लाभे विपर्यये सन्तुष्टः सततं योगी स वे
माहितचित्तः यतात्मा संयतस्वभावो दृढः स्थिरो निश्चयोऽध्यवसा
यो यस्यात्मतत्वविषये स दृढनिश्चयो मय्यर्पिते मनोबुद्धिः संक
ल्पात्मकमनोऽध्यवसाय लक्षणा बुद्धिस्त मय्येवार्पिते स्थापिते
मनोबुद्धी यस्य सन्न्यासिनः स मय्यर्पितमनोबुद्धिर्य ईदृशो मद्भक्तः
स मे प्रियः १४ ॥

आनंदगिरिकृत टीका २

अक्षरोपासकस्याज्ञानतो विशेषणान्तराण्याह सन्तुष्ट इति सत
तमिति सर्वत्र सम्बध्यते कार्यकारण संघातः स्वभावशब्दार्थः
स्थिरत्वं कुतर्कादिनानभिभवनीयत्वं मद्भक्तो मद्भजनपरो ज्ञान
वानिति यावत् १४ ॥

स्वामिकृत टीका ३

सततं लाभालाभे च संतुष्टः प्रसन्नचित्तः योगी अप्रमत्तः यतात्मा
संयतस्वभावः दृढो मद्विषयो निश्चयो यस्य मय्यर्पिते मनोबुद्धी
येन स एवंभूतो यो मद्भक्तः स मे प्रियः १४ ॥

पिशाचभाष्यं टीका ४

[illegible] १५
स्पष्टार्थं १४ ॥

रामानुजभाष्यं टीका ५

संतुष्टो यदृच्छोपनतेन येन केनचिदपि देहधारणद्रव्येण संतुष्टः स
ततं योगी सततं प्रकृतिविप्रुक्तात्मानुसंधानपरः यतात्मा निय
मितमनोवृत्तिः दृढनिश्चयः अध्यात्मशास्त्रोदितेष्वर्थेषु दृढनि
श्चयः मय्यर्पितमनोबुद्धिः भगवान् वासुदेवोऽनभिसंहितफले
नानुष्ठितेन कर्मणाराध्यते आराधितश्च ममात्मा परोद्धं मा पाये

64

ध्यतीतिमय्यर्पितमनोबुद्धिःएवंभूतोमद्भक्तःएवंभूतेनकर्मयोगे
नमांभजमानोयःसमेप्रियः १४ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थं १४ ॥

परमार्थप्रपा टीका ७

संतुष्टइति सततंनिरंतरं लाभेऽलाभेवासंतुष्टःप्रसन्नचित्तः योगी
अप्रमत्तः यतात्मासंयतचित्तः दृढःप्रबलःमद्विषयोनिश्चयोय
स मय्यर्पितेमनोबुद्धीयस्य एवंविधोयोमद्भक्तः समेप्रियःस
खा १४ ॥

वनमाली टीका ८

संतुष्टदेहस्थितिकारणस्यलाभे लाभेवसंतुष्टोऽन्यतालेप्यन्वयः
तथागुणवल्लाभेविपर्ययेचसंतुष्टइतिसर्वत्रसंबध्यतेयोगी
मयिसमाहितचित्तःसंयतात्मासंयतदेहेंद्रियादिसंघातःभग
वान्ममस्वामीसंसारभयमोचकइत्यचलनिश्चयवान् मय्यनंत
गुणेभक्तवत्सलेऽर्पितमनोबुद्धिःभगवानेवममस्वामीहेगुरुर्वे
धुरिष्टोमोमदिष्टो नास्तीत्यर्पितंसंकल्पविकल्पकंमनोऽध्यवसा
यात्मिकाचबुद्धिर्येनईदृशोमद्भक्तोमयिसर्वार्पितमनवधीपूर्वकावि
च्छिन्नप्रेमप्रवाहःभक्तःसममातिप्रियः नत्वितिकियतीप्रीतिर्मया
सर्वज्ञेनापीयत्तयावक्तुमशक्येतिभावः १४ ॥

उत्तमवैजयन्ती टीका ९

किंचसंतुष्टइतिसततं क्षुत्पिपासादिकालेऽपिसंतुष्टःयदृच्छोप
लब्धेनयेनकेनापि देहधारणमात्रेणवस्तुनाप्रसन्नचित्तःकृत
एवंयतःसततंसर्वकालेसर्वावस्थायांचयोगीप्रकृतिविमुक्तात्म
स्वरूपायानुसंधानयुक्तमनाःयतोयतात्माविजितबाह्याभ्यंतर
करणःएवमेवकृतोयतोदृढनिश्चयःदृढकृतकादिभिरप्य
नभिभूयमानोनिश्चयःकस्यकिंकरोऽहमस्मीत्यध्यवसायोयस्य
सतथा यद्वा अध्यात्मशास्त्रादिनेश्वरोऽस्तितादिहनुक्तिप्रवादाद्यो
देवान्तरोपासकवाक्यवर्त्मरण्यपाटवैरेतोनिश्चयोविश्वासोयस्य
सतथानदेवकृतःमय्यर्पितमनोबुद्धिःसमर्पितांतःकरणःएवं

भूतोयस्समेममभक्तोऽनभिसंहितफलेनकर्मयोगेनमांभज
मानःसएववममभक्तोऽनभिसंहितफलेनकर्मयोगेनमांभ
जमानःसएववममप्रियः मदर्पितप्रीतिकर्ता १४ ॥

मधुसूदनी टीका ९

तस्यैव विशेषणांतराणिसंततेशरीरस्थितिकारणस्यलाभेऽलाभेचला
भेचसंतुष्टःउत्पन्नाऽलंप्रत्ययःतथागुणवल्लाभेविपर्ययेचसत
तमितिसर्वत्रसंबध्यतेयोगीसमाहितचित्तःयतात्मासंयतश
रीरेंद्रियसंघातःदृढःकृतः किंकैरभिभवितुमशक्यतयास्थिरो
निश्चयो ह्यमस्मिब्रह्मकर्त्ताभोक्तासच्चिदानंदाद्वितीयंब्रह्मेत्यध्यवसा
योयस्यसःदृढनिश्चयःस्थितप्रज्ञइत्यर्थःमयिभगवतिवासुदे
वेशुद्धेब्रह्मण्यर्पितमनोबुद्धिःसमर्पितांतःकरणःईदृशो
योमद्भक्तःशुद्धात्मब्रह्मवित्समेप्रियःसदात्मत्वात् १४
[illegible] १४ ॥

सदानंदी टीका ११

प्राप्तालंप्रत्ययोलाभालाभयोःसर्वदावशी समाहितमनादां
तशरीरेंद्रियग्रामःति १ प्रवाल्यानिश्चयोयस्यवादिभिश्चकुता
किंकैःसमर्पितांतःकरणोवासुदेवेपरेमयि २ ईदृशोमत्स्वरू
पोसौमद्भक्तोतिप्रियोमम ३ १४ ॥

नीलकंठी टीका १२

संतुष्टःयदृच्छालाभेनैवसंजातालंप्रत्ययः सततंसर्वदा यो
गीश्रवणादौसमाहितचित्तः यतात्मासंयतशरीरेंद्रियादिसं
घातःदृढःस्थिरआत्मतत्त्वविषयेनिश्चयोयस्यसदृढनिश्चयोऽ
संभावनाद्यनाहतनिश्चयवान् मयिनिर्गुणेब्रह्मण्यर्पितेनि
हितेप्रविलापितेवामनःसंकल्पादिरूपंबुद्धिरध्यवसायलक्ष
णोभयेनसमदर्पितमनोबुद्धिःएतादृशोयोमममभक्तःसमे
ममप्रियःआत्मत्वादेवसपरमप्रेमास्पदं ज्ञानीत्वात्मैवमेमत
मित्युक्तं एतेनपूर्वश्लोकोक्तायानिरहंकारतायाःसाधनान्यु
क्तानि १४ ॥

65

[illegible] आनंदीटीका

संतुष्टः अलब्धलाभेष्वाकांक्षाहीनः १४ ॥

रामकंठीटीका

तथात्मनीक्रोधादिविकाररहेतभूतितितिक्षावान् तथाऽस्वीकृततज्जा
तपरामृततयाऽनित्यतुष्टः सदातिनिराकांक्षः तथायतात्मायतः
स्वात्मन्येवावस्थापितआत्मायेनसतथा सर्वत्रप्रवृत्ताअनात्मवि
षयादेनियमितात्मप्रत्ययाः तथादृढनिश्चयः केनविद्विकल्पे
नप्रकंपयितुमशक्यत्वाद्दृढः स्थिरोऽध्यवसायोयस्यसतादृशः
तथासर्वव्याख्यातक्रमेणाऽस्मिपरमात्मनित्वर्पिते निवेशितेमनो
बुद्धीयेन सएवंगुणविशिष्टोमद्भक्तउच्यते एवंविधस्सामग्रीसंपाद
यतोपकरणसंपादितवतोऽस्यैव [illegible]
[illegible]
[illegible] १४ ॥

लासिकी वल्लभीटीका

[illegible]
[illegible] तथास
[illegible]
[illegible] ति 'संतुष्टेति

यासंतुष्टः यथालाभेनसंतोषंभजमानः तथासततमपरिछिन्ने
कालव्यवहारावस्थायामपियोगीयथोपनतेयोगेसमाहितः क
र्थयतात्मायतः संयतः प्रत्यवमर्शेनापरित्यक्त आत्मास्वस्वभा
वोयेनसः दृढनिश्चयः दृढोविचाल्योनिश्चयआत्मविषयोऽवबो
धोयस्यसः एवंमुक्ताने स्थितिंभजमानः अथसमाधानेमय्यर्पि
तमनोबुद्धिरेवंविधोमद्भक्तोममेश्वरस्यानुरागातिशयेनोपासी
नः सममप्रियः [illegible] १४ ॥ ॥

पंबोलीटी॰

संतुष्टइतिसर्वदालाभालाभयोः समः संतुष्टः समाहितचित्तः
योगीसंयतस्वभावः यतात्माआत्मतत्वविषयेदृढनिश्चयः मयि
विषयेअर्पितमनोबुद्धिसंकल्पविकल्पात्मकमनोव्यवसायात्मि

काबुद्धिस्तेन मनोबुद्धीअर्पिते येन सः मय्यार्पितमनोबुद्धिः य एवंवि-
धःयो मद्भक्तः स मे मम प्रियः १४

श्रगवीरसमिद्धोथिनी

संतुष्टइति योगीस्वधर्मेसमाहितचित्तोयोभक्तोयोद्दव्यमेवमेइति
हृत्वाजयेपराजयेवसततंनित्यंसंतुष्टः प्रसन्नचित्तस्तथायतात्मा
यतोगृहीतआत्माधृतिबुद्धे येनसयतात्मागृहीतधृतिरित्यर्थः दृ
ढोबुद्धेनैवमेसर्वार्थसिद्धिरित्येवंनिश्चयोयस्य सदृढनिश्च-
यो मय्यर्पितेमनोबुद्धीयेनैवंभूतोमद्भक्तोममात्यंतंप्रियः १४॥

मधुभाष्य

१४॥

भाषा अनुवाद टीका

और हानि लाभ मे प्रसन्न चित्त तथा अप्रमत्त वशीभूत स्वभा
व औ सतविषय मे दृढ़ निश्चय और मेरे मे अर्पण किया है
मन बुद्धि जिसने ऐसा जो मेरा भक्त सो हमै अति प्रिय है १४

दोहा

योगी नित्य प्रसन्न है जितमन दृढ़ विश्वास मनबुधि मोहि
समर्पित मो प्रिय जो मो दास १४

61

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः १५

शांकरभाष्य टीका १

प्रियोहि ज्ञानिनोत्यर्थमहं सच मम प्रिय इति सप्तमेध्याये सूचितं
तदिह प्रपंच्यते यस्मादिति यस्मात् सन्न्यासिनो नोद्विजते नोद्वेगं
गच्छति न सन्तप्यते न संक्षुभ्यते लोके लोकात् नोद्विजते च यः
हर्षामर्षभयोद्वेगैः हर्षश्चामर्षश्च भयञ्चोद्वेगश्च तैः हर्षामर्ष
भयोद्वेगैर्मुक्तो हर्षः प्रियलाभे अन्तःकरणस्योत्कर्षो रोमाञ्च-
नाश्रुपातादिलिङ्गः तथा अमर्षोऽभिलषितप्रतिघाते असहिष्णु
ता भयन्त्रासः उद्वेग उद्विग्नता तैर्मुक्तो यः स च मे प्रियः १५ ॥

आनंदगिरिकृत टीका २

ज्ञानवतो भगवत्प्रियत्वे प्रमाणमाह प्रियो हीति किमर्थं तर्हि
पुनरुच्यते तत्राह तदिति उद्वेगादिराहित्यमपि ज्ञानवतो वि-
शेषणमित्याह यस्मादिति न केवलमुद्वेग प्रत्यपादनत्वमेव
सन्न्यासिनो नाद्युपपन्नं किन्तु तत् कार्यत्वमपीत्याह तथेति अ
सहिष्णुता परकीयप्रकर्षस्येति शेषः त्रासस्तस्करादिदर्शनाधी
नः उद्विग्नत्वमेचिन्तनाधीनस्य लोकादिति यावत् १५ ॥

स्वामिकृत टीका ३

किंच यस्मादिति यस्मात्सकाशाल्लोको जनो नोद्विजते भयशंक
याक्षोभं न प्राप्नोति यश्च लोकान्नोद्विजते यश्च स्वाभाविकैर्हर्षादि
भिर्मुक्तः तत्र हर्षः स्वेष्टार्थलाभे उत्साहः अमर्षः परस्य लाभे
असहिष्णुता भयं त्रासः उद्वेगो भयादिनिमित्तश्चित्तक्षोभः यस्तै
र्विमुक्तो मद्भक्तः स मे प्रियः १५ ॥

पिशाचभाष्य टीका ४

यस्मादिति उद्वेगश्चलचित्तता अमर्षः क्रोधः १५ ॥

रामानुजभाष्य टीका ५

यस्मादिति यस्मात् कर्मनिष्ठात्पुरुषान्निमित्तभूताल्लोको नोद्विज
ते यो लोकोद्वेगकरं कर्म किंचिदपि न करोतीत्यर्थः लोकाच्च निमि

नभूतायोनोद्विजते यस्तुदिश्यसर्वोलोकोनोद्वेगाकरंकर्मकरोतिस
र्वाविरोधित्वतिष्ठयातन्नप्रनएवकेचनप्रतिहर्षणकेचनप्रत्यमर्ष
णकेचनप्रतिभयेनकेचनप्रतिउद्वेगेनमुक्तः एवंभूतोयियःसोपि
मेप्रियः १५ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थं १५ ॥

परमार्थप्रपा टीका ७

किंच यस्मादिति समेप्रियइत्युक्तेसकः यस्माल्लोकोनोद्विजतेसर्व
भूतेषुनिष्ठतापिशानान्वीतत्त्वगणात् तदुक्तं नोन्मत्तायिष्ठनाजना
हिरमतेसर्वात्मभूतः प्रेमास्तस्मात्सर्वेसुत्वन्नमादपिजनोनाशंक
तेकस्मात् अस्मत्यैर्जलजैन्नभिजेलनिधिर्नवाधिमैवोत्तालता
यादोसिभजेतिभीतिमुदयेन्नूजितात्मर्वतः इति किंच हर्षाम
र्षभयोद्वेगैर्योमुक्तः हर्षः स्वार्थलाभउत्साहः अमर्षः परलाभे
असहमानतोभयेत्रासः उद्वेगोभयादिनिमित्तश्चित्तःक्षोभः १५

वनमाली टीका ८

यस्मात्सर्वभूताभयदात्कायमनोवाग्भिः सर्वभूतहिंसारहिता
ल्लोकोजनः कश्चिदपिनोद्विजतेतथालोकान्निरपराधोद्वेजनैकव
तात्खलजनान्नोद्विजेच्चयः परमकारुणिकत्वेनक्षमाशीलत्वात्
सर्वस्यभगवदधीनत्वदर्शित्वाच्च हर्षःस्वस्यप्रियलाभेरोमांचा
पातादिहेतुः कश्चिच्चित्तवृत्तिविशेषः अमर्षःपरोत्कर्षासहनरूप
श्चित्तवृत्तिविशेषः भयंव्याघ्रादिदर्शनजन्यचित्तवृत्तिविशेषश्च
उद्वेगः एकाकीकंपःविजनेसर्वपरिग्रहशून्योजीवेष्यामीत्येवं
वृत्ति विधोव्याकुलतारूपश्चित्तविशेषस्तैर्हर्षामर्षभयोद्वेगैर्मुक्तोयःसो
पिमद्भक्तोममप्रियः १५ ॥

ऊसमवैजयन्ती टीका ९

किंचयस्मादिति यस्मान्ममकर्मकर्तुः पुरुषात्त्रिमित्रभूतात्लोकः
सुहृन्मित्राद्युदासीनः कोपिजनोनोद्विजतेभयशोकादिनाक्षोभंन
प्राप्नोतिकारुणिकत्वात् येनकर्मणालोकउद्वेगंप्राप्नोतितत्कर्म
नतत्कर्मकरोतीत्यर्थः यश्चलोकात्त्रिमित्रभूतात्नोद्विजतेसर्वावि

रोपिनतिष्ठयाल्लोकोपिनउद्वेगकरंकर्मनकरोतिअतएवहर्षाम
र्षभयोद्वेगैः हर्षस्वस्यानुकूलपुत्रमित्रलड्डकादिवस्तुलाभेरोमो
चाश्रुपातादिहेतुरान्तरश्चेजकश्चित्तवृत्तिविशेषः अमर्षः स्वप्रतिकू
लनिग्वादिवस्तुलाभेऽसहनरूपश्चित्तवृत्तिविशेषः भयंव्याघ्र
सर्पादिदर्शनत्रासः उद्वेगः एकाकीसर्वपरिग्रहशून्योविजनेव
नेकथंजीविष्यामीत्येवंविधोव्याकुलतारूपश्चित्तवृत्तिविशेषस्तैः
कर्तृभिर्मुक्तोऽमुक्तोनत्वतेषामोचनेस्वयंव्यापारवान् अतिगंभीरा
त्मरातिनियतगतत्वात्स्पर्शगन्धेनापिरहितइत्यर्थः एवंभूतोयः
सोपिमेममप्रियोभवति १५ ॥

मधुसूदनी टीका ९

जनस्तस्यैवविशेषणानि

यस्मात्सर्वभूताभयदायिनः संन्यासिनोहेतोर्नोद्विजतेनसंतप्यते
लोकोयः कश्चिदपिजनः तथालोकात्तिरपराधोद्वेजनैकव्रता
नूखलजनान्नोद्विजतेचयः अद्वैतदर्शित्वात् परमकारुणिका
त्वेनक्षमाशीलत्वाच्चकिंच हर्षः स्वस्यप्रियलाभेरोमांचाश्रुपाता
दिहेतुरान्तराभिव्यंजकः चित्तवृत्तिविशेषः अमर्षः परोत्कर्षास
हनरूपचित्तवृत्तिविशेषः भयंव्याघ्रादिदर्शनाधीनंचित्तवृत्ति
विशेषः त्रासः उद्वेगः एकाकीकथंविजनेसर्वपरिग्रहशून्योजी
विष्यामीत्येवंविधोव्याकुलतारूपः चित्तवृत्तिविशेषः तैर्हर्षाम
र्षभयोद्वेगैर्मुक्तोयः अद्वैतदर्शनपाटवयोग्यत्वेनतैरेवस्वयंप
रित्यक्तोनतुतेषांत्यागायस्वयंव्यापृतइतिपावत् वहेतेनयोम
द्भक्तइत्यनुकृष्यते ईदृशोमद्भक्तोयः समेप्रियइत्यर्थः एवं [illegible] १५
ति

सदानंदी टीका ११

संतप्यतेनयः कश्चिदपिजनविरोधतः नयः संतप्यतेदुष्टजनात्
एवहयात्मवित् १ प्रियलाभेमनोवृत्तिः सत्वाभिव्यंजिकातिया रो
मांचनासूपातादिहेतुः साहर्षशाहिता इष्टहानेसहिष्णुत्वममम
र्षश्चभयंतथा चित्तव्याकुलतोद्वेगइत्येतैर्भीतिहेतुकैः स्वयमेव
परित्यक्तस्तत्वदर्शीसमेप्रियः १५ ॥

नीलकंठी टीका १२

श्री·
गो·टी·
६ा·

69

सर्वतोनिरहंकारोद्विविधःसमाधिस्थोव्युत्थितश्च तयोर्लक्षणंक्रमे
णाहद्वाभ्यां यस्मादिति यस्मात्समाधिस्थत्वेनकाष्ठसमात्लो
कोनोद्विजतेनचस्वयं लोकादपियोनिर्मनस्कत्वान्नोद्विजते अ
तएवहर्षइष्टलाभेसतिमनसउत्फुल्लता अमर्षःअसहिष्णुता
भयंत्रासोच्छेदशंका उद्वेगस्तत्कृतैवव्याकुलता एतैर्निर्मनस्क
त्वादेवस्वयमेवमुक्तस्त्यक्तः नत्वेतान्स्वयंप्रयत्नेनत्यजतिसाधकव
त् ईदृशोयोमद्भक्तःसचमेप्रियः १५ ॥

आनंदीटीका

अद्वेष्टेत्यादेःलक्षणमिदम् १५ ॥

इदानीमुत्तरेषुश्लोकेषुप्रकृष्टभक्तविशेषणत्वेनोपात्तानि
पदानिबहुशोव्याख्यातत्वा
यार्थत्वात्पसंतेपव ॥

रामकंठी टीका

स्पष्टार्थम् १५ ॥

लासिकी [illegible]मीटीका ॥

अथ कर्मयोगिनो लक्षणमाह—

यस्माद्बुद्धियोगियुक्तामप्रज्ञाकर्मयोगिनःसकाशाल्लोकः
सांसारिकजनःनोद्विजते नत्रिक्रियत्वहेतुकं निर्वेदंनप्राप्नोति
लोकवत्सांसारिककर्मसव्यापृतत्वात् अथचयश्चकर्मयोगीलोका
त्सांसारिकलोकान्नोद्विजते निरोधयोगीवविरक्तोभवत्वान्नि
र्वेदंनप्राप्नोति लोकमध्येपिनस्यनितसमाहितत्वात् तथाहर्षः
इष्टलाभेचित्तोल्लेकः अमर्षःपरस्यलाभेऽसहनम् भयंत्रासः
उद्वेगश्चित्तक्षोभः एतैर्विमुक्तोयमद्रूपासकःसमेप्रियः [illegible]
१५ ॥

पंचोलीटीका

यस्मादिति यस्मात्संन्यासिनःसकाशाल्लोकोनोद्विजतेउद्वेगनग
च्छतियःसंन्यासीलोकान्नोद्विजतेनसंतप्यतेप्रियलाभेअंतःकर
णस्यउत्कर्षःरोमांचाश्रुपातादिलिंगोहर्षःअसहिष्णुताअमर्षभयं
त्रासउद्वेगउद्विग्नतातैर्विमुक्तोयःसमेप्रियः १५

किंच यस्मात्सकाशाद्भयस्य दानेन भीतु जनो नोद्विजते संक्षोभं न याति यश्च कथमहमेभ्यो भीतेभ्यो हितं करोमीत्यतः क्षोभं न याति हर्षः स्वस्येष्टार्थलाभे उत्साहोऽमर्षः परस्य लाभे असहनं भयं त्रास उद्वेगो भयादि निमित्तश्चित्तक्षोभ एतैर्मुक्तो दुष्टपीडितलोकरक्षणाय विमर्षापतितं हर्षादिकमनालोच्य योऽयं यतिः स्वस्वधर्मे स्थितरक्षयितीति को भक्तो मम प्रिय इत्यर्थः १५॥

मधुभाष्य

१५॥

70

## भाषा अनुवाद टीका

और जिस पुरुष से लोग भय के द्वारा उद्वेग कहे चित्त क्षोभ नही पावते और जिस को लोगोंसे उद्वेग नहीं होता है और जो इष्ट होनेसे प्रसन्न औ अनिष्ट होनेसे अप्रसन्न तथा आमर्ष कहें दूसरे की लाभ न देखि शकना जिसके नहीं है और भय उद्वेग से मुक्त जो मेरा भक्त सो मोंहि प्रिय है १५ ॥

दोहा

यासें क्षोभ न लोक जो लोकनसें क्षोभ न मोहि हर्ष क्रोध
भय वेगसें मुक्त जु सो प्रिय मोहि १५॥

71

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः स
र्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः १६

शांकरभाष्ये टीका १

अनपेक्ष इति देहेन्द्रियविषयसम्बन्धादिष्वपेक्षा यस्य नास्ति स विष
येष्वनपेक्षो निस्पृहः शुचिर्बाह्याभ्यन्तरेण च शौचेन सम्पन्नो दक्षः प्र
त्युपन्नेषु कार्येषु सद्यो यथावत् प्रतिपत्तुं समर्थः उदासीन इति उदा
सीनो न कस्यचिन्मित्रादेः पक्षं भजते यः स उदासीनो यतिर्गतव्य
थो गतभयः सर्वारम्भपरित्यागी आरभ्यन्त इति आरम्भा इहामुत्रफ
लभोगार्थानि कामहेतूनि कर्म्माणि सर्वारम्भास्तान् परित्यक्तुं शी
लमस्येति सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः १६ ॥

आनंदगिरिकृत टीका २

निरपेक्षत्वादिकमपि ज्ञानिनो विशेषणमित्याह अनपेक्ष इति आ
दिपदमपेक्षणीयसर्वसंग्रहार्थं प्रतिपत्तव्येषु प्रतिपत्तिं कर्त्तव्येषु
कर्त्तव्येत्यर्थं परैस्ताडितस्यापि गताव्यथा भयमस्येति सुप्यतिमा
त्रिन्याहगतेति १६ ॥

स्वामिकृत टीका ३

किंचानपेक्ष इति अनपेक्षः यदृच्छोपस्थितेप्यर्थे निस्पृहः शुचिर्बा
ह्याभ्यंतरशौचसंपन्नः दक्षः अनलसः उदासीनः पक्षपातरहितः
गतव्यथः आधिशून्यः सर्वान् दृष्टादृष्टार्थानारंभानुद्यमान्परित्यक्तुं
शीलं यस्य सः एवंभूतः सन् यो मद्भक्तः स मे प्रियः १६ ॥

पिशाचभाष्ये टीका ४

स्पष्टार्थं १६ ॥

रामानुजभाष्ये टीका ५

अनपेक्ष इति अनपेक्ष आत्मव्यतिरिक्ते कृत्स्ने वस्तुन्यनपेक्षः शुचिः
शास्त्रविहितद्रव्यवर्द्धितकायः दक्षः शास्त्रीयक्रियोपादनसमर्थः य
अन्यत्रोदासीनः गतव्यथः शास्त्रीयक्रियानिर्वृत्तावर्जनीयशीतोस्न
वर्षनर्षादिदुःखेष्वव्यथारहितः सर्वारंभपरित्यागी शास्त्रीयव्यति

श्री॰
गी॰ टी॰
३॰

72

रिक्तसर्वकर्मारंभपरित्यागीयएवंभूतोमद्भक्तःसमेप्रियः १६ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थं १६ ॥ ॥

परमार्थप्रपाटीका ७

किंच अनपेक्षइति अनपेक्षोयदृच्छोपस्थितेप्यर्थेनिःस्पृहः शुचिर्बाह्या
भ्यंतरशौचसंपन्नः दक्षोऽनलसः उदासीनःपक्षपातशून्यः गतव्यथ
आधिशून्यःसर्वान्दृष्टादृष्टार्थानामारंभानुपरित्यक्तुंशीलंयस्यसएवंभू
तःसमेप्रियः १६ ॥

वनमाली टीका ८

निरपेक्षःसर्वभोगोपकरणेष्वप्राप्तेष्वपिनिःस्पृहःशुचिर्यथा शास्त्रं
बाह्यांतरशुद्धःदक्षोमालापायेतिपुराउदासीनःकस्यचिन्मित्रादेःप
क्षमनाश्रितःगतव्यथःपरैस्ताड्यमानोपिव्यथाशून्यःऐहिकामुष्मि
कफलानिसर्वाणिकर्माणिसर्वारंभास्तान्परित्यक्तुंशीलमस्यसः
मद्भक्तोमयिस्नेहवान्सममप्रियः १६ ॥

ऊसमवैजयनी टीका ९

किंचअनपेक्षइति अनपेक्षःआत्मव्यतिरिक्तेष्वैहिकामुष्मिकेषुनाना
कृतभोगपदार्थेष्वपिनिस्पृहःशुचिःशोचिनेनशास्त्रीयेणभगवदारा
धनरूपेणकर्मणावर्हानकरणापाविमःदक्षःप्रकृतिविप्रकात्म
स्वरूपविवेचनसमर्थःउदासीनःपरपक्षपाताग्रहशून्यःगतव्यथः
परैःपीड्यमानोपिपीडारहितःसर्वारंभपरित्यागीसर्वेषांशास्त्रीया
णांस्वाधिकारव्यतिरिक्तानामारंभाणांकर्मणांपरिसमंतात्त्यागेनत्य
क्तंशीलंयस्यसःअनन्याभगवदाराधनव्यतिरिक्तमन्यत्कर्मनकरोती
त्यर्थःएवंभूतोमद्भक्तोममैवसेवनंकर्तुंस्वभावोनान्येषांदेवानामसौ
पिमेममप्रियः १६ ॥

मधुसूदनी टीका १०

किंच निरपेक्षःसर्वेषुभोगोपकरणेषुयदृच्छोपनतेष्वपिनिःस्पृहःशु
चिर्बाह्याभ्यंतरशौचसम्पन्नःदक्षउपस्थितेषुज्ञातव्येषुकर्तव्येषुच
सद्यएवज्ञातुंकर्तुंचसमर्थःउदासीनःनकस्यचिन्मित्रादेःपक्षंभ

जनेयः गतव्यथः परैस्ताड्यमानस्यापि गतानोत्पन्ना पीडा यस्य स
गतव्यथः उत्पन्नायामपि व्यथायामपकर्तृषु नपकर्तृत्वमिति मत्वा
व्यथाकारणेषु सत्स्वपि अनुत्पन्नव्यथत्वमिति भेदः ऐहिकामुष्मि
कफलानि सर्वाणि कर्माणि समारंभाः तान् परित्यक्तुं शीलं यस्य सः
संन्यासी सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः १६ ॥

सदानंदी टीका ॥

निःस्पृहः सर्वभोगेषु बाह्याभ्यंतरशौचवान् उपस्थितेषु कार्येषु स
द्यो ज्ञानेन समर्थकः । कस्यचिन्नैव मित्रादेः पक्षं भजति निर्भयः
दुर्जनैस्ताड्यमानेपि योनत्यजति व्यथो यथावा इहामुत्रार्थकर्माणि त्य
क्तुं शीलं हि यस्य सः मद्भक्तस्तव हृद्धि त्वप्रियो भगवतो मम १६

नीलकंठी टीका १२

अस्यैव गुणातीतावस्थामाह अनपेक्ष इति स्वदेहेप्यहंभावहीनः एवं स्नानेनान्ना
दनेन वालिप्साशून्योऽनपेक्षः शुचिः बाह्याभ्यंतरशौचवान् शु
द्धेन पुण्येन अमलिनो वा दक्षः भगवद्भजनादौ अनलसः उदासी
नो मानापमानादौ समवृत्तिः अनएव गताव्यथा चेतःपीडा यस्य
स गतव्यथः सर्वारंभपरित्यागी संन्यासीनादेव यो मद्भक्तः स मे
प्रियः १६ ॥

आनंदीटीका

अनपेक्षः सर्वविषयस्पृहः दक्षः ज्ञानकर्मसमुच्चयानुष्ठाने सत
तोद्युक्तः १६ ॥

रामकंठीटीका

स्पष्टार्थम् १६ ॥

अथ कर्मसंन्यासिनो लक्षणम् लासिकी [illegible]टीका

माह अनपेक्षो निःस्पृहः शुचिर्बाह्याभ्यन्तरशौचसंपन्नः दक्षः कार्येषु
विचक्षणोपि सन् उदासीनः संगरहितः गतव्यथः नित्यमात्मसमा
विष्टतया आध्यात्मिकादितापत्रयरहितः सर्वान्स्वाभाविकान्विहिता
न्वारंभान् कर्माणि परित्यक्तुं संन्यसितुं शीलमस्य स एवंविधः सर्वो

गी॰
टी॰
द्वा॰

73

लक्षणसंपन्नस्सममभक्तउपासकः समेप्रियः [illegible]
[illegible] १९॥

पंचोलीटीका

अनपेक्षइति एवंविधोयोमद्भक्तःसमेप्रियःकथंभूतःअनपेक्षः
देहेंद्रियविषयसंबंधादिष्वपेक्षारहितोविषयेषुनिस्पृहःवाह्येना
भ्यंतरेणचशौचेनसंपन्नःशुचिःप्राप्तत्वेषुकार्येषुसद्योयथावत्
ज्ञातुंसमर्थःदक्षःयस्यकस्यचिन्मित्रादेःपक्षंनभजतेसयतीउदा
सीनःगतव्यथःगतभयः इहामुत्रार्थकर्मत्यागीसर्वारंभपरित्या
गीयो १६

सुवोधीरसमिश्रोधिनी॥

अनपेक्षइति अविद्यमानान्यस्यवीरस्यशुद्धेपेक्षायस्यसोन
पेक्षःपरवीरापेक्षारहितःशक्तिमान्निरुक्तलवीरइत्यर्थः शु
चिःशुद्धोस्त्रविद्यायांनिर्दोषःस्वभ्यस्तविद्यइत्यर्थः तथा
दक्षस्तत्तदस्त्रशस्त्रप्रयोगेकुशलोतएवोदासीनःतउक्षेः
स्थानेमर्वे सर्वेषामग्रयायितेआसीनउपविष्टस्तथागतव्य
थोगतादूरीभूताव्यथासमरसंरंभोयस्यसगतव्यथः सर्वार
भपरित्यागीशुद्धेसत्त्वेहेसमरसेनसर्वानारंभान्कार्याणिपरि
त्यजति नक्लीबः सर्वारंभपरित्यागी युद्धमेवपरमंकार्यं
मन्यमानइत्यर्थएवंभूतोयोमद्भक्तःस्वधर्मेणमांभजन्स
ममप्रियः १८॥

मधुभाष्य

१८॥

## भाषा अनुवाद टीका

और जिसको अनायास प्राप्त धनकी भी इच्छा नहीं और भीतर बाहर शुचि कहे पवित्र है औ दक्ष कहे आलस्य रहित तथा पक्षपात वर्जित औ गतव्यथ कहे आधिव्याधि शून्य और सर्व आरम्भ कहे उद्यम का त्यागी ऐसा भक्त मेराप्रीय है आधि मन की चिन्ता है और व्याधि रोग को कहतेहैं १८ ॥

### दोहा

इच्छाबिन शुचि दक्ष दे उदासीन गतबाध कर्मारंभसमत्या
गी जोमोप्रिय सो मो साध १८॥

74

योनहृष्यतिनद्वेष्टिनशोचतिनकांक्षति शु
भाशुभपरित्यागीभक्तिमान्यःसमेप्रियः १७

शांकरभाष्यं टीका १

किञ्च यो न हृष्यतीष्टप्राप्तौ न द्वेष्टिनिष्टप्राप्तौ न शोचति प्रियवियोगे
न चा प्राप्तं कांक्षति शुभाशुभे पुण्यपापे कर्म्मणी परित्यक्तुं शीलम
स्येति शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः १७ ॥

आनंदगिरिकृत टीका २

न च क्षमीत्यनेन पौनरुक्त्यं प्रत्युपकारायामपि व्यथायामपकर्तृषून
पकर्तृत्वं क्षमित्वमित्यभ्युपगमाद्द्वेषहर्षादिराहित्यमपि ज्ञानिनो
लक्षणमित्याह किञ्चेति सर्वारम्भपरित्यागीत्यनेन विहितकाम्य
त्यागस्योक्तत्वाद्विहितादन्यत्वमाशङ्क्योक्तेति विशिनष्टि शुभाशुभइति
वैषम्यबुद्ध्यभावादपि ज्ञानिनोविशेषणमित्याहसमइति १७ ॥

स्वामिकृत टीका ३

किंचयोनेति प्रियंप्राप्ययोनहृष्यति अप्रियंप्राप्ययोनद्वेष्टि इष्टार्थना
शेसतिनशोचति अप्राप्तमर्थंनकांक्षति शुभाशुभेपुण्यपापेपरित्य
क्तुंशीलंयस्यसःएवंभूतोभूत्वायोभक्तिमान्समेप्रियः १७ ॥

पिशाचभाष्यं टीका ४

स्पष्टार्थं १७ ॥

रामानुजभाष्यं टीका ५

योनहृष्यतिनद्वेष्टियत्सुमनुष्याणांशोकनिमित्तंभार्यापुत्रवित्तक्ष
यादिकंमनत्प्राप्यनशोचतितथाविधमप्राप्यंचनकांक्षति शुभाशु
भपरित्यागीपापवत्पुण्यस्यापिबंधहेतुत्वाविशेषाच्छुभपरित्यागी
यएवंभूतोभक्तिमान्समेप्रियः १७ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं १७ ॥

परमार्थप्रपा टीका ७

किंच नहृष्यतीति प्रियंप्राप्यनहृष्यतिअप्रियंप्राप्यनद्वेष्टिगतेमरने
वानशोचतिअप्राप्तंनकांक्षति शुभाशुभेपुण्यपापेत्यक्तुंशीलंयस्य
शेषंपूर्ववत् १७ ॥

श्री॰
गी॰ टी॰
द्वा॰

75

वनमाली टीका ८

मोहात्पुत्रादेः प्राप्तौ न हृष्यत्यनिष्टप्राप्तौ च न द्वेष्टि प्राप्तेष्टवियोगे न शोच
ति अप्राप्तेष्टसंयोगं च न कांक्षति सर्वारंभपरित्यागित्वेन हि हृणोति शु
भाशुभसुखदुःखसाधने ये कर्मणी परित्यक्ते शीलं यस्य सः भक्तिमान् यः
स मम प्रियः १७ ॥ मा॰प

कृष्णवैजयन्ती टीका ९

किंच यो न हृष्यतीति यः पुत्रमित्रकलत्रवित्तादीन् स्वप्राणसमानान्
प्रियान्प्राप्य न हृष्यति हर्षं न प्राप्नोति यश्च शत्रुनसत्रवित्तादीनप्रिया
न्प्राप्य न द्वेष्टि द्वेषं न करोति यश्च पुत्रकलत्रवित्तादौ नष्टे सति न शोकं प्रोवति
न करोति यश्च पुत्रवित्ताद्यप्राप्ते सति न कांक्षति तत्प्राप्तिकांक्षां न करोति
यश्च शुभाशुभपरित्यागी शुभं पुण्यमशुभं पापं ते उभये परित्यक्ते शी
लं यस्य स तथा पापवत्पुण्यस्यापि बंधहेतुत्वाविशेषादुभयस्यैव त्यागी
त्यर्थः एवंभूतो यो भक्तिमान् मद्भक्तियुक्तः स मे मम प्रियो भवति १७ ॥

मधुसूदनी टीका १० म

किंच सम दुःखसुखद्वयेन हि हृणोति यो न हृष्यति इष्टप्राप्तौ न द्वेष्टि
अनिष्टप्राप्तौ न शोचति प्राप्तेष्टवियोगे न न कांक्षति अप्राप्तेष्टसंयोगं
सर्वारंभपरित्यागीत्येन हि हृणोति शुभाशुभे सुखसाधने दुःखसाध
ने कर्मणी परित्यक्ते शीलं यस्येति शुभाशुभपरित्यागी यो भक्तिमान्
मे प्रियः [illegible]
[illegible]
[illegible] ॥ १७ ॥

सदानंदी टीका ११

न हृष्यतीष्टसंप्राप्तौ न च तेन विपर्यये न शोचतीष्टनाशे यो नाप्राप्तमभि
कांक्षति पुण्यपापे परित्यक्ते शीलं यस्य स मे प्रियः १७ ॥

नीलकंठी टीका १२

एतमेव श्लोकं व्याचष्टे त्रिभिः श्लोकैः यो नेति इष्टलाभे सति न हृष्यति
अनिष्टप्राप्तौ न द्वेष्टि इष्टवियोगे सति न शोचति इष्टसंयोगमनिष्टप
रिहारं वा न कांक्षति अनपेक्षत्वात् शुभं कल्याणं पुण्यं च अशुभममं
गलं पापं च ते उभे परित्यक्ते शीलमस्य स शुभाशुभपरित्यागी एतेन श्रु
तिव्याख्याने भक्तिमान् भक्तो मत्सेवनोद्युक्त इति द्रष्टव्यः इत्यर्थः १७ ॥

आनंदीटीका

उक्तानामप्यद्वेष्टृत्वादीनां धर्माणां पुनरुक्तिस्तु दृढयत्नबोधनाय इत्याह यो न हृष्यतीति आदिवचनम् १७

रामकंठीटीका

स्पष्टार्थम् १७ ॥

अथ संन्यासयोगिनो लक्षण लासिकी [highlighted]टीका

माह — यः पूर्वकृतश्रवणयुक्तः यदृच्छोपनतेप्रियलाभेनहृष्यति अप्रियला
भेनद्वेष्टि इष्टनाशेनशोचति अप्राप्तंचनकांक्षति शुभमिष्टप्राप्ति
हेतुंकर्म अशुभमनिष्टप्राप्तिहेतुंकर्मसंत्यक्तुंशीलंयस्यसः इदृशो य
भक्तिमानुपासनायुक्तः समेप्रियः [correction fluid, partly legible]
[correction fluid] १७ ॥

पैवोलीटीका

योनहृष्यतीति यःपुरुषः इष्टप्राप्तौनहृष्यतिअनिष्टप्राप्तौनद्वेष्टिप्रि
यवियोगेनशोचतियः अप्राप्तमर्थंनकांक्षतिशुभाशुभपरित्यक्तुं
शीलंयस्यसः शुभाशुभपरित्यागीएवंविधोभक्तिमान्योसमेप्रियः १७

हरणवीरसमिह्लोधिनी

किंच योनेति पुत्रेष्टप्रियं विलोक्य नहृष्यति हानिंवा विलोक्य न
द्वेष्टि मरणभयं विलोक्य नशोकं याति नवाकांक्षति किंतु शु
भाशुभपरित्यागीस्वधर्मोयमनुष्ठेयइत्यनेकोहर्षशोकादीना
मवकाशइति निश्चित्य वान्योभक्तः शुभाशुभाभिसंधिरहितत्वेन
योयतिसममप्रियइत्यर्थः १७ ॥

मधुभाष्य

१७ ॥

76

भाषा अनुवाद टीका

और जो प्रिय वस्तु पाय के सन्तुष्ट औ अप्रिय पायके असन्तुष्ट न होय और इष्ट के नाश होने परभी शोचता नहीं और किसी अप्राप्त वस्तु की आकांक्षा जिसके नहीं है और शुभ अशुभ कहे पुण्य पापका भी त्यागी कहे त्याग का अधिकारी है ऐसा भक्ति युक्त मनुष्य हमै प्रिय है ७ ॥

दोहा

जो नहि हर्ष न द्वेषहि शोचन कांक्षन जोय शुभ अशुभको
त्यागहि भक्तहि मो प्रिय सोय १७

77

समः शत्रौ च मित्रे च तथा मानापमानयोः
शीतोष्णसुखदुःखेषु समः संगविवर्जितः
१८ ॥

शांकरभाष्ये टीका १

सम इति समः शत्रौ मित्रे च तथा मानापमानयोः पूजापरिभवयोः
शीतोष्णसुखदुःखेषु समः सर्वत्र च सङ्गवर्जितः १८ ॥

ज्ञानेश्वरीविकृत टीका २

सम इति अद्वेष्टेत्यादिना द्वेषादिविशेषाभावउक्तः सम्प्रति सर्वत्रै
वाविकृतचित्तत्वमुच्यते सर्वत्र चेतने स्त्रियादावचेतने च चन्द
नादावित्यर्थः १८ ॥

स्वामिकृत टीका ३

किंच सम इति समः शत्रौ मित्रे च समः एकरूपः मानावमानयोरपि
तथा सम एव हर्षविषादशून्य इत्यर्थः शीतोष्णयोः सुखदुःखयोश्च
समः संगविवर्जितः क्वचिदपि नासक्तः १८ ॥

पिशाचभाष्ये टीका ४

स्पष्टार्थं १८ ॥

रामानुजभाष्ये टीका ५

सम इति तुल्येति अद्वेष्टा सर्वभूतानामित्यादिना शत्रुमित्रादिषु द्वेष
रहितत्वमुक्तमत्र तेषु संनिहितेष्वपि समचित्तत्वेन तेषां व्यतिरे
को विशेषउच्यते १८ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थं १८ ॥

परमार्थप्रपा टीका ७

किंच द्वाभ्यां समः शत्रौ चेति तुल्यनिंदास्तुतिरिति शत्रौ मित्रे च समः
समस्वभावः तदुक्तं पूर्वैर्यं कष्टेन समुपागते च्छायादिभिर्वि
श्रमणं करोति वृक्षो यथा न हन्तरौ च मित्रे च समस्वभावो हृदि दास
वर्य इति तथा मानापमानयोः शीतोष्णसुखदुःखादिद्वंद्वेषु समो
हर्षविषादरहितः संगविवर्जितः क्वचिदप्यनासक्तः १८ ॥

श्री·
गी·टी·
हा·

78

वनमाली टीका ८

पुत्रवांधवादैसंगेनासक्त्यावर्जितःशेषमसकृद्व्याख्यातत्वात्स्पष्टं १८

जसमवैजयन्ती टीका ९

किंचसमःशत्रौ शत्रौचपुनःमित्रेसमःशत्रुवर्गेद्वेषक्रोधादिरहितः मित्रवर्गेहर्षलोभादिशून्यःचपुनस्तथातेनैवप्रकारेणमानापमानयोःमानेसज्जनमध्येआदरः अपमानेकुजनमध्येऽनादरस्तयोस्समःहर्षविषादशून्यःतथाशीतोष्णसुखदुःखेषुशीतोष्णयोर्वर्जनीययोर्क्रतुधर्मयोःसमस्तयोरागमापायापितेमत्वासहिष्णुःसुखदुःखयोःस्वकर्मानुसारेणदैवप्रेरितयोःसमःसुखप्राप्त्यानिरभिमानःदुःखप्राप्त्याव्याकुलःसंगविवर्जितःआत्मपरमात्मविमुखसंगरहितः १८

*किंच

मधुसूदनी १०

एवंसर्वप्रपंचःसंगविवर्जितःचेतनाचेतनसर्वविषयशोभनाध्यासरहितःसर्वथाहर्षविषादशून्यइत्यर्थःस्पष्टमन्यत् १८ ॥

सदानंदी टीका ११

शत्रौमित्रेचपूजायांसमःपरिभवेचयः शीतोष्णादावसह्येपिसमो[illegible]त्रोध्यासविवर्जितः १८ ॥

नीलकंठी टीका १२

उदासीनत्वंव्याचष्टे समइति गतव्यथत्वमुपपादयति संगविवर्जितइति संगोहिव्यथतेनतद्वर्जितइत्यर्थः १८ ॥

आनंदीटीका

संगविवर्जितइतिममपदस्यलक्षणम् संगोहिहिताहितबुद्ध्यासक्तिस्तद्रहितस्समइत्यर्थः १८॥

रामकंठीटीका

स्पष्टार्थम् १८ ॥

लाक्षकी [illegible]टीका॥ अथयोगिनोलक्षणमाहद्वाभ्यांयःशत्रुकर्मधर्मग्रामसुकृतःशत्रौमित्रेचसमोरागद्वेषरहितः मानापमानयोस्तथासमएकरूपः [illegible] १८ शीतोष्णसुखदुःखादिष्विन्द्वेषुसमोहर्षविषादरहितःसंगरहितःक्वचिदप्यनासक्तः॥ १८॥ ॥ पंचोलीटीका

समइति वपुनःशत्रौमित्रेचतुल्यःतथामानापमानयोःपूजापरिभवयोस्समस्तुल्यःशीतोष्णसुखदुःखेषुसमःसंगविवर्जितःएकांतसेवी १८

समइति रिपौ मित्रेच समः समवृत्तिः यावर्तमानः शत्रुपक्ष
गतोमित्रमपियोपयति शास्यन्तपश्चवड्योधनपक्षगतोशुचि।
स्थिरे तथामानापमानयोरपि समवृत्तिः नतुमित्रकृतमानेनश
त्रुकृतापमानेनप्रतिज्ञातपक्षं विहायापरं पक्षमाश्रयति इत्य
प्रतिज्ञइत्यर्थः तथाशीतोष्णादिषुद्वंद्वेषुसमवृत्तिःशुद्धापत्तित^
शीतोष्णादिकंसहतेसुः शीतादिभयेनापलायमानः संगविव।
र्जितो हर्षादिसंगरहितइत्यर्थः १८॥

मधुमाष

१८॥

79

भाषा अनुवाद टीका

और शत्रुमित्र दोनो के प्रति समान कहे प्रीति विरोध रहित और मान अपमानमे भी हर्ष विषाद रहित है और शीत उष्ण सुख दुख मे एकरूप है तथा सङ्ग वर्जित कहे विषयों मे आशक्ति रहित जो है १८ ॥

दोहा

है सम शत्रु मित्र महिं तथा मान अपमान शीतोष्ण सु
खदुःखमे समहै संग विहीन १८

80

तुल्यनिंदास्तुतिर्मौनी संतुष्टो येनकेनचित्
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियोनरः १९

शांकरभाष्ये टीका १

किञ्चतुल्यनिन्देति तुल्यनिन्दास्तुतिः निन्दा च स्तुतिश्च निन्दास्तुती तुल्ये यस्य सतुल्यनिन्द् स्तुतिर्मौनी मौनवान् संयतवाक् सन्तुष्टो येन केनचित् शरीरस्थितिमात्रेण तथाचोक्तं येन केनचिदाच्छन्नो येन केन चिदाशितः यत्र क्व च न शायी स्यात्तन्देवाब्राह्मणं विदुरिति किञ्च अनिकेतोनिकेतआश्रयोनिवासोनियतोन विद्यते यस्य सोयमनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियः १९ ॥

आनंदगिरिकृतटीका २

वाग्यतत्वादिविशेषणमपि ज्ञाननिष्ठस्यास्तीत्याह किञ्चेति निन्दादोषसङ्कीर्तनं स्तुतिर्गुणगणनं देहस्थितिमात्रफलेनान्नादिना ज्ञानिनः सन्तुष्टत्वे स्मृतिं प्रमाणयति तथाचेति नियतनिवासराहित्यमपि ज्ञानवतो विशेषणमित्याह किञ्चेति नकुड्ये नोदके सङ्गो न चैले न त्रिपुष्करे नासने वसने नान्ने यस्य वै मोक्षवित्तु सइति स्मृतिमुक्तेर्थे प्रमाणयति नेत्यादिना १९ ॥

स्वामिकृत टीका ३

तुल्यनिंदास्तुतिर्यस्य मौनीसंयतवाक् येनकेनचित् यथालब्धेनसंतुष्टः अनिकेतोनियतवासशून्यः स्थिरमतिःव्यवस्थितचित्तः एवंभूतोभक्तिमान्मेप्रियोनरः १९ ॥

पिशाचभाष्ये टीका ४

तुल्येति अनिकेतःअगृहः १९ ॥

रामानुजभाष्ये टीका ५

आत्मनिस्थिरमतित्वेननिकेतादिष्वसक्तत्वादनिकेतः ततएवमानापमानादिष्वपिसमः यएवंभूतोभक्तिमान्समेप्रियः अस्मादात्मनिष्ठात् मद्भक्तियोगनिष्ठस्य श्रैष्ठ्यंप्रतिपादयन्यथोपक्रममुपसंहरति १९ ॥

श्री॰
गी॰ टी॰
हा॰

81

अभिनवगुप्तकृत टीका ८

स्पष्टार्थं १९ ॥

परमार्थप्रपा टीका ९

तुल्यइति निंदायांनकुप्यति स्तुत्यानहृष्यते मौनीसंयतवाक्येनके
विषयालाभेनसंतुष्टःनविद्यतेनिकेतनंनियमितंस्थलंयस्यस्थिर
मतिर्व्यवसितचित्तःतथामतिभक्तिमान्समेप्रियः १९ ॥

वनमाली टीका ८

निंदागुणेषुविद्यमानेष्वपितानपह्नुत्यदोषाविष्करणंस्तुतिःसताम
सतांवागुणानांकथनं तेदुःखसुखजनकतयातुल्येयस्यसतथा
मौनीसंयतवाक्भगवत्कीर्तनाद्यतिरिक्तवागालापशून्यइतिया
त वत्संतुष्टोयेनकेनचित् स्वप्रयत्नंविनैवबलवत्प्रारब्धकर्मोपनीते
नदेहस्थितिहेतुमात्रेणाशनादिनासंतुष्टोनिस्पृहः
अनिकेतोनिवासरहितःस्थिरामप्यचलामतिर्यस्यसईदृशोभक्ति
त् मान्ममप्रियःउक्तधर्मसंपन्नःसर्वोत्तमत्वधीःसर्वैकस्नेहसंततिर्मा
मैवनदैवममप्रियइतिबोधयितुंसर्वत्रमद्भक्तइतिपदम् १९ ॥

उत्तमवैजयन्ती टीका ९

किंच तुल्यनिंदेतितुल्येनिंदास्तुतीयस्यसतथानिंदयादुःखशून्यःस्तु
त्याचहर्षशून्यःमौनीश्रेष्ठमननशीलोयतवाग्वायेनकेनचिद्विषयो
पलब्धेनस्वप्रारब्धानुगुणादैवप्रेरितेनकृतेनापित्यागेनवान्नादिना
सन्तुष्टःआत्मलाभादन्यलाभंतुच्छंकरोतीत्यर्थः अनिकेतःआत्मस्थि
तिवेननियतविवासरहितःकृतपर्वयत्नःस्थिरमतिःस्वात्मनिव्य
वस्थितचित्तःएवंभूतोयोभक्तिमान्नरःसोपिमेममप्रियोभव
ति १९ ॥

मधुसूदनी टीका १०

किंच निंदादोषकथनंस्तुतिर्गुणकथनंतेदुःखसुखजनकतयातुल्ये
यस्यसतथामौनीसंयतवाक् ननुशरीरयात्रानिर्वाहायवाक्व्या
पारःअपेक्षितएवनेत्याह संतुष्टोयेनकेनचित् स्वप्रयत्नमंतरे
णैवबलवत्प्रारब्धकर्मोपनीतेनशरीरस्थितिहेतुमात्रेणाशनादि
नासंतुष्टःनिस्पृहः किंच अनिकेतोनियतवासरहितः स्थिरा

मपरमार्थवस्तुविषयामतिर्यस्य सस्थिरमति ईदृशोयोभक्तिमान्
समेप्रियोनरः अत्र पुनःपुनर्भक्तेरुपादानेभक्तिरेवापवर्गस्यपु
ष्कलेकारणमितिदर्शयितुं अद्वेष्टेत्यादिना अक्षरोपासकानांजी
वन्मुक्तानांसंन्यासिनांलक्षणमुक्तंस्वभावसिद्धंधर्मजातमुक्तं
तदुक्तंवार्तिके उत्पन्नात्मावबोधस्यद्वेष्टृत्वादयोगुणाअयत्नतोभ वं
वंत्येवनतुसाधनरूपिणइति एतदेवपुरास्थितप्रज्ञलक्षणरू
पेणाभिहितं तदिदंधर्मजातंप्रयत्नेनसंपाद्यमानंमुमुक्षोर्मोक्ष
साधनंभवतीतिप्रतिपादयितुमुपसंहरति १९ ॥

सदानंदी टीका ॥

तुल्येतिनिंदास्तुतीदोषगुणकीर्तनलक्षणे यस्यसंयतवाङ्मौनीस
न्तुष्टोयेनकेनचित् शरीरयात्रामात्रार्थिप्राप्तेपिविगतस्पृहः अ
नोनियतवासेनस्थिरायस्याहृदयेमतिः २ ईदृशोभक्तिमांस्तत्व
दर्शीनित्यंममप्रियः पुनःपुनरुपादानंभक्तेस्तेनेतिगम्यते ३
पुष्कलंकारणंमोक्षेभगवद्भक्तिरेवहि ४ १९ ॥

नीलकंठी टीका १२

सर्वारंभपरित्यागीत्येतद्व्याचष्टे तुल्येति शिष्टैर्विगीतोनस्या
मितिवालोकेषुप्रख्यातःस्यामितिवाइदंमेभूयादितिवाकामय
मानःकिंचिदारभतेतेनतुल्यं तस्यनिंदास्तुतित्वात्संतुष्टत्वाच्च मौ
नीसंन्यासी अनपवादिकेतः गृहशून्यः कुटीमपिवासार्थंनारभ
ते यतःस्थिरमतिःस्थितप्रज्ञोभक्तिमान्योगीसममप्रियोनरःपु
रुषः १९ ॥

आनंदीटीका

अनिकेतपदकत्रासक्तिशून्यः [illegible] १९ ॥॥

रामकंठी टीका

स्पष्टार्थम् १९ ॥ ॥

लासिकी [illegible]टीका

[illegible]हितः मा

गी॰
टी॰
हा॰ तुल्येति

82

[illegible]ममानवेक्षित[illegible]सुखदुःखः [illegible]
[illegible] मकूरहितः [illegible]
तथा तुल्ये अभिभवो लोके तानुत्सारके निन्दास्तुती यस्य मौनी सं
यतवाक् येन केनचित् यथाप्राप्तेन संतुष्टः अनिकेतो नियतवा
सशून्यः स्थिरा अचला मतिः परमार्थविषयो बोधो यस्य स ईदृ
शो भक्तिमानुपासकः समे प्रियो नरः तथा चोक्तम् येन केनचि
दाच्छन्नो येन केनचिदाशितः यत्र क्वचन शायी स्यात्तं देवा ब्राह्म
णं विदुरिति अद्वेष्टृत्वादीनि धर्मजातानि कर्मयोगिप्रभृती
नां स्वभावसिद्धतयानूदितानि न तु योगशास्त्रे उपायत्वेन क॰
थितानि तदुक्तम् उत्पन्नतत्त्वबोधस्याद्वेष्टृत्वादयो गुणाः अय
त्नतो भवंत्यस्य न तु साधनरूपिणः इति [illegible]
[illegible]
[illegible] १९ ॥ ॥

पंचोलीटीका

तुल्येति तुल्यनिंदास्तुतिः तुल्ये समे निंदास्तुती यस्य सः मौनी सं
यतवाक् येन केनचित् शरीरस्थितिहेतुमात्रेणापि संतुष्टः अनि॰
केतः अनाश्रयः स्थिरमतिः परमार्थवस्तुनि निश्चलबुद्धिः य एवं
विधो नरो भक्तिमान् स मे प्रियः १९

रणवीरसमिद्धोधिनी॥

तुल्येति तुल्या निंदादिदोषकथनं स्तुतिर्गुणकथनं ते यस्य
स मम स्वधर्मेतः प्रवृत्तस्य स तुल्या निंदास्तुतिः तुल्ये जये पराज
ये निंदास्तुती यस्येति श्रुत्यन्यथा वा तुल्यनिंदास्तुतिः स्वधर्म
पालने प्रवृत्तत्वात् तथा मौनी स्वधर्मपरवाक्यमननशीलः ये
न केनचित् स्पष्टेनापष्टेन वा शुद्धभक्त्यादिना संतुष्टो नित्यतृप्तः
स्वदेहस्यापि नीनिकेत इति प्रकारो वै विस्मृरिति श्रुते रकार विस्मो
निकेतः स्थितिर्यस्य स अनिकेतो भगवदुक्तस्वधर्मपालननिष्ठ
त्यपि स्तुता स्थिरमतिः दृढबुद्धिरेवंभूतो भक्तो मम प्रिय इति १९॥

सप्तमाध्य

१५॥

83

भाषा अनुवाद टीका

और निन्दा स्तुति जिस को तुल्य है औ जो मौनी कहे विरुद्ध व
चन तथा बकवाद रहित हो जो कुछ यथा लाभ से सन्तुष्ट है
अनिकेत कहे निवास स्थान शून्य तथा स्थिर मति अर्थात् व
शीभूत चित्त है ऐसे गुण युक्त नर मेरे परम प्रिय हैं १९ ॥

दोहा

निंदा स्तुति सम मौनि है तुष्टे जेहि केहि सोय अगेह स्थिर
मति भक्तियुत सो नर मो प्रिय होय १९ ॥

84

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते
श्रद्दधाना मत्परमा भक्तास्तेतीव मे प्रियाः
२० इति श्रीभगव[द्]गीतासूपनिषत्सु ब्रह्म
विद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
भक्तियोगो नाम द्वादशोध्यायः १२ ॥

शांकरभाष्यं टीका १

अद्वेष्टा सर्वभूतानामित्यादिनाक्षरस्योपासकानां निवृत्तसर्वैषणानां
संन्यासिनां परमार्थज्ञाननिष्ठानां धर्मजातं प्रक्रान्तमुपसंह्रियत
इति ये त्विति ये तु संन्यासिनो धर्म्यामृतं धर्म्यादनपेतं धर्म्यञ्च तद
मृतञ्च तदमृतत्वहेतुत्वादिदं यथोक्तमद्वेष्टा सर्वभूतानामित्यादि
ना पर्युपासते अनुतिष्ठन्ति श्रद्दधानाः सन्तो मत्परमा यथोक्तोह
मक्षरात्मा परमो निरतिशयो गतिर्येषान्ते मत्परमा मद्भक्ताश्च उत्त
मां परमार्थज्ञानलक्षणां भक्तिमाश्रितास्तेऽतीव मे प्रियाः प्रियो हि
ज्ञानिनोत्यर्थमिति यत्सूचितं तद्व्याख्यायेहोपसंहृतं भक्तास्तेती
व मे प्रिया इति यस्माद्धर्म्यामृतमिदं यथोक्तमनुतिष्ठन् भगवतो
विष्णोः परमेश्वरस्यातीव मे प्रियो भवति तस्मादिदं धर्म्यामृतं मु
मुक्षुणा यत्नतोनुष्ठेयं विष्णोः प्रियं परं धाम जिगमिषुणेति वा
क्यार्थः २० इति श्रीभगवद्गीताभाष्ये द्वादशोध्यायः १२ ॥

आनंदगिरिकृत टीका २

पुनः पुनर्भक्तेर्ग्रहणमपवर्गमार्गस्य परमार्थज्ञानस्योपायार्थं अद्वे
ष्टेत्यादि धर्मजातं ज्ञानवतो लक्षणमुक्तं तदुपपादितमनूद्योपसं
हारश्लोकमवतारयति अद्वेष्टेत्यादिना चतुर्थपादस्य तात्पर्यमा
ह प्रियो हीति यद्यपि यथोक्तं धर्मजातं ज्ञानवतो लक्षणं तथापि जि
ज्ञासुना ज्ञानोपायत्वेन यत्नादनुष्ठेयमिति वाक्यार्थमुपसंहरति
यस्मादिति तदेवं सोपाधिकाभिध्यानपरिपाकान्निरुपाधिकमनुस

श्री॰
गी॰ टी॰
द्वा॰

85

न्धानस्याद्वेष्टा सर्वभूतानामित्यादि धर्मविशिष्टस्य मुख्यस्याधि
कारिणः श्रवणाद्यावर्तयतस्तत्त्वसाक्षात्कारसंभवात्ततो मुमुक्षुणाप्य
नेनलक्षेन वाक्यार्थधीविषयोन्वययोग्यस्तत्पदार्थोनुसन्धेयइति
सिद्धं २० इति द्वादशोऽध्यायः १२ ॥

स्वामिकृतटीका ३

उक्तंधर्मजातमुपसंहरति येत्विति यथोक्तंउक्तप्रकारंधर्मेपवामृतं
अमृतसाधनत्वात् धर्म्यामृतमिदमितिकेचित्पठंति तत्पर्युपासते
अनुतिष्ठंति श्रद्दधानाः सन्तो मत्परमाश्च संतो मद्भक्तास्तेऽतीवमेप्रियाइ
ति इदंत्वमव्यक्तवर्त्मैतन्नबहुविघ्नमतीत्यर्थः सर्वकृत्स्नपरोभोज्यभक्ति
स्तत्प्रथमाभजेत् २० इतिश्रीभगवद्गीतास्वामिसुबोधिन्यांटीकायांभक्ति
योगोनामद्वादशोऽध्यायः १२ ॥

पैशाचभाष्यटीका ४

येत्विति धर्मोदनपेतं धर्म्यममृतमिवउक्तमिदं ह्यद्वादिनात्समाप्तः
२० इतिपिशाचभाष्ये द्वादशोऽध्यायः १२ ॥

+ इत्यादात्मनिष्ठात् मद्भक्तियोगनिष्ठस्य श्रेष्ठ्यं प्रतिपादयन् यथोपक्रममुपसंहरति ॥

रामानुजभाष्यटीका ५

+ येत्विति धर्म्यं चामृतं चेति धर्म्यामृतं येतु इदं प्राप्यसमंप्रापकंभक्तियो
गं यथोक्तं मय्यावेश्यमनो येमामित्यादिनोक्तेनप्रकारेणोपासतेते भ
क्ता अतितरांमेप्रियाः २० इतिश्रीभगवद्रामानुजविरचिते द्वादशोऽध्यायः
१२ ॥

अभिनवगुप्तकृत टीका ६

मैत्रीअमत्सरतायस्यास्तीतिपदेकरुणाममामीइत्यादिममकारः अ
हमुदारैर्हितेजसीअसहनइत्यादिरहंकारः पतोपसपनस्तः क्षमाप
कारिणोशत्रुंप्रत्यद्वेषबुद्धिः सततंयोगीव्यवहारावस्थायामपिप्रशा
न्तोनकरणत्वात् प्रतिकेनइदमेवमयाकर्तव्यमितियस्यनास्तिप्रति
ज्ञायथाप्राप्तमहेवाकितयासुखदुःखादिकमुपभुंजानःपरमेश्वरवि
षयसमावेशीनहृदयःसर्वैनैवप्राप्नोतिपरमकैवल्यमितिशिवम्
परमानंदवैवश्यसंजातावेशसंपदः स्वयंसर्वोस्ववश्यास्तु अलम
न्तात्ययत्नतः पद्योत्रसंग्रहः २० श्रीभगवद्गीतार्थसंग्रहेद्वादशोऽध्या
यः १२ ॥ ॥ ॥

परमार्थप्रपा टीका ७

[illegible]थोपसंहरन्नाह येत्विति उक्तधर्मसर्वेपि श्रद्दधाना मत्साधनत्वा
न्यथोक्तं पथ्यावदुक्तं श्रद्दधानाः श्रद्धावंतः मत्परमा मत्परमेव परमो
येषां ते भक्तास्तेतीव मे प्रियाः अध्यायतात्पर्यं नानाविधोपविद्वेषरूपरह
तमनन्यालंबत्वं न्येन भक्तियोगाख्यकोपास्ति मे केचिद्धर्माभक्तिरूपैरलौ
किकाचार्यनामे भक्तियोगेश्वराणां मयि परमगौरं कुर्वनेस्वामल
ध्यानक्लेशतारतम्यं विशदमभिहितं द्वादशाध्यमध्ये २० इति श्रीम
दैवज्ञपंडितसूर्यविरचितायां भगवद्गीतार्थटीकायां परमार्थप्र
पायां भक्तियोगो नाम द्वादशोध्यायः १२ ॥

[illegible]माली टीका ८

पारकत्वाह ये मी विस्मृतत्स्मादनपेतेन हि धर्मयकं धर्म्यं अमृतमन्वे
सावनाशकमिदं यथोक्तं अद्वेष्टेत्यादिना प्रतिपादितं पर्युपासते
नुतिष्ठंति श्रद्दधानाः संतो मत्परमाः अहं सदनंतगुणा
लयो नराव्यक्तस्वरूपो निर्वैरिं च अपंचविभूतिवैभवो ब्रह्मरुद्रा
दिवंदीश्वराणां मनसाप्यगम्यः प्रसादैकलभ्यो भक्तवत्सलो मु
क्तैर्देः सदासेव्यमानोज्ञानानंदघनविग्रहोवसुदेवनंदनः परमः
प्राप्यो येषां ते तथा एतादृशा भक्ता मम अतीव प्रियाः मया सर्वेनेना
पि वक्तुं न शक्यते प्रीतेरियत्ताभावात् एतेन धर्माः सिद्धानां स्वाभावि
काः साधकेन सम्यग्यत्नादनुष्ठेयाः २० इति श्रीभगवद्गीताद्वा
दशः १२ ॥

[illegible]मवैजयन्ती टीका ९

आत्मनिष्ठानभक्तियोगनिष्ठस्य फलवद्देलत्वमुपसंहरति येत्विति ये तु ध
र्मी मृतमिति ये भक्ता भक्तजनशीला ज्ञानिष्ठ ये नेदं यथोक्तं म
य्यावेश्य मनो ये मामित्यादिभिर्गदितं धर्मामृतं धर्म एवामृतम
मृतत्वसाधनत्वादमृतवत्स्वाद्यत्वाद्वा प्राप्यमामिव प्रापकं भक्ति
योगं पर्युपासते समाश्रयंते कीदृशाः श्रद्दधानाः श्रद्धावंतः मत्प
रमाः अहं सर्वेश्वरेश्वरो भगवान् परमः प्राप्यो निरतिशयायाः गति
र्येषां ते तथा ते भक्ता मे मम अतीव प्रियाः निरतिशयप्रीतिविषया

भवंति २१ योद्वादशेभक्तियोगंपार्थायोपादिशत्प्रभुः भक्तिमुक्तिप्र
दंकृष्णमितंब्रह्मसमाश्रये १ इतिश्रीनियमानंदवंशावतंसशंक
रस्वामस्यान्तेवासिनागिरिधारिदासेनविरचितायांगीतार्थकु
सुमवैजयंत्यांद्वादशोऽध्यायः १२ ॥

मधुसूदनी टीका १

येतुसंन्यासिनोमुमुक्षवोधर्मामृतमेतद्यथोक्तमद्वेष्टृत्वममृतत्वसाध
नत्वात् अमृतवदास्वाद्यत्वाच्चयथोक्तमद्वेष्टासर्वभूतानामित्या
दिनाप्रतिपादितंपर्युपासतेऽनुतिष्ठन्तिश्रद्दधानाःस
न्तोमत्परमाःअहंभगवानक्षरात्मावासुदेवएवपरमःप्राप्तव्योनि
रतिशयागतिर्येषांतेमत्परमाःभक्तामांनिरुपाधिकब्रह्मभजमा
नास्तेऽतीवमेप्रियाः प्रियोहिज्ञानिनोत्यर्थमहंसचममप्रियइति
पूर्वोक्तस्यविवरणस्यायमुपसंहारःयस्माद्धर्मामृतमिदंयथोक्तमनु
ष्ठानेनभगवतोविष्णोःपरमेश्वरस्यातीवप्रियोभवति तस्मा
दिदंज्ञानवतःस्वभावसिद्धतया लक्षणमपिमुमुक्षुणाआत्म
तत्त्वजिज्ञासुनाआत्मज्ञानोपायत्वेनयत्नादनुष्ठेयंविष्णोःपरमंप
दंजिगमिषुणेतिवाक्यार्थः तदेवंसोपाधिकब्रह्माभिध्यानपरि
पाकान्निरुपाधिकब्रह्मानुसंधानंततःअद्वेष्टृत्वादिधर्मविशिष्ट
स्यमुख्यस्याधिकारिणःश्रवणमनननिदिध्यासनान्यावर्तयतो
वेदान्तवाक्यार्थतत्त्वसाक्षात्कारसंभवात्ततोमुक्त्युपपत्तेर्भक्तिरे
तद्वेदान्तमहावाक्यार्थान्वययोग्यस्तत्पदार्थोनुसंधेयइतिमध्य
मेनाध्यायषट्केनसिद्धं २१ इतिश्रीमत्परमहंसपरिव्राजकाचा
र्यश्रीविश्वेश्वरसरस्वतीपादशिष्यश्रीमधुसूदनसरस्वतीवि
रचितायांश्रीभगवद्गीतागूढार्थदीपिकायांभक्तियोगोनामद्वाद
शोऽध्यायः १२ ॥

सदानंदी टीका १

अद्वेष्टृत्वादिविशिष्टानिजीवन्मुक्तःशरीरिणां स्वभावभूतानीमानि
तदुक्तंवार्तिके उत्पन्नात्मावबोधस्यह्यद्वेष्टृत्वादयोगुणाः
अयत्नतोभवंत्यस्यनतुसाधनरूपिणः २ संपाद्यमानेयत्नेनय

मेजानतमिदेसतः विरक्तस्यात्मनिग्रहासो मेभक्तो मैंतत्साधनं ३ इत्युप
पादयन्नीशउपसंहरतीहतत् येमत्वमुक्तवोधर्मजातंसर्वमयेवि
ते मोक्षहेतत्तयाख्याख्यातत्वमर्युपासते मलेनश्रद्धयोपेताः अनु
तिष्ठंतिमत्पराः ५ श्रान्तिनाउनमोभक्तिंब्रलैकं ज्ञानलक्षणां भग
वान्वासुदेवोहंयेषांप्राप्यतयामतः ८ भक्तास्तेपंतमतीवमममाप्य
तप्रियाः सदा यस्मादहंमेमिमेसम्यगनतिष्ठत्प्रियोहरेः ७ तस्मात्व
मत्तणायत्नात्मेपायःश्रद्धयैवमतःतदेवंसगुणब्रलाभिध्यानपरि
पाकतः ८ ब्रलानुसंदधानस्याहेक्षत्वादिगुणस्यच मुमुक्षोर्ज्ञानसं
सिद्धेश्रवणाद्यनुतिष्ठतः ९ नत्वसाक्षात्कृतेमैंत्वासिद्धिरक्षितिरिक्ता
या नदेतत्क्रतिवाक्यार्थान्वययोग्यामनस्काभिः तत्पदार्थानुसंधेय
इतिसिद्धंहिमध्यमे भक्तियोगप्रधानोयं मध्यमः षट्कोगतः १० यो
ब्रह्मात्मावगताख्यः शमदमनिरतैर्नित्यमध्यात्मविद्भिर्ध्येयोऽध्येतत
त्वमस्तत्पदगमनितिभिर्ईक्षणाराधनीतोत्तैः भक्तिर्येसोदितानरुंदिसम्यः
पदिजनानामोवयेज्ञातिजन्मादेहाद्यध्यासपाशान्सवदसत्तमनोक्त
सम्यावेष्टगोमे ११ इतिभावप्रकाशेश्रीसदानंदविराकृतेश्रीगोपा
लिविवेकोपंद्वादशःषष्ठोगतः १२ ॥

...कंठी टीका १२

मक्कलक्षणान्येवमुमुक्षोःसाधनत्वेनविधत्ते येत्विति येममुक्तवः
नम्रवीक्तमुक्तापेक्षयाविलक्षणाः इदंशहेष्टासर्वभूतानामित्यादि
नाग्रंथेनप्रतिपादितंधर्मजातंतदेवामृतस्यमोक्षस्यसाधनत्वादमृ
तंधर्मामृतं यथोक्तंउक्तानतिक्रमेणपर्युपासते साकल्येनानुति
ष्ठंति श्रद्दधानाःश्रद्धायुक्ताःमत्परमाःअहमेवभगवान्वासुदेवोऽ
क्षराख्यःसर्वविशेषरहितःपरमानंदरूपःपरमःप्राप्यतिकःप्राप्यो
येषांतेमत्परमाःभक्ताःशांतिदान्त्यादिमन्तोमद्भजनशीलास्तेऽती
वमेममप्रियाः ज्ञानीत्वभगवत्प्रात्मैव परिशेषादतीवप्रियत्वं
भक्तेष्वेवपर्यवसन्नं योमद्भक्तानांस्वाभाविकोधर्मः सममुमुक्षूणांय
त्नतोनुष्ठेयइत्यर्थः यथोक्तंवार्त्तिके उत्पन्नात्मप्रबोधस्यत्वद्वेष्टृ
त्वादयोगुणाः अयत्नतोभवंत्यस्यनतुसाधनरूपिणः इति समाप्त

उपासनाप्रधानस्तत्पदार्थविवेकः अतःपरंवाक्यार्थविचारोजीवब्र
ह्माभेदप्रतिपादकोभविष्यति २॰ इतिश्रीभीष्मपर्वणिनैलकंठीये
भारतभावदीपेद्वादशोऽध्यायः ॥ समाप्तश्चायमुपासनाकांडः १२

## आनंदीटीका

अथाध्यायार्थमुपसंहरति धर्म्याद्वर्णाश्रमविधेरनपेतं धर्म्यंस्वजातिविहितेनाचारेणानुष्ठीय
मानममृतमेवामृतं मोक्षसाधनमिदमस्मिन्नध्याये प्रोक्तंसाकारनिरा
कारपरमेश्वरभजनेयथोक्तंपर्युपासते श्रद्दधाना मद्वचनानांफ
लेनिश्चिताः मत्परमाःअहमेवपरमोयेषांतेभक्तामममातीवप्रि
याः २०॥ इतिश्रीभगवद्गीता आनंदीटीकायां द्वादशोऽध्यायः १२॥

## रामकंठीटीका

येभक्तामत्पर्यापरामत्परायणाःउक्तयथोक्तंधर्मामृतंमत्स्वरूपोपा
सनात्मकसदाचाररूपममृतममविनाशिवस्तुपरमकारणमुपासतेनि
त्यानुशीलनेनोपसेवंतेतेतीवस्तंतामममप्रियावल्लभानतेमत्तोव्यति
रिक्ताइत्यर्थः कीदृशाःसंतउपासतेमे श्रद्दधानाःसमस्तसिद्धिबीजभूता
श्रद्धांभजंतः मत्परमाअहमेवयथोक्तस्वरूपःपरमेश्वरःप
रमात्मासर्वोपायैरुपेयतयापरमःप्रकृष्टोयेषांतेतथा श्रद्धामूलम
त्समापत्तिफलोपरासिद्धिंसमुपागतास्तेषाम् सर्वार्थप्रार्थनेनारहि
तमपिमत्तोमानसंलोभयंतीलत्सायत्रसर्वैषाविकसतिभगवद्भ
क्तिकल्पद्रुमश्रीः तांनिर्मंतनस्नेनावीविहरणाविरताःकौतकाङ्क्षमपी
मामेकांविश्रांतभूमिंश्रयतेकृतयियोद्वादशाध्यायहृतिम् २० ॥
इतिश्रीभगवद्गीता रामकंठीटीकायां द्वादशोऽध्यायः १२ ॥ ॥

## लाभिकी टीका

+ अथुनाबुद्धियोगादिविनाकृतस्यापिईश्वर
विषयभक्तियोगयुक्तस्यातिप्रियत्वंसर्वेषां
जनानांयथातथाभज +
नायप्रोत्साहकत्वेनाह॥

+ तत्कृत्स्नलत्वाविपर्यये येबुद्धियोगादिविषयेलब्धगौरवरहिताः संतः
इदमनंतरमेवयथोक्तमुक्तप्रकारंधर्मामृतंधर्ममेवामृतममृत
साधनत्वात् धर्म्यामृतमितिकेचित्पठंति उपासतेनुतिष्ठंति तथा
श्रद्दधानाआदरातिशययुक्तामत्परमामयीश्वरे परमेसर्वोत्रेणाप
रायणाभक्तायथातथाजपहोमार्चनादिकर्मणामदुपासनायुक्ताः
तेतीवममेश्वरस्यप्रियः सर्वत्राकोक्तेभक्तोपेकवचननिर्देशाम

नुष्यसहस्रेष्वपिमध्येकश्चिदेवममयोगोभवतीतिध्वनयितुं
इहतत्वद्वचनेनसर्वेषांभक्तियोगेऽधिकारित्वसूचनार्थमितिशिवम् २०
उपासनायाद्वैविध्यंलोकोत्तरत्वयादिशत् अस्मिन्भजनयोगाय
स्तंवंदेहरुसमव्ययम् ॥२॥ ॥ इतिश्रीभगवद्गीता
वल्लभगमीटीकायां भक्तियोगोनाम द्वादशोऽध्यायः १२॥

## पंचोलीटीका

उक्तंधर्मज्ञानफलमुपसंहरति येत्विति तुशब्दः येसंन्यासिनः इ
दंयथोक्तं अद्वेष्टासर्वभूतानामित्यादिप्रकारेणोक्तंधर्म्यामृतंपर्यु
पासतेअनुतिष्ठंतिश्रद्दधानाः श्रद्धावंतः मत्परमाः अहमक्षरात्मा
परमानिरतिशयागतिर्येषांतेमत्परमामद्भक्ताश्चउक्तपरमार्थ
ज्ञानलक्षणांभक्तिमाश्रिताः तेजीवभगवतोविशेषाः परमेश्वरस्य
प्रियाः भवंतितस्मादिदंधर्मामृतंमुमुक्षुणायत्नतोऽनुष्ठेयंवि
शेषः प्रियेयामजिगामिषुणेतिवाक्यशेषः २० इतिश्रीभगवद्गीता
पंचोलीआचार्यकृतटीकाद्वादशोऽध्यायः १२

## रत्नावीरसमिद्बोधिनी॥

उक्तमर्थमुपसंहरति येत्विति यथोक्तमुक्तप्रकारमिदंधर्मामृ
तं धर्ममेवामृतंयेउपासते अनुतिष्ठंति श्रद्दधानाः श्रद्धांकुर्वं
तोमत्परास्तेभक्ताः मेअतीवप्रियाइति २०॥ इतिश्रीभग
वद्गीतायांरत्नावीरसमिद्बोधिन्यांभक्तियोगोनामद्वादशोऽध्यायः
१२॥

## मधुभाष्य

येतुधर्म्यामृतमिति धर्मोविमुक्तिहेतुविषयं धर्म्यं धर्म्यमृत्यादि
संसारनाशकंचेतिधर्म्यामृतं अहैतुकीं भक्त्यामात्मिकामु
पासतेऽत्यभिधान तद्दधानाः श्रद्दधानाः २० ॥इतिश्रीमदा
नंदतीर्थभगवत्पादाचार्यविरचितेश्रीमद्भगवद्गीताभाष्येद्वा
दशोऽध्यायः १२ ॥

88

भाषा अनुवाद टीका

यहो सब पूर्वोक्त धर्म अमृत कहे मुक्ति रूप हैं इनको यथो
क्तरूपसे जो श्रद्धायुक्त उपासना करतेहैं और मत्परता कहे मै
ही हौं परम परायण जिनको ऐसेमेरे भक्त मोके अतिशय प्रि
य हैं २० इति जगन्नाथ सकुलविरचित मनभावनी भाषा टी
कायां द्वादशोऽध्यायः १२ ॥

दोहा

जो धर्मामृत कोयहिं यथाकथितभजे सोहि श्रद्धावंत
सो परम है भक्त सुअतिप्रिय मोहि २० ॥ इति